निलिम्प-काव्यम् द्वितीयस्पन्दः

संस्कृत-जीवनम्

(ललितगद्यम्)



त्रिपाठी डा० भास्कराचार्यः

NP
NAG PUBLISHERS

नाग प्रकाशक

निलिम्प-काव्यम् द्वितीयस्पन्दः

संस्कृत-जीवनम्

(ललितगद्यम्)

त्रिपाठी डा० भास्कराचार्यः

नाग प्रकाशक

निलिम्प-काव्यम्. द्वितीयस्पन्दः

संस्कृत-जीवनम्

ललितगद्यम्

लेखकः

त्रिपाठी· डॉ. भास्कराचार्यः

NAG PUBLISHERS

नाग प्रकाशक

11ए/ यू॰ ए॰ जवाहर नगर

दिल्ली-110007

राष्ट्रिय संस्कृत संस्थान, नई दिल्ली के वित्तीय सहयोग से प्रकाशित

(1) 11ए/यू०ए० जवाहर नगर, दिल्ली-110007

(2) संस्कृत भवन 12,15 फ्लेट, संस्कृत नगर, प्लाट नं० 3, सेक्टर-14,
रोहिणी, नई दिल्ली-110085

(3) जलालपुर माफी (चुनार-मिर्जापुर) उ०प्र०

ISBN 81-7081-355-7 (Set)
ISBN 81-7081-357-3 (Vol II)

प्रथम संस्करण: 1997

मूल्य- 45-00

श्री सुरेन्द्र प्रताप द्वारा नाग प्रकाशक 11 ए, यू० ए० जवाहर नगर, दिल्ली 110007 द्वारा प्रकाशित तथा जी. प्रिंट. प्रासेस, 308/2 शहजादा बाग, दयाबस्ती दिल्ली 110035 द्वारा मुद्रित।

अक्षरयोजक
ए० आर० प्रिंटर्स,
डी-102 न्यू सीलमपुर, दिल्ली-110053

NILIMP-KĀVYAM

Part-II

SANSKRIT JEEVANAM

Elegant Prose

Writer

Dr. BHĀSKARĀCHĀRYA TRIPĀTHĪ

NAG PUBLISHERS

NĀG PUBLISHERS

11A/U.A. Jawahar Nagar, Delhi-7

This Publication has been brought out with the financial Assistance from the Rashtriya Sanskrit Sansthan, New Delhi.

1. 11A/U.A. Jawahar Nagar Delhi-110007
2. Sanskrit Bhawan, 12,15 Flat, Sanskrit Nagar,
   Plot No.3, Sector 14, Rohini, New Delhi-110085
3. Jalalpur Mafi (Chunar-Mirjapur) U.P.

ISBN 81-7081-355-7 (Set)
ISBN 81-7081-357-3 (Vol II)

First Edition: 1997

Price: Rs. 45-00

Published by Shri Surendra Pratap for Nag Publishers, 11 A (U A) Jawahar Nagar, Delhi–110007 and Printed at G. Print Process 308/2 Shahzada Bagh, Dayabasti Delhi–110035

Laser type setting

A. R. Printers, D-102, New Seelampur Delhi–110053

समर्पणम्

आद्यन्तं रघुनाथ-कीर्तिकलशी-वेदीभवद्विग्रहं
भक्तानां हृदयेषु पुण्यलहरी-प्रेङ्खोलनं मारुतिम्,
स्वीयं वाचिकचापलं सुरगिरा लेखार्पितं साम्प्रतं
किंशीलो ननु दर्शयानि लवलीद्रोणात्मना पाणिना.

आशंसा

अद्यत्वे परं दुरवापं विद्यते संस्कृतस्य परम्पराहृद्यं गद्यम्. क्व यातं हन्त! कौटिल्य–पतञ्जलि–राजशेखरादीनां सरल–चूर्णकशैली–करम्बितं वचः, क्व गतं नाम रुद्रदाम–शिलालेखस्य स्फुटलघुमधुरचित्रकान्त–शब्दसमयोदारालङ्कृतं गद्यम्, क्व तिरोहितं तदोजः समासभूयस्त्वसञ्जीवितं दण्डिनो गद्यजीवितम्, क्व च निलीनं लयानुगुण–झम्पासमन्वितं चित्रोपमवर्णनापेशलं बाणभट्टस्य कमनीयगद्यकौशलम्. सम्प्रति येऽल्पीयांसो लेखनीधराः सन्ति ते प्रायो दीनादीनां प्रभावविहीनां भाषान्तरच्छायाचितां संस्कृतां प्रस्तुवन्ति.

त्रिपाठी भास्कराचार्यो नः प्रीतिसर्वस्वपात्रं शिष्यः स्वकीयया प्रतिभा–पयः–पूरस्नपितया साहितीवर्त्तिकया 'संस्कृतजीवनम्' आलिख्य नवां सकारात्मसम्भावनामुपस्थापयति. अत्र सर्वविधाऽपि गद्यशैली–विच्छित्तिमाधुरी युगपद् वरीवृत्यत इति सत्यमुदीक्ष्य सुतरां प्रमोदामहे वयम्. ग्रन्थेऽस्मिन् न केवलाऽनुकरणमयी पद्धतिरपि तु यमकानुप्रासबन्धुर–लयशालिशब्दनिकुरम्बैः, साकूतविशेषणगर्भैः सन्दर्भैः, सहजबिम्बोन्मुखसाधर्म्यपरिसंख्याविरोधाभासप्रभृतिकाव्यालङ्कारैः, क्वचन चूर्णकैरुत दण्डकैः, क्वापि च समास–सङ्कुलैस्तथापि सारल्यमञ्जुलैर्गद्यबन्धैरभिनवा काचन भास्करशैली सुरभारती–समृद्धिमाचक्षाणा परिचयगोचरतामुपैति. उदाहरणार्थम्–

प्रभातपवनवर्णनम्–

'कणिशभार–प्रह्वीभूतानि शालिक्षेत्राणि, नन्दितेन्दिन्दिराणामिन्दीवराणां मरन्दसम्भारभारभङ्गुराणि नीलनालानि, पत्रस्थहिमविप्रुषो लतास्थं कुसुम–कलापञ्च नर्त्तयमानः किञ्चिदधिकं सौरभ्यभरभरितः स्वास्थ्यवर्द्धको मातरिश्वा जडिम्ना जडीभूत इव मन्दमन्दं कल्ये प्रचलति'.

सत्सङ्गतिपल्लवनम्–

'परन्तु नैष नयः. सङ्गतिप्रभावः सुतरां दुर्निवारो भवति. सन्तप्तायसि

संस्थितं पयो नान्तरीयकत्वेन प्रणष्टं भवति. एवमेवाधमसङ्गतोऽवश्यम्भावी प्रणाश इति दृढं प्रतीमः'.

मध्यप्रदेशचित्रणम्-

'इयं भिल्लाय उद्योगशृङ्खलिताऽपि संवहन्ती विलासपूरम्, दुर्गकेन्द्रिताऽपि नित्यं महासमुद्रविहारिणी, नारायणपुरेऽपि मधुस्फालितजनपदा, विश्रामपुरेऽपि कृष्णाङ्गारश्रमवती...इह शोणधाराः शैलशिखरेभ्यः पतन्ति न क्षतनिकरेभ्यः, सिप्रा भर्तृहरितीर्थात् स्खलति न कामिनीकलेवरात्, छलिकरूपं रङ्गमञ्चे महीयंते न व्यवहारे, तु-हि-न-प्रभावा वृत्तपूरणे भवन्ति न शस्यजाते'.

परिवेशदर्शनम्-

'जनसाधारणो रणोर्जितविद्वेषमये समये मयेदं लब्धव्यमिति मितिहीन-वैयक्तिककाङ्क्षया क्षयान्वितविपत्तीरपि तीरपिहितनेत्रकोऽत्र को विलक्षयेत् क्षयेत्'.

सारस्वती जिजीविषा वा यथा-

'जयति विबुधभारती-व्यञ्जनासाहिति प्राक्तनी मञ्जुला चेतनासंवला यन्त्रणाऽऽवेदने स्वस्तिसंवेदने किन्तु नव्याऽपि वाक् पोषणीया मनाक् साऽनिशं वर्द्धते व्यक्तये स्पर्द्धते पर्वशोभारते स्वे गृहे भारते यान्त्रिकीजर्जरे चापि विश्वाजिरे, इति.

साम्प्रतिक-गद्यसाहित्यस्य प्रतिनिधिभूता निःश्रयणीप्रस्तुतिरियं छात्राणां सुधीवराणाञ्च नवलेखनप्रवृत्ती विवित्साऽनुसन्धित्से यथाकामं पूरयिष्यत इति विश्वसिमः

भास्करप्रभया पुण्यं लोकसंस्कारमञ्जुलम्
चितिव्याकरणोद्भिन्नं जयेत् संस्कृतजीवनम्.

प्रो. सुरेशचन्द्र श्रीवास्तवः
17.6.95 कुलपतिः
इलाहाबाद विश्वविद्यालयः

नैवेद्यम्

अनवद्यं गद्यमेव कस्याश्चन भाषाया जीवनतत्त्वं भवति. सततपरीवाह-प्राञ्जलं पुण्यापगाजलमिव तदेकपदे व्यनक्ति साहिती-लोकव्याहारयोस्तरसा रसाप्लुतशीलां जीवनलीलाम्. एकदा कश्चनाङ्लप्राध्यापकः कार्यरतः प्रयागवर्त्तिनि ज्ञानपीठे ज्ञानपीठपुरस्कारभाङ् निरुत्तरतादौर्भाग्येण योजयन्नपृच्छद् विदुषः 'Well, friends! What is wrong with Sanskrit?' मुद्रितवचनविसर्जनेषु जनेषु स स्वयमेव दशप्रायाणां प्रमुखविश्वभाषाणां रसोच्छलगद्यबन्धान् निर्बन्धमुदाहरन् व्याजहार- 'There is no proper prose in Sanskrit'. उक्तिमेनां निराचिकीर्षुरयतेऽहं तदानीम्, यद्—

विबुधभारत्यां कृष्णयजुर्वेदादारभ्य विलसतितरामविच्छिन्ना गद्यपरम्परा. आर्षशैली तरलसरला ब्राह्मणप्रभृति-वैदिकवाङ्मये, उपदेशशैली निरुपधिकला शास्त्रपुराणयोः, अलङ्कारपेशला ललितशैली चैव शिलालेख-साहितीविधयो-र्विविधयो राराज्यते. अपि नाम पाणिनिकात्यायन-पतञ्जलयः खिष्टपूर्वसूरयः सुमनोत्तरावासवदत्ता-भैमरथीप्रभृतीराख्यायिकाः परिचिन्वन्ति स्म. शिलालेखेषु समुद्रगुप्तादीनां (350 ई.) किं बहुना, विभान्ति पञ्चत्रिंशत्पङ्क्तिविजृम्भितानि गद्यवाक्यानि.

अथास्माकं बहुलमतीतसाहित्यं लोपमवाप, यथा- वररुचिरचिता चारुमती, रामिल-सौमिलकलिता शूद्रककथा, श्रीपालिप्रणीता च तरङ्गवती. यथा सप्तमशताब्दीजनिबन्धवः साहित्यमाधुरीसिन्धवः समे दण्डिबाणसुबन्धवः कृतीरनुपमचित्रलोकप्रकृतीरकृषत तथैव काले काले वेल्लितसौहित्यं प्रचुरगद्यसाहित्यमितो लिखितम्. के न विदन्ति तृतीयशताब्द्या विश्वसुरभि पञ्चतन्त्रम्, मुञ्जकालप्रसूतां तिलकमञ्जरीम्, एकादशशताब्दीजनुषः सोड्ढलस्य उदयसुन्दरीकथाम्, पञ्चदशशताब्द्या वामनभट्टबाणस्य वेमभूपालचरितम्,

अष्टादशशताब्दीसम्भवस्य विश्वेश्वरपाण्डेयस्य मन्दारमञ्जरीम्, ऊनविंशशताब्दी-निर्यासस्य अम्बिकादत्तव्यासस्य शिवराजविजयम्, साम्प्रतिकञ्च मेधाव्रतस्य कुमुदिनीचन्द्रं श्रीनाथशास्त्रिणो वा चेन्नम्मापुरस्सरमुपन्यासषट्कमिति.

एवमावेदितोऽपि नासौ मुखरो मनीषी स्वविचारान् पर्यवीवृतत्- 'A part of Sanskrit Prose is Ornamental poetry and a part is of incomplete idioms. There is very less of it in the form of true Prose' इति चाम्रेडितवान्.

पुनरीदृशी कटुसमालोचना च नावर्त्ततामिति सङ्कल्प एव द्विशाखस्य संस्कृतजीवनस्य पल्लवने मूलतां बिभर्त्ति. इह प्रतिनिबन्धं बन्धच्छायावैविधीभिः स्वकीया विचारसरणिः स्वशैल्या समुपस्थापिता, कामं तस्यां शास्त्रलक्षणावली क्वचन (साहित्यदर्पणम् 6/332-336) संजाघटीतु.

आयुष्मान् लेखानुक्रमविन्यासी सूनुर्मे त्रिपाठी निलिम्पः, शब्दपरामर्श-वलितानुकम्पा विदुषी दीक्षितपुष्पा, वेङ्गलूरुकविरङ्क्तिसूक्तिविशेषः शतावधानी गणेशः, पाण्डुलिपिपरिशीलनस्फुरिताशंसो वदान्यः प्रयागविश्व- विद्यालय-कुलपती राजधान्यां वर्द्धितसंस्कृताध्ययनरागः प्रकाशको नागश्च रमणीयपुस्तकप्रस्तुत्यै मे कृतवेदितामर्हन्ति,

अनन्त-चतुर्दशी
8 सितम्बर 1995

त्रिपाठी भास्कराचार्यः

एफ् 44/6 दक्षिणतात्याटोपे-नगरम्
भोपाल्-3

अनुक्रमणी

1. आकल्पः

संस्कृतायतिः

इन्दुं निन्दतु पद्मिनी यदपि वा निन्दन्तु चक्राह्वया
नैवानेन सुधाकरस्य सुषमाहानिर्न वा दुर्यशः.

धन्या सुरभारती, या हि मातृवागिव भारतमेदिन्या विविधम्लेच्छभाषा मूर्च्छयन्ती, तासां साहित्यसार्थान् कदर्थयन्ती, संस्कारपूतसूरिसुजनव्रजं जीवयन्ती, प्राकृतपुरुषानपि पालयन्ती, उपभाषायितदुहितृः प्रोत्साहयन्ती, श्रुतिभूर्जतालपत्रादि-नश्वरसाधनैरपि जयन्ती, संस्कृतिसौन्दर्यवितानं वलयन्ती चिरन्तनानेहश्चक्रेण चिरनूतनाद्यत्वेऽपि राराज्यते. अथ नित्यं शुद्धतामादधाना, पवित्रतां त्रायमाणा, हृद्यनिरवद्यपदवीमुररीकुर्वाणा गीर्वाणवाणी वाक्सङ्करकर्दमायिते जगति सत्रासमपि सादरं प्रयुज्यमाना पूज्यमाना च दरीदृश्यते. लोकेऽपभ्रंशानुरागिणि के के न सकृत् समुद्विज्यापि सौन्दर्यदुर्ललितामिमां ववन्दिरे. वैदिकयुगे वृत्रासुर इन्द्रशत्रोर्दुष्टोच्चारणेन, दुर्वासाश्च विस्वरसामगायनेन दुर्गतिं भेजाते तदापि न मुमुचाते सुरवाङ्मचर्चिकाम्. महाभारतसमये व्यासकूटशब्दानामभिधाऽपि नाबुध्यत धीमता गणाधिपेन. संस्कृतशब्दस्य प्रथमप्रयोगचणे वाल्मीकिरामायणे-

यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम्,
रावणं मन्यमाना मां सीता भीता भविष्यति.

इति शङ्कितोऽपि संस्कृतमेव ततान मारुतिः.गावीगोणीगोतागोपोतलिकाप्रयोजकेऽपि पतञ्जलिकाले गोशब्द एव समादरमविन्दत्. स्वाल्पज्ञतां विज्ञापयतां पालिं प्रथयताञ्च गौतमबुद्धादीनां बुद्धिर्न वैबुधीं वाचमवधीरयितुं शशाक. इतः पालिरभ्रविलायं विलिल्ये समीड्यते च सुतरामद्यापि संस्कृतम्.

'परुसा सक्कअबंधा पाउअबंधो अ होइ सुउमारो' इति जल्पतापि राजशेखरेण न भाषाशेखरायिता खर्वीकृता सुरवाक्. मौहम्मदानामुर्दूमद

वृन्दारकभारतीमधुरिमा विधुरीचकार. यवनकवी रहीम-खानखाना संस्कृतकाव्यैः 'तत्सीदामि सदैव मोहजलधौ हैदर गुजारे शुकर' इति मिश्रकाव्यैश्च साहित्यं सिषेवे.

ग्राम्यगिरा मानसं ग्रथ्नता गोस्वामिना स्वहिन्दी भूरिदेववाणीपद्यैर्विभूषिता. वन्दमानेन दोषराहित्यं मञ्जुकोमलत्वञ्च वाल्मीकिवाचां, स्वतोऽशुद्धश्लोकान् कवमानेन महाकविनाऽमुना संस्कृतं प्रति निजादराशक्यत्वे युगपन्निवेदिते. सुरभारत्या विभक्तिभ्यो बिभ्यतोऽपि हिन्दीकवयस्तदीयैरेव शब्दसाहित्यसार्थैः स्वान् कृतार्थयन्ते. अवशिष्टा ननु सर्वोत्तमसेविका संस्कृतस्याङ्लजातिः. अहो! आङ्लपुरस्सराः पाश्चात्त्या गीर्वाणगिरमुज्जीवयामासुः, प्रसारयामासुः, भाषान्तरीचक्रुः, पाण्डुलिपिचौर्यं चक्रुः, प्रेम्णा पेठुः, स्वदेशे पाठयाम्बभूवुस्त-थापि भारतीयान् प्रतारयाम्बभूवुः -संस्कृतं मृतभाषेति. किमसौ मृतभाषा यां पराधीनतासमयेऽपि भारतीयैः साकमनेके वैदेशिकविद्वांसः सततमनुशीलयन्तो व्यराजन्त. यदाह मोक्षमूलरः-संस्कृतं मा नाम भौतिकीमाशां मे बिभृयात्, नैतद् जह्याम्.

सम्प्रति पारवश्यतमिस्रासमत्ययेऽस्माकं मनोमुकुलानि समुन्मीलयन्ती स्वतन्त्रा नूतनाशापेशला प्राभातिकविभा भारताभ्युदयभास्वतो नेत्रातिथीभवति. मा जोषं निषण्णाभूद् विषण्णा भारतीयसंस्कृतिर्न च परिम्लायतु कल्पलता संस्कृतस्य.

कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे
एति जीवन्तमानन्दो नरं वर्षशतादपि.

अद्य चतुर्दिग् जनालयेषु देवालयेषु विद्यालयेषु च विराजते सर्वत्र समुच्छ्रिता सुरवाग्वैजयन्ती. संस्कृतमेदुरा राजकीयकार्यालयेष्वप्येतदीयमेव कीर्त्तिपटहस्वनं प्रकटयति हिन्दी. प्रतियोगितापरीक्षासु संस्कृतस्य समादरं दृष्ट्वा हृष्टतरविद्यार्थिनः सततमधीयते व्यासवाल्मीकिभासकालिदासान्. स्वदेश-संस्कृत्यभिमानिनः श्रीमद्गान्धिनेहरूप्रभृतयो भारतनेतारः सामाजिकरीत्यै, प्रीत्यै, शान्त्यै समुन्नत्यै च संस्कृतमेव चरमशरणं समर्थितवन्तः. विद्वांसः सत्यमाम्नासिषुः- संस्कृतं भारतीयसंस्कृतेः सम्प्रदायस्य च प्रांशुविशालो न्यग्रोधशालो यस्यैकदा मृदुसमुदारविलसच्छायासु इतिहासेऽसाधारणतयाऽस्मत्कृत्स्नकलाविज्ञानानि कामं ववृधिरे.

अथ महदुत्तरदायित्वं वर्तते संस्कृतज्ञानामुद्धुरकन्धरासु–सर्वे परस्परं स्निह्यन्तः, विवादं सन्त्यजन्तः सुरवाचं व्याहरन्तः, ललाटदर्शितामाङ्लानां परिहरन्तः, पत्रिकाः प्रकाशयन्तः, दैनिकपत्राणि वितरन्तः संयोजयन्तश्च सूरिपरिषदः प्रसारयन्तु निर्जरसरस्वतीम्. भाषायाः समुपबृंहणं समयानुसारतः सरलीकरणञ्च विधेये. गतास्ते राजानो ये श्लिष्टक्लिष्टश्लोकैः स्तोतॄन् संस्कृतज्ञानपीपलन्. ननु मुधाविजल्पपल्लवितानां लिङ्गप्रकरणानामाख्याते दुष्प्रपञ्चितानां यङन्तयङ्लुगन्तरूपाणां द्विवचनानां वापि निरर्थकनियमदामानि दूरीकृत्य, भाषान्तरेभ्योऽपि कतिपयशब्दविसरानावश्यकानूरीकृत्य सरलयत संस्कृतम्, त्यजत मोहनिद्राम्, निभालयत लोकस्य तीव्रवेगेन परिणमन्तीं क्रान्तिमयीमवस्थाम्, रचयत चाभिनवविज्ञानराजनीतिसमुपयोगिशब्दशास्त्रव्रजान्.

सुरभारतीरसिकैः पुनरपि विरच्यन्तामनवद्यपदकुसुमवाटिका इव काव्यस्य कौशेयशाटिकाः प्रकटितार्थश्रीकाः सुरम्यटीकाः, ग्रथ्यन्तां विद्वतपथान् प्रथयन्तो रम्यज्ञानकन्था इव बुद्धिकामधेनुरोमन्था इव तत्त्वमन्थाः शोधग्रन्थाः; सज्ज्यन्तां च सैन्यसदृक्षाः कृतप्रणरक्षाः संस्कृतिविकासदक्षाः परार्घ्यपक्षाः सफलविवक्षाः संस्कृतकक्षाः. इदानीमौदीच्यभारते जुगुप्सितायामाङ्लभाषायां दक्षिणभारते च कर्दमितायां हिन्द्यां, कदाचिदशेषदेशविशदमनीषाविष्कारिणी लसद्भक्ति–सम्भाजनीया संस्कृतिसभ्यतासम्भर्त्री सहजसूनृता संस्कृतभाषैव राष्ट्रभाषायिता भवेत्.

सरलीकुरु संस्कृतम्

प्रस्तूयतेऽथ निखिलविद्वज्जनमनःसंवादिनी वाग् यत्साम्प्रतं स्वश्रेयसे संस्कृताया आर्यगिरः सरलीकरणं नितरां नान्तरीयकमिति. भारतीयगगनमण्डले सहस्रशरत्पारवश्यमहातमिस्रातमोऽपगमे उदयाभिमुखभारताभ्युदयभास्वतो नूतननूतनाशारश्मिसमुद्भासि दिव्यं प्राभातिकं ज्योतिर्विशालमाशाचक्र-वालमाभासयन्नो मनःकलिकाः समुन्मीलयदिव नेत्रप्राघुणकीक्रियते. परं हन्त! प्राक्तनपरम्पराप्रश्लेषिण्यास्माकीने देशे गड्डरिकावद् गतानुगतिकाः प्रायशो मुग्धधियो जना वरीवृत्यन्तेऽवरुणद्धि चामीषां रूढिवादोऽस्मदुन्नतिप्रतोलीरिति दर्शं दर्शमतीव दूयामहे वयम्. गुणैकपक्षपातिभिर्विद्वद्भिस्तादृशाः समुपायाः समुपस्थाप्येरन् यैः स्वसंस्कृतभाषास्वदेशोच्छ्रापणार्थमुन्नतिसरण्यो विलसन्तु वीतकण्टकाः.

नैतत्तिरोहितं विपश्चितां यदियं भारतीयसंस्कृत्यभिमानिनां माननीयम-र्चिका वैबुधी वाणी सम्प्रति समुपरतेति निगद्यते. नियमनिवहकाठिन्याद् भीतः सन् लोको न संस्कृताध्ययनायोद्धुरकन्धरो भवति. ध्यायन्तु सुधियो यदत्र काव्य-ज्यौतिषायुर्वेदार्थशास्त्रराजनीतिपुरस्सरेभ्यो लक्ष्यग्रन्थेभ्यः साहित्य-व्याकरणादिलक्षणशास्त्राणामेव प्राधान्यमकारि दुर्मेधोभिः पाठप्रतिष्ठाजुड्भिः. तथाहि आनन्त्यमलङ्काराणां, सहस्रवर्त्मा नायिकाभेदः. इतोऽपि घोरा बाणसुबन्ध्वोर्नव्यन्यायस्य च गौडीरीतिस्तु कस्यच्छात्रस्य मनस्तापं न तनुते? जीवनस्यार्द्धभागं यावदध्येयम् अष्टाध्यायीवार्त्तिकमहाभाष्यकाशिका-कौमुदीमनोरमाशेखरपिच्छिलं पुनः पुनः परिशील्यापि गूढमेव तिष्ठच्छब्दानु-शासनशास्त्रञ्च कस्योत्साहं न विधुरयति? सुतरां सङ्घटतेऽत्र कस्यापि व्याकरणच्छात्रस्य भणितिः-

मया विद्याऽधीता चिरमपि न कालो बहुगतो
गृहे भार्या नित्यं गणयति कराग्रेण दिवसान्,
तथा कीनाशोऽपि प्रतिदिनमपेक्षाञ्च कुरुते
न जाने कस्याहं वद सदनगामीति गिरिजे!

यद्यपि प्राचीनैः सकलशास्त्रसन्दोहाचार्यचर्याचणैः लोकोत्तरप्रतिभानवद्भिः विद्वद्भिः पदपाठानुक्रमणीरूपैः पृथुलकलेवरसूत्रग्रन्थरूपैः ग्रन्थार्णवार्णःपारीणैः टीकोपटीकापारिप्लवरूपैश्च रक्षासूत्रैः सुरक्षिताऽभूद् गीर्वाणवाणी. किन्त्वब्रह्मण्यम्! अयमप्रत्याशितः परिणाम आपतितः. दुरूहदुर्बोधलक्षणग्रन्था निगडीभूयैतां पञ्चत्वं प्रापयाम्बभूवुः.

विदाङ्कुर्वन्तु नाम दरमुकुलितलोचना मनीषिणो यत् पदे पदे नियमदामसन्दानिता नात्र नाटकविधा नवप्रयोगसहाः सन्तिष्ठन्ते. अथापि च केन सचेतसा प्रतिपद-सन्देहशरणस्य लिङ्गप्रकरणस्य सरलीकरणं नापेक्ष्येत? यत्र विश्वस्य सर्वासु भाषासु शब्दानां लिङ्गज्ञानं सुबोधं, तत्रैव पुनः संस्कृत एतत्प्रकरणं निरतिशयदुर्बोधं सर्वथा कठिनञ्च वरीवर्त्ति. आह! कमनीयकाव्यकाननपञ्चाननः पण्डितपार्थिवो जगन्नाथोऽपि-'न लभ्यं घोराभिः सुविमलतपोराशिभिरपि' इत्यत्र राशिशब्दस्य लिङ्गोल्लिङ्गने स्त्रैणतामापादयन् प्रचस्खाल. एवमेव धातुरूपाणामपि दुष्प्रपञ्चनं प्रेक्ष्यतां प्रेक्षावद्भिः. कोऽपि धीरो यङन्तयङ्लुगन्तरूपाणि साकल्येन स्मर्तुं पारयतीति वक्तुं दुःशकम्. सकलवाग्विकल्पेष्वप्रयाससाध्यान्याख्यातरूपविलसितान्यत्र श्लोकैरवबोध्यन्ते-

गृधेर्यलोपे लङि शेरि लोपे
हल्ङ्यादिलोपे रपरे गुणे च,
भष्भावजश्त्वे च रुरेफलोपे
ढ्रलोपदीर्घेण भवेदजर्घाः.

एवञ्च परिवर्त्तनपराङ्मुखैर्वैयाकरणैः शास्त्रार्थमात्रफलेयं सुरसरस्वती कृता. क्लिष्टप्रयोगैः विद्यावलेपास्तु कामं प्रदर्श्यन्ते, न वरमाधुनिकविज्ञानोपादेयशब्दा नैव व्युत्पाद्यन्ते. अत्र पूर्वकविभिरनुपात्ताः शब्दा अप्रयुक्तत्वदोषभिया न प्रयुज्येरन्निति महती विडम्बना.

नैतच्छेमुषीमतां परोक्षं यद् वयं वैज्ञानिकशब्देभ्यो म्लेच्छभाषाया ललाटदर्शिनः स्मः. न च हिन्दीगतिस्तत्र. इयं पुनः संस्कृतभाषा सुष्ठु क्षमा. यद्यशेषशास्त्रतत्त्वानुशीलनसंजातनिर्मलशेमुषीकाः सूरयः कारकधातुरूप-शब्दरूपलिङ्गप्रकरणेषु व्याकरणजाटिल्यं निरर्थकं द्विवचनभारञ्च दूरीकृत्यैनां सरलप्रवाहमयीमकरिष्यन् तदा लोकेऽस्याः पुनर्जागरणमभविष्यत्. यदा लक्षणग्रन्थाः शिथिलीकरिष्यन्ते, श्लेषप्रधाननलचम्पूलक्षणप्रधानभट्टिकाव्य-प्रभृतयो ग्रन्थिला ग्रन्थाः केवलमार्षप्रयोगा इवादरिष्यन्ते तदा द्रागेवेयं भाषा नूतनविज्ञानराजनीतिविषयेषु प्रसरिष्यति. किन्तु न रूढिश्लेषिणो हिन्दुस्थानीया एकधा पाणिनिना संस्कारितायां भाषायां सरलीकरणं सोढुमुत्सहन्ते. म्रियेत नाम सा गच्छतु च नाम भारतीया संस्कृती रसातलम्. 'तातस्य कूपोऽयमिति ब्रुवाणाः, क्षारं जलं कापुरुषाः पिबन्ति।'[1]

अये त्रिदशभारतीपुत्राः! कोऽयं दुर्भरो व्यामोहसन्दोहः? सम्प्रति सरलया स्वव्यीहारकलया नवराष्ट्रप्रगमनमनीषया विरच्यन्तामुपादेयग्रन्थाः. आवश्यकता चेत्तर्हि अन्याभ्योऽपि संशोध्य समादीयन्तां संस्कृते प्रचलितभाषाभ्यः प्रात्यहिकजीवनोपयोगिनः शब्दाः. अवितथमाह पीयूषवर्षः-

अपि मुदमुपयान्तो वाग्विलासैः स्वकीयैः
परभणितिषु तोषं यान्ति सन्तः सुशान्ताः,
निजघनमकरन्दस्यन्दपूर्णालवालः
कलशसलिलसेकं नेहते किं रसालः?

1. विवादप्रस्तुतिः

अन्योक्ति-दंशः

साहित्यस्य सर्वोत्तमविधा व्यञ्जनामाध्यमेन परिचीयत इति सुनिश्चितम्. किमपि कथनीयं भवेत्-अभिधया साक्षात्कथने तस्य मूल्यहानिर्भवति, व्यञ्जनया पुनः सहस्रगुणाधिका शाश्वती प्रभावसम्पत् सद्यः सञ्जायते. जानन्ति भवन्तः-अभिज्ञानशाकुन्तले दुष्यन्तः कथं शापमूर्च्छितो बभूव. शकुन्तला आगच्छति, मुखं प्रदर्शयति, करुणं रोदिति-किन्तु जडीभूतो दुष्यन्तो नैव तस्याः स्मरति. अथ तस्य मानसं हंसपदिकया गीयमाना एका व्यञ्जनामयी अन्योक्तिर्मथ्नाति-

अभिनवमधुलोलुपो भवाँस्तथा परिचुम्ब्य चूतमञ्जरीम्
कमलवसतिमात्रनिर्वृतो मधुकर विस्मृतोऽस्येनां कथम्?

अरे नवमधुलोभिन्! तया रसालमञ्जर्या सह उन्मुक्ततरं विहृत्य, क्षुद्रकमलिनीनां मध्ये निवसन्-कथं खलु तां विस्मृतवानसि? एषा गीतिर्दुष्यन्तस्य अवचेतनमस्तिष्कं सद्य आन्दोलितवती.

ननु एतादृशमेव प्रसङ्गान्तरं पुनरुदाजिहीर्षामि- श्रीमद्भागवतस्य दशमस्कन्धे भ्रमरगीतप्रसङ्गःसर्वेषां विदितः स्यात्. अत्र खलु मूर्त्तिमानिव करुणविप्रलम्भो जडहृदयेऽपि संवेदनां सञ्चारयति. काचन अनुरागवञ्चिता गोपी उद्धवसन्निधौ भ्रमरमुद्दिश्य गायति-

मधुप कितवबन्धो मा स्पृशाङ्घ्रिं सपत्न्याः
कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः,
वहतु मधुपतिस्तन्मानिनीनां प्रसादं
यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदृक्.

एनामन्योक्तिं श्रुत्वा उद्धवस्तथा प्रभावितो यदसौ पराजित इव पामरगोपीनां वन्दनं कृत्वा विक्षिप्त इव परावृत्तः.

इह पशुपक्षिलतादिभिः सह नैवोपमा दीयते, न च अध्यारोपः क्रियते, न वा भ्रमसन्देहौ भवतः-व्यङ्ग्यार्थमाध्यमेन साधारणीकरणम् एव तरसा सम्पाद्यते. सम्बन्धिता व्यक्तिश्च तथा प्रभाविता भवति यथा न कयाचिदु-पदेशरीत्या सम्भवेत्.

स्वीकृतनववृत्तिः कशोरवयसि वर्तमानो बाणभट्टो गजपालस्य तर्जनोक्त्या शिक्षां गृहीतवान्-

करिकलभ विमुञ्च लोलतां चर विनयव्रतमानताननः
मृगपतिनखकोटिभङ्गुरो गुरुरुपरि क्षमते न तेऽङ्कुशः.

रे हस्तिबालक! सम्प्रति अरण्यसुलभां चञ्चलतां परित्यज. नो चेत् सिंहनखकुटिलो लौहाङ्कुशो मारं मारं विनयशिक्षां प्रदास्यति. अन्योक्तिरेषा पताकास्थानकवद् बाणभट्टं सङ्केतितवती-वत्स! राजकीयसेवायाम् उच्छृङ्खलतायै न कश्चिदवकाशो भवति.

संस्कृतनाटकेषु भाविघटनायाः सङ्केतः प्रायोऽन्योक्तिमाध्यमेन क्रियते-इति विवेचितम् आचार्यधनञ्जयेन. तेन लिखितं यत् पताकास्थानकं द्विप्रकारं भवति-यत्र तुल्यवृत्तं तत्र अन्योक्तिः, यत्र च तुल्यविशेषणं तत्र समासोक्तिः प्रयुज्यते. अत्र विचारणीयं यत् काव्यशास्त्रेषु अयमेव काव्यालङ्कारः अनेक-नामभिः परिचीयते. भरतस्य मतेन एतादृशी रचना मनोरथलक्षणं साहित्यसौन्दर्यं प्रकटयति. अनन्तरवर्त्तिन आलङ्कारिका अप्रस्तुतप्रशंसायाः शीर्षके अन्योक्तिमपि समावेशयन्ति. अतीव आश्चर्यविषयो यत् सर्वातिशायिरचनाधुरन्धरः पण्डितराजोऽपि नामतः अप्रस्तुतप्रशंसामेव स्वीकुरुते. केवलं नवमशताब्द्या आचार्यरुद्रटोऽस्या अन्योक्तिनामकरणं विदधाति. तदनुसारतः-

असमानविशेषणमपि यत्र समानेतिवृत्तमुपमेयम्
उक्तेन गम्यते परमुपमानेनेति सान्योक्तिः.

यथा- **मुक्त्वा सलीलहंसं विकसितकमलोज्ज्वलं सरःसरसम्**
बकलुलितजलं पल्वलमभिलषसि सखे! न हंसोऽसि.

अरे पाषण्डकारिन्! बाह्यरूपतस्त्वं हंस इव प्रतिभासि. किन्तु वारं वारं विकृतगन्धं क्षुद्रजलाशयं वाञ्छसि. धिङ् मित्र! त्वं बकः प्रतीयसे.

अत्र निवेदयितुमिच्छामि यत् संस्कृतवाङ्मये विक्रमोर्वशीय-कर्पूरमञ्जरीप्रभृतयः प्रबन्धा अपि सन्ति येषु अन्योक्तिलक्षणं बहुत्र सङ्घटेत, किन्तु परम्परया शीर्षकेऽस्मिन् ते न गण्यन्ते., येषु मुक्तकेषु लोकव्यवहारदृशा प्रकृतेर्मानवीकरणं निरूप्यते त एव प्रायः अन्योक्तिसंज्ञाम् आप्नुवन्ति. एतादृशमुक्तकानां सर्वप्रथमः सङ्ग्रहो 'भल्लटशतकम्' प्राप्यते. कश्मीरजन्मा भल्लटो रुद्रटस्यैव समकालीनो बभूव. लक्ष्यतां तावत् पद्यमेकं तदीयम्-

चन्दने विषधरान् सहामहे, वस्तु सुन्दरमगुप्तिमत्कुतः
रक्षितुं वद किमात्मगौरवं, सञ्चिताः खदिर! कण्टकास्त्वया?

अर्थात् चन्दनवृक्षे सर्पाः परिवेष्टिता भवन्ति, तदुचितम्. चन्दनं सुन्दरं भवति, सुन्दरस्य रक्षा करणीया एव. किन्तु रे खदिर! त्वयि किं सौन्दर्यं वर्तते-यद् रक्षितुं कण्टकानां कवचो धारितः? अस्मिन् श्लोके मूर्खाणां वृथाडम्बरो निपुणतरम् आक्षेपितः.

भल्लटानन्तरं प्रकाशवर्षः, मुञ्जः, भोजदेवः, विज्जका, वल्लभदेवः, अन्योक्तिमुक्तालताया रचयिता शम्भुमिश्रः, पण्डितराजो जगन्नाथः वीरेश्वरश्चेति बहवः सुरभारतीकवयो बभूवुः यैरस्या विधायाः सम्यग् आश्रयणं कृतम्. सुरगवीसमुन्नयनव्रती मुञ्जो दशमशताब्द्या उत्तरार्द्धे धारानरेश आसीत्. सुतरां सहजतया खग्रासमूर्यग्रहणं तेन वर्णितमस्ति-

यत्पादाः शिरसा न केन विधृताः पृथ्वीभृतां मध्यत-
स्तस्मिन् भास्वति राहुणा कवलिते लोकत्रयीचक्षुषि,
खद्यौतैः स्फुरितं तमोभिरुदितं ताराभिरुज्जृम्भितं
घूकैरुत्थितमाः किमत्र करवै किं केन नो चेष्टितम्.

कीदृशी ग्रहणविचित्रता भवति. अन्धकारः प्रसरति, खद्योताः प्रकाशन्ते जाग्रतितरामुलूकपक्षिणश्च. तेजस्विशासकस्य अभावे कथं प्रजासु विषमाचरणं वर्द्धते-इति विशदितं खलु मुञ्जदेवस्य अन्योक्त्या.

एवं भामिनीविलासात् एकम् उदाहरणं पुरस्कृत्य पण्डितराजेन सार्धं वः परिचयं कारयितुमिच्छामि. कविरयमेकं मदमत्तहस्तिनं परामृशति-मित्र!

अस्मिन् अरण्यस्थले त्वं क्षणमपि न तिष्ठ, यतः त्वद्भ्रान्त्या एकं प्रस्तरं विदार्य नातिदूरे विश्राम्यति सिंहः-

स्थितिं नो रे दध्याः क्षणमपि मदान्धेक्षण सखे!
गजश्रेणीनाथ त्वमिह जटिलायां वनभुवि,
यतः कुम्भिभ्रान्त्या खरनखर-विद्रावित-महा-
गुरुग्रावग्रामः स्वपिति गिरिगर्भे हरिपतिः.

इयं शिखरिणी स्वराज्यलाभार्थं प्रयतमानस्य 'केसरी' पत्रस्य सम्पादयितुः बालगङ्गाधरतिलकस्य मूलमन्त्र आसीत्, यतः स आङ्ग्लशासकान् मदान्ध-हस्तिनो भारतीयपराक्रमञ्च सिंह-सदृशम् अमन्यत.

अनया रीत्या सुस्पष्टमेव भवेद्-यत्र खलु व्यङ्ग्यबाणानां वर्षाः करणीयाः, तत्रैव सज्जीभवति दिव्यास्त्रकल्पा अन्योक्तिः. इयञ्च साधु पल्लविता संस्कृतवाङ्मये सम्प्रत्यपि चिरनूतना विविधभाषाकवीनां वरेण्यरचनासु विराजते.

संस्काराणां प्रासङ्गिकता

जगति समादरपूर्वकं प्रसिद्धाया भारतीयसंस्कृतेः परिज्ञानार्थं तस्या मूलतत्त्वानां संस्काराणां ज्ञानं परमावश्यकं भवति. चिरकालादेव भारतीय-ऋषिभिः केचन मानवीय-जीवन-नियमा निर्मापिता आसन्, येषां सम्यक् पालनेन जीवनक्रमे न केवलः शारीरिको विकासः अपि तु शेमुषीनिष्ठायाः सहजसंवेदनाया आत्मनश्चापि साधीयः पल्लवनं सम्पद्यते स्म, त एव संस्काराः. धर्मशास्त्रसन्दर्भेषु संस्काराणां गणना न खल्वेकसदृशी मिलति. गौतमेन चत्वारिंशद् जिनसेनाचार्येण चाष्टोत्तरशतसङ्ख्याकाः संस्काराः परिगणिताः किन्तु मनु-विष्णु-याज्ञवल्क्यस्मृतिभिः केवलं प्रचलितचराः षोडशसंस्कारा एव निरधार्यन्त. पाठक-जिज्ञासाः पूरयितुं करोमि तेषां नामोल्लेखम्. ते सन्ति-गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनम्, जातकर्म, नामकरणम्, निष्क्रमणम्, अन्नप्राशनम्, चूडाकर्म, कर्णवेधः, उपनयनम्, वेदारम्भः , समावर्त्तनम्, विवाहः, वानप्रस्थः, संन्यासः अन्त्येष्टिश्च.

एते सर्वे प्राचीनकाले बहुविचारपूर्वकं प्रचालिता आसन्, किन्तु आधुनिकयुगे कार्लायल्प्रभृतिवैदेशिकैर्निन्दिता बहुभिश्चान्यैरन्ध- विश्वास-वन्निरूपिताः क्षीणतामुपागच्छन्. अयं परमखेदविषयो यत्क्षीणेषु संस्कारचयेषु अस्माकं संस्कृतिरपि क्षीणतामुपगच्छन्ती दृश्यते. अद्य न जाने केचन विचारकाश्चिन्तया दूयमाना वदन्ति यत्सत्यं परिश्रमं राष्ट्रप्रेमाणञ्च शीलयध्वं, परन्तेषां वचांसि परितो निष्प्रभावाणि हरितकमलिनीदलेभ्यो जलबिन्दव इव निर्गलन्ति. तर्हि नागरिकेषु पुनः संस्कारस्रोतसः सञ्जीवनाय किञ्चित् प्राग्वत् प्रारब्धव्यमस्माभिः. ते ते उपयोगिनः संस्कारा अन्ये च नवकल्पिता नागरिकनियमा लोकेषु प्रचालनीयाः.

सम्प्रति चर्चितव्येषु शीर्षकेषु प्रथमन्तावद् गर्भाधानं नाम. अस्माकं देशे सोऽयं संस्कारः स्वास्थ्यविज्ञानदृशा प्रजननशास्त्रवेदितया च सुतरां महत्त्वपूर्णोऽभूत्.

प्रजननकाले माता पिता च सत्यन्यायमर्यादाविलसितस्य परमेश्वरस्य अवश्यमेव स्मरन्ति स्म. एतेन क्षणिकनियमेन प्राचीनभारते जना: सत्यनिष्ठा न्यायपरायणा मर्यादाशालिनश्च सर्वदैव समभूवन्. वनपर्वणि महाभारतस्य कथितमेव-

अथवा जायमानस्य यच्छीलमनुजायते
श्रूयते तन्महाराज नामृतस्यापसर्पति.

महात्मगान्धिनाऽपि राष्ट्रजनकेन संस्तुतिपूर्वकं स्वीकृतमेतत्. तेन स्वकीय आत्मवृत्ते कथितम्-' अहं स्वकीयेनानुभवेन कथयेयं यदर्भकाणां शिक्षा उदरादेव मातु: प्रारभ्यते. गर्भाधानवेलायां मातु: पितुश्च शरीरमानसयोर्ये स्थिती भवतस्तयोरवश्यम्भावी प्रभावो बालके सङ्क्रामति. गर्भकाले खलु पित्रोर्या प्रकृति: यादृशौ चाप्याहारविहारौ भवत: तेषां सदसत्परिणामान् दायरूपेण लब्ध्वा सञ्जायते शिशु:; वर्तमानकाल एतस्य संस्कारस्याभावे प्रायो जना विकृतचेतसो मदान्विताश्च तादृशीरेव सन्ततीर्जनयन्तितराम्. काङ्क्षति चेन्मानवता सर्वस्मिन् उत्तराधिकारिवर्गे गुणाधानं तर्हि प्रथमसंस्कारेण नैतिकपरिचयो नितरामावश्यक: स्यात्.

द्वितीय-तृतीययो: पुंसवनसीमन्तोन्नयनसंस्कारयो: समये विविधभोज्य-नियमानां पालनं वीरसन्तते: प्राप्तये कामनाश्च करणीया आसन्. जातकर्मसंस्कारे तदानीं नाभिनालच्छेद:, मेधाकरणमन्त्रगायनं पूर्वजानाञ्च स्मरणं करणीयमासीत्. एते नियमा वर्त्तमानयुगेऽपि नावश्यका इति न कश्चित् स्वस्थबुद्धिर्मानवोऽभिदधीत. तदनन्तरञ्च पर्यायत: समायातो नामकरणनिष्क्रमणसंस्कारयोरवसरौ. भारतीया परम्परा मनुते यद् बालकस्य द्व्यक्षरं चतुरक्षरं वा नाम करणीयं बालिकायाश्च अक्षरत्रयविलसितं नाम क्रियेत. किमपि तन्नाम निन्दनीयमर्थहीनम् अपशब्दयुक्तम् अमाङ्गलिकं घृणास्पदञ्च न स्यात्. कीदृशी शोभनेयं परम्परा! अद्य भूयांस: पितर: स्वकीयशिशोर्निरर्थकं कठिनाक्षरं वा नाम कारयन्ति येन तस्य वराकस्य समग्रं व्यक्तित्वमेव निरर्थकमिव सञ्जायते...राष्ट्रस्य सर्वे नागरिका रमणीयामिधानवन्तो विलसन्तु इत्यपि को नाम नाभिलषेत्. एवञ्च निष्क्रमणसंस्कारे जन्मनश्चतुर्थे मासि नवजातशिशोरादित्यदर्शनं विहितमासीत्. वस्तुतो निष्क्रमणस्य अन्नप्राशन-चूडाकर्म-कर्णवेधसंस्काराणाञ्च स्वास्थ्यविज्ञानदृशा विशेषमहत्त्वं वर्त्तते. मासत्रयपर्यन्तं यदा कोमलत्वचो बालकस्य प्रखरसूर्यकिरण-सम्पर्करहिता

भवन्ति, तदा तदीयमायुर्वर्द्धते कर्कटादिव्रणबाधा च तनौ न भवति. इयमेव कामना निष्क्रमणसंस्कारमन्त्रेऽपि सन्निहिता वर्त्तते-

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्
पश्येम शरदः शतं जीवेम शरदः शतम्
शृणुयाम शरदःशतं प्रब्रवाम शरदः शत-
मदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्.

अन्नप्राशनञ्च जन्मनः षष्ठे अष्टमे वा मासि करणीयं, यदा नाम दन्तमुकुलानि तदीयमुखपङ्कजं दन्तुरयन्तु. चूडाकर्म जन्मनस्तृतीये वर्षे सञ्जायेत, यस्मिन् सुश्रुतस्य वैद्यशिरोमणेः सम्मत्या शिखासंरक्षणं विहितं सत् सकलं रक्त-चेतनावाहिशिराणां परिरक्षणं विदधाति. तृतीये पञ्चमे वा संवत्सरे शिशूनां कर्णवेधनियमः समभूत्. कश्चित् कुशलो भिषक् सूर्यप्रकाशे प्राकृतिकस्वेदरन्ध्रं दृष्ट्वा तदेव शनैरच्छिद्रयत्. अद्य बहवो जनाः संस्कारमेनं निरर्थकं मन्वते, किन्त्वनेन तेषामेव हानिः. सुश्रुतेन स्वकीय आयुर्वेदशास्त्रे लिखितम्- यद्अन्त्रवृद्धिरोगस्य परिहारार्थं बाल्यकाले कर्णवेधः परमावश्यको भवति-

शङ्खोपरि च कर्णान्ते त्यक्त्वा यत्नेन सेवनीम्
व्यत्यासाद्वा शिरां विध्येदन्त्रवृद्धिनिवृत्तये.

इतोऽनन्तरम् उपनयनसंज्ञकस्य दशमसंस्कारस्य अवसरः समायाति. ब्रह्मवर्चसकृते परं महत्त्वमावहति सोऽयं संस्कारः. प्राचीनभारते प्रत्येकं पिता स्वकीयपुत्रं समादाय गुरोराश्रमं समुपयाति स्म. आचार्यो वात्सल्येन बालकस्य हस्तं गृहीत्वा मन्त्रमुच्चारयति स्म-

देवस्य त्वा सवितुः प्रसवेऽश्विनो,
बाहुभ्यां पूष्णो हस्ताभ्यां हस्तं गृह्णामि.

अद्य प्राय एकाकिनो विद्यार्थिनः स्वयमेव विद्यालयं प्रयान्ति, तत्र च प्रवेशपत्रे स्वैरं संरक्षकस्य मृषाहस्ताक्षरमङ्कयन्ति. हन्त, कीदृशो विपरिणाम उपनयनसंस्कारस्य आपतितः. यथाकथञ्चित् प्रारब्धेषु शिक्षासत्रेषु वेदारम्भ-समावर्त्तनसंस्कारौ नाम साम्प्रतिकेऽपि युगे उच्चशिक्षा-दीक्षान्तसमारोह-संज्ञाभ्यां प्रचलितौ स्तः.

एवं पञ्चविंशतिवर्षात्मके वयसि सम्पन्नेषु द्वादशसामाजिकव्रतेषु योग्यतरो युवानागरिकः परिणयदायित्वमूरीकरोति स्म. विवाहस्य प्रचलनम् अद्यापि वर्त्तते सदैव च वर्त्तिष्यते. अवशिष्टा ननु वानप्रस्थसंन्यासौ अन्त्येष्टिश्च इमे त्रयः संस्काराः. एतेषु लोकोपयोगिनौ नाम वानप्रस्थसंन्यासौ सर्वस्मिन्नपि युगे प्रासङ्गिकतां कलयिष्यतः. यस्मिन् समाजे वीतरागाः स्थविरपुरुषा बहिर्निर्गत्य दलितान् शोषिताँश्च सदुपदेशैर्न समुन्नमयन्ति, नासौ समाजश्चिरं स्थायिता-माश्रयते.

विदेशिपर्यटको मेगस्थनीजः अस्माकं संस्कारपद्धतिं बहु प्राशंसत्. कथितवानसौ यद् 'भारतीयनागरिका गर्भप्राप्ति-समयतो मृत्युपर्यन्तं सुयोग्यगुरूणां सन्निकर्षे जीवनकुसुमसौरभं सञ्चिन्वन्ति:; तदिह किं नः कर्त्तव्यम्? चिरपराधीनताझञ्झया कलुषिते संस्कृतिप्रवाहे किं स्वैरं विलीयन्तामस्माकं व्यक्तित्वानि? मा तावत्, स्वतन्त्रभारते कलया संशोधिता लोकपरिष्कारहेतवः संस्काराः पुनरपि सर्वतः प्रवर्त्येरन्.

शरत्सुषमा

आश्विनमासे कमनीयकामिनीव सुपुष्पितकासशाटिकाशोभिनी लसन्नी-रजास्या कलहंसकलकूजितकिङ्किणीनिक्वाणमुखरा परिणतशालिललितगौरगात्री प्रिया शरदागच्छति. कार्त्तिकपर्यन्तमवतिष्ठते सा. पुमांसस्तु शरदं स्निह्यन्ति एव, पम्फुल्ल्यमानफुल्लानां मरन्दवृन्दं चोचुम्ब्यमाना चङ्क्रमणकारिणी चञ्चरीकपङ्क्तिरपि किञ्चित् कलगुञ्जनैः शरत्प्रशंसां प्रस्तौति. अथ च दुर्दिनदुःखभोगभागपि समग्रो भुवनाभोगः शरदः समागमे भूयोऽपि भूयिष्ठान् उत्सवान् नैर्मल्यजुषा चेतसा समुपस्थापयति. कादम्बिनीकदम्बककरम्बित-वियतो धीरध्वनद्वारिधरधारिण्यः चञ्चच्चपलाचाकचक्य- चकिती कृतावलोचकलोक- कुललोचननिचयाः सलिलसीकरासारविसृजश्च वर्षा एतर्ह्यपक्रामन्ति. शम्पा काशनान्मिथस्सञ्चालितपक्षतयः कह्वा वियदुत्पतनाद् हंसवाक्छ्रवणेनाप्यायितकामा नीलकण्ठाश्च नर्तनादधुना विरमन्ति. चन्द्रिकया यामिनी इक्षुगन्धाभिर्धरा कुमुद्वतीभिराधारा हंसयुग्मकैस्तडागाः पुष्पभारविनतैः सप्तच्छदैर्वनान्ता अतिमुक्तकव्रततितिभिरुपवनप्रदेशाश्चातिमात्रं धवलिता भ्राजन्ते. प्रातःकाले सरित्पानीयेषु परागः प्रसृतः समवलोक्यते. तीरे च तस्य वीचिमालां पश्यन् कुररसारसनिकुरम्बो नृत्यति, मदकलश्चक्राङ्गः कूजति, रथाङ्ग इतस्ततः परिभ्रमति हारीलनामा विहङ्गश्च स्फारयति स्वचञ्च्वा सलिलम्. सुतरां रक्तं कचनाराख्यं कुसुमं मनोमोहकं भवति. कासारेषु शुष्यत्पङ्कपरिवेषं पयः स्वच्छतरं भवति.

कणिशभारप्रह्वीभूतानि शालिक्षेत्राणि, नन्दितेन्दिन्दिराणा- मिन्दीवराणां मरन्दसम्भारभारभङ्गुराणि नीलनालानि, पत्रस्थहिमविप्रुषो लतास्थं कुसुमकलापञ्च नर्त्तयमानः किञ्चिदधिकं सौरभ्यभरभरितः स्वास्थ्य-वर्धको मातरिश्वा जडिम्ना जडीभूत इव मन्दमन्दं कल्ये प्रचलति. प्रायशः श्यामासुमनसः कुवलयानि चास्मिन् काले कमनीयकान्ताकर्णयोः कर्णपूरीकृतानि विलोक्यन्ते.

नक्षत्रनिचयखचितं चन्द्रिकाचीरं धारयन्ती प्रोद्घाटयन्ती च स्वकीयं विधुवदन-मनुदिनं काचन निर्मला निण्नारी वर्द्धते. नक्तं हि निर्दोषं नभः सुधाविसरं वर्षति दिवा चोद्धूयमानधवलबलाहकशकलकृतचामरं नृपायते तत्. नृत्यन्मत्स्यरशनाः उपकण्ठस्थहंसहारहारिण्यो विशदोत्पुलिननितम्बाश्च नद्योऽधुना प्रमदा इव मन्दमन्दमुपयान्ति. तटिनीनामसितं वारि वासरेऽपि कमलकुलपरिवृतेन हंसेन तारकवलयवलयितचन्द्रचर्चितनभ इवाभाति.

प्रावृट्पयोदुर्दिनत्रस्तैः प्राणिभिः पुनरपि शरदि सर्वतो हट्टेष्वटवीषु च सहर्षमटाट्याऽनुष्ठीयते. तथा हि-पर्वतेभ्यो ग्राम्यपशव आश्विनमासे प्रतिनिवर्त्तन्ते. सरस्सु च प्रावृट्प्रारम्भे मानसनिवासाय बद्धकक्षाः कृतप्रणरक्षा जलदुग्ध-भेदविधिदक्षाः शरदिन्दुसदृक्षा वलक्षपक्षा हंसपक्षिणः सर्वत्र विवक्षाकुलाः शरदि चक्षुःप्राघुणकीक्रियन्ते. नारीनयनोपमानेन खञ्जरीटपतत्रिणाऽपि साम्प्रतं प्रस्रियते. जनवेश्मानि सोत्साहं प्रमृष्टानि विशदसुधालेपलिप्तानि च नयनातिथीक्रियन्ते. फलतो हि तिरोहितपङ्ककलङ्का अतिवाहितभेककुलकलकलातङ्का गतपयोदपविपातशङ्का प्रमुदितरङ्का निर्मलमृगाङ्का च मेदिनी लङ्केव सुवर्णवर्णमात्मानं विवृणोति.

शरदः शोभा दशहराकोजागरीदीपमालिकादिभिः पर्वभिरतिशय्यते. कस्य हालिकस्य पार्थिवस्य वा न विदितो दशहरादुर्गापूजाविजयोत्सव-सरस्वतीपूजेत्यादिनामभिः परिचितचर आश्विनशुक्लपक्षदशम्याः समुत्सवः. सर्वत्र देशे विदेशेऽपि च दशदिनपर्यन्तं दशवदनलक्ष्मीविभ्रमविरामस्य दलदिन्दीवरदलाभिरामस्य लोकश्रमविरामारामस्य रामस्य चरितजातं रामलीलानाट्यगोष्ठीभिरनुष्ठीयते. दशहरादिवसे च पुरुषाणां नारीणामर्भकाणां वा प्रमोदपारावारपारमेव न पार्यतेऽवाप्तुम्. सर्वे विपद्विरामं रामं स्मारं स्मारं भक्त्या च नामं नाममुत्तमाङ्गानि द्विषतां पराजयाय सुहृदां च स्वदेशवासिनां विजयसम्भूतये कामयमाना दरीदृश्यन्ते, यत्-

पितृजनहृतदायो राक्षत्रस्तजायो-
ऽजयदतिकृशकायो योऽन्वयः कोऽपि मायोः,
दशमुखमथ वायोरात्मजौजःसहायो
दिशतु स जयरायो मुक्तिकर्त्ता जटायोः.

वङ्गराज्येऽनूनोत्साहैः वङ्गीयैरस्मिन् पर्वणि दुर्गासरस्वत्योः सपर्यासमुदाचारः सम्पाद्यते. कोजागरीपर्वणि मङ्गलकामनानिचितचेतसो नार्यः पुंसां मूर्धसु तमीमुखे ज्वलन्मृत्पात्रदीपिका मण्डलयन्त्यो दुःखदैन्योद्वेगवृन्दानां दाहं विदधति. रात्रौ च विविधं नृत्यन्तीनां दीपिका निर्वापयन्तीनां वल्गु फल्गु वा जल्पन्तीनां लोललीलाभिर्ललन्तीनामुत्तङ्गसौधोत्सङ्गसङ्गीत-सङ्गिनी-नामङ्गनानाममङ्गभङ्गीः विलोकं विलोकं पुरुषसमुदायोपि मोमुद्यमानमानसः साकममूभिरलं जागर्त्ति. श्रिया मध्यनिशि जागर्त्तिजुषि पुंसि निरुपमधियो धनस्य चाधानं विधीयत इति सर्वोऽपि भारते लब्धजनिर्जनो जानात्येव. अस्मिन्नेवर्तौ कार्त्तिकमासस्यामावस्यायामसौ दीपालिसमारोहोऽपि समोदं सम्यक् सम्पाद्यते यस्मिन् सर्वत्र सर्पिःपूरितानां प्रदीपानां समुज्ज्वलः प्रकाश आकाशस्थनक्षत्रनिचयज्योतींषि तिरस्करोति. प्रतिनगराङ्गणं प्रत्यापणं प्रतिपक्वणमपि च प्रदीपपुञ्जानां प्रभा विभासतेतमाम्. जनमनःसमुल्लासनाय पर्वप्राचुर्यचणे शरदृतौ यमद्वितीयादेवोत्थानीप्रभृतयस्तिथयोऽपि सुतरां राजन्तेतराम्. यमद्वितीयायां समस्ताः स्नेहसाराः स्वसारः स्वसहोदराणां प्रेम्णा मिष्टान्नवितरणं प्रकुर्वते. देवोत्थान्यामथ शेषशयनीये चातुर्मास्यशायी भगवान् शार्ङ्गपाणिः स्वापं विसृज्य भूयोऽपि भुवनाभोगभरणभारं बिभर्ति. एषैव एकादशी कविकुलकमलहेलिकल्पस्य कालिदासस्य कल्पिता प्रसूतितिथिः. तिथावस्यामनेके गीर्वाणवाणीपरिचरणपरायणा धरणीगीर्वाणा उत्सवरणरणकाग्रे कणमिवेतरकार्य-कदम्बकं गणयित्वा कविकुलगुरोर्जयन्तीं तन्वन्ति.

मासद्वयात्यये व्यतीताऽपि शरच्छटा सुभाषितस्मृतिरिव वा मधुरचिन्ताविचितिरिव वा लोलललनाललामलोचनयुगलकृतललितारालदीलेव वा हृदये लग्ना सती न वर्षपर्यन्तं समपक्रामति. अतएव भारतस्य रत्नभूताः प्रत्ना महर्षयो जीवेम शरदः शतं, पश्येम शरदः शतं, शृणुयाम शरदः शतं, प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं, भूयश्च शरदः शतादित्यादिभिः शुभाशंसासूक्तिसंदोहैः सकलमेव संवत्सरं शरन्नाम्ना समाम्नासिषुः.

ऋतूनां कुसुमाकरः

वसन्तु सौरभ्यकलाः समुच्छलाः
कथं हृदः पुष्परुचा मलिम्लुचाः,
पुरे वने वाऽपि च वापिकाजिरे
विराजतां चेन्न वसन्तमाधुरी.

विरहजडिम्ना जडीभूता धरित्री यदा समशैत्यतापकरं सुखकरं स्वपत्युः वसन्तस्य हस्तस्पर्शं प्राप्नोति, सा अतीव प्रसन्ना भवति. स्वां विकसित-कुसुमरम्यां तनुं विविधवर्णाभिः अभिनवकिसलयशाटीभिः अलङ्करोति. असावनयोर्मेलनकालो मधुमाधवमासाभ्यां प्रमितो मधुसीकरासारवर्षकत्वान्मधुः अतिसुरभिकोमलमलयमारुतप्रचारितया सुरभिः बहुलप्रमोदामोदं राजमानत्वाद् वसन्त इति चाभिधीयते.

एतस्मिन् मोदमये काले प्रकृतेर्जीवलोकस्य च वार्षिकोत्सव इव सम्पद्यते. सरांसि प्रोत्फुल्लकुमुदकुवलयकह्लाराणि भवन्ति. सर्वदा सलिलशीकरशिशिरो घ्राणतर्पणो मन्दश्च वायुर्वाति. अकठोर-कलिकाकलापा वर्षन्मधुधाराश्च परभृतप्रियाः सहकारतरवो दृश्यन्ते. क्षेत्राणि क्वचित् अतसीपुष्पश्यामलानि क्वापि विजृम्भमाणनवहरेणुदलहरितानि क्वचित् सर्षपकुसुमपीतानि क्वापि प्रोद्भिद्यमानहरितयवाङ्कुरमनोहराणि च अभिनवसस्यानि दरीदृश्यन्ते.

वनेषु योषितामास्यमद्यसेकविकसिता बकुलवृक्षा भ्रमरपरिक्षेपश्याम-लाश्चम्पकलता मणिनूपुरझङ्कारमुखरितरमणीचरणाघातोत्फुल्ला रक्ता-शोकतरवः, अभिनवशोणितपल्लवाः पलाशाश्च स्थाने स्थाने नयनासेचनका भवन्ति. आकाशो विमलो धरा च अविरलप्रसूनरजोधवलिता भवति.

मरन्दमदविह्वलषट्पदसमूहसंवाह्यमाना लता दोलायमाना भवन्ति. लताभिः सर्वदा मदनशरा इव कुसुमानि मन्मथवशीकरणचूर्णा इव पुष्परेणवः

प्रक्षिप्यन्ते. अतो हि वसन्ते कामिनः उत्कटोत्कलिकाऽऽकुला वियोगिनश्च क्षामक्षामा म्लानानना उत्सृष्टसकलव्यापारा मृतप्राया इव संजायन्ते. पन्थानो दिवा तु गृहाभिमुखैः प्रोषितैः कामिभिःसङ्कुलाः, दोषा पुनरनङ्गरागविडम्बिताभि-सारिकासार्थसङ्कीर्णा भवन्ति.

निखिलः प्राणिसमुदायस्त्यक्तवैरभावः सन् वसन्ततौ मुदा परस्परं मिलति. सर्व उद्धूलितपिष्टातकचूर्णा धृतधौतकौशेयाः प्रसाधिताश्च नरा अन्योन्यं रञ्जयन्तो वैरविस्मरणं कुर्वन्ति. आवासान् निकषा पर्यस्तानि तृणकक्षगुल्मादीनि वस्तूनि वसन्तारम्भात् प्रागेव होलिकायां दह्यन्ते. प्रवृत्त एव सकलजीव-लोकानन्ददायिनि वसन्ते सर्वे सोत्साहा भवन्ति. तथा हि वसन्तपञ्चम्यां बहवः सन्निकटतीर्थेषु मेलापकं कुर्वन्ति. राजकीयव्यक्तिगतोपस्थानारब्धा वसन्तोत्सवाः प्रारभ्यन्ते. प्रहर्षकारिणि प्रथमाम्रमञ्जरीदर्शने युवत्यः पञ्चेषवेऽर्घ्योदकान्युप-कल्पयन्ति. स्थाने स्थाने तरङ्गायमाणकौशेयकर्पटा अनङ्गध्वजा उच्छ्राप्यन्ते. विपुलजनसमुदायानुगम्यमाना मनोभवगजाः प्रचरन्ति. मृदुमसृणपल्लवलीयमाने मधुमत्ते पिके पञ्चमाञ्चितां वाचमुच्चारयत्येव बालानां मिष्टान्नसाक्षिको वसन्तसंसर्गो भवति.

एवमेष मदनसखो वसन्तो यद् ऋतुराज इति कथ्यते तदन्वर्थमेव. एतस्य एव समृद्धीः दर्शं दर्शं पार्थसारथ्यजिष्णुः विष्णुरप्युदितवान्-

अहम् 'ऋतूनां कुसुमाकरः' अस्मि.

सत्सङ्गतिः

सतां सङ्गो भङ्गो दुरितकुसृतेः कीलितमतेः
प्रबोधो रोधात्मा व्यसनकुल-तन्द्राकुलदृशः,
समुद्योगो योगोल्लसित-सितचारित्र्यमहितो
नरं सद्यः कुर्यादपि जगति नारायणसमम्.

इह विपरिणतिवति जगति जातमात्रो मर्त्यः निश्शेषतोऽज्ञानावृतचेता भवति. कालान्तरे यादृशः सङ्गोऽनेन अवाप्यते, तादृश एवास्य मनसि सङ्कल्पः, व्यवहारे पाटवापाटवे, चेतसि च बुद्धिः समुज्जृम्भते. यदि प्रशस्यमतिभिः अवदातचर्यैः सकलसद्गुणनिधानैः पुरुषप्रवरैस्सङ्गतिर्बोभवीति तदा सकृन्नष्टोऽपि पुमानधिगच्छति द्रागेवोत्तमचरित्रवैचक्षण्ये. सुरभारत्या आदिकविर्वाल्मीकिः ब्राह्मणोऽपि सन् स्वजीवनस्य प्रथमार्द्धे वन्यव्याधकिरातादीनां सङ्गवशादतीव पापीयान्बभूव. किन्तु पश्चाद्धि ऋषिभिः साकं स्वल्पसङ्गमेनैव यादृशमुच्छ्रायमशिश्रियत् तत्र कोऽनभिज्ञः स्यात्. तथा हि बभाण भगवान् भर्तृहरिः-

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किन्न करोति पुंसाम्.

कुसङ्गत्या हि नरा अयशोभाजनानि दुर्गुणनिधानानि च भवन्ति. अचिरेणैव ते व्यसनशतशरव्यतां प्रयान्ति. पवनः परागवाही रथ्यासु वहन् रजस्वलो भवति. आभाणकोऽप्येष वर्त्तते-

असतां सङ्गदोषेण साधवो यान्ति विक्रियाम्
दुर्योधनप्रसङ्गेन भीष्मो गोहरणे गतः..

अत्र केचिदहम्मन्या मन्येरन् यत् खलाः सत्सङ्गत्या कामं साधवो भवन्तु, सन्तो न पुनः खलसङ्गमात्खलत्वमुपेयिवांसो भवन्ति. यथा– 'आमोदं कुसुमभवं मृदेव धत्ते, मृद्गन्धं न हि कुसुमानि धारयन्ति'. यथा वा–'न त्यजन्ति रुतं मञ्जु पिका वायससङ्गमात्'.

परन्तु नैष नयः. सङ्गतिप्रभावः सुतरां दुर्निवारो भवति. सन्तप्तायसि संस्थितं पयो नान्तरीयकत्वेन प्रणष्टं भवति. एवमेवाधमसङ्गतोऽवश्यम्भावी प्रणाश इति दृढं प्रतीमः. मध्यमसङ्गेन यदि न गुणगणालयो भवति पुरुषः, तदापि स बाह्याकारगुणवशात् साधुत्वमुपैति–यथा नलिनीपत्रस्थितो वारिविन्दुः मुक्ताकारं तु लभत एव काचो वा यथा काञ्चनसंसर्गान्मारकतीं द्युतिं धत्ते. भूयश्च यथा स्वातौ मध्येसागरं शुक्तिकुक्षिपतिता वारिकणिका मौक्तिकं भवति तथैव लोकेऽपि सम्पादितसुकृतसन्दोहानां सुमेधसां सम्पर्कवशादनाया–समेवागच्छन्ति सद्गुणकदम्बकानि. दौर्जनी सङ्गतिर्यदा न दुर्जनीकरोति तदापि लोकशङ्कासमुद्भूत्यै अलं भवति. शौण्डिकीहस्ते पयोऽपि वारुणीत्यभिधीयते. अपि च दशाननोऽ हरत्सीतां बन्धं प्राप्तो महोदधिः. हितोपदेशकारा अपि आहुः–

हीयते हि मतिस्तात हीनैस्सह समागमात्
समैश्च समतामेति विशिष्टैश्च विशिष्टताम्..

अतएव सत्सङ्गतिमहिमा पूर्वपुरुषैरुपगीतः. इह हि नानाविधसुखवैभव–विकासचिन्तासन्तानसन्दानिते विषमे वैरिञ्चप्रपञ्चे न जाने केचन सन्तः सीदन्ति असन्तश्च नन्दन्ति. अनेके प्रतिभाजुषोऽपि पुमांसः सत्सङ्गाभावे वन्यकुसुमानीव अनादृतमरन्दसम्पदः शीर्यन्त इति न परोक्षं प्रेक्षावताम्. सत्संगत्या पुनस्तेषां योग्यः समुल्लासः, समुचितः समादरः साधिष्ठा च प्रतिष्ठा भवति. कस्यैतिह्यविशारदस्य शेमुषीमतो न विदिता चन्द्रगुप्तमौर्यस्योन्नतिः. पूर्वम् अरण्यानीषु गाश्चारयन्नपि चाणक्यस्य नीतिमतः साहाय्येनैष सकलमपि नन्दराज्यञ्जिगाय, दक्षिणभारते द्रविडान् पारेभारतसीमानञ्च दुर्मदान् यवनान् निशातासिधारासलिलप्रक्षालितमदानकरोत् प्रततान च निखिलेऽपि लोके कीर्त्तिप्रतानम्. फलतो ह्यसौ भारतवर्षे चक्रवर्त्तित्वमवापेत्यत्र कः सुधीर्भारते लब्धजनिर्जनः सन्दिहीत! सा हि पुण्यसन्दोहसम्भाविता धन्या वेला भवति यस्यां सद्भिः स्वल्पोऽपि सम्पर्को भवति. एकेन चिरन्तनोदन्तेनैवमनुश्रूयते यत् पुरा

वशिष्ठविश्वामित्रयोः संघर्षे, सहस्रकोटिवार्षिकमपि तपःफलं स्वल्पक्षण-कृतसत्सङ्गफलादवरमभूत्. अतएव तूत्तररामचरितकाराः कथयन्ति-

'सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति.'

सकलशास्त्रसन्दोहाचार्यचर्याचणैः लोकोत्तरप्रतिभानवद्भिः विद्वद्भिर-स्मत्पूर्वपुरुषैः सत्सङ्गतेर्भूयान् महिमा उपगीतः.

'सङ्गः सतां किमु न मङ्गलमातनोति'.

इति करतलामलकीकृतसकलवेदपुराणस्य पूरितसूतकव्याशस्य व्यासस्य अपि समुज्जृम्भते सर्वतपांस्युपर्युपरि सत्सङ्गतेः श्रैष्ठ्यं प्रतिपादयन्ती श्रीमद्भागवते वाक्.

शरीरमाद्यं खलु धर्मसाधनम्

महाकवेः कालिदासस्य कुमारसम्भवे महाकाव्ये हिमालयपुत्री देवी पार्वती पतिरूपेण भगवन्तं शिवं प्राप्तुं विकट-तपस्याः कुर्वती वर्णिता. सा हि कन्या सुकुमारतनुरपि मौञ्जीं मेखलां बिभ्रती वल्कलधारिणी, शिरसि जटाजूटं विनिबद्ध्य तथा तपः करोति यथा-

कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम्
दिदृक्षवस्तामृषयोऽभ्युपागमन् न धर्मवृद्धेषु वयः समीक्ष्यते.

जगतः सर्वेऽपि तपस्विनः ऋषयो महर्षयश्च आन्दोलिताः पार्वतीं द्रष्टुमनसो हिमालये समवेताः, सा च तपसा तावता स्वकीयमभीष्टम् अनवाप्य भूयः परमकृच्छ्रतराणि तपांसि तप्तुमारेभे. जीवनयात्रायै विशीर्ण-वन्यपत्राण्यपि न गृह्णाना ग्रीष्मर्तौ पञ्चाग्निसेवनं करोति, वर्षासु अनिकेतवासिनी झञ्झाकुलित-वारिपूरं सहते पौषरात्रिषु चैव जलनिमग्ना नामाक्षराणि जपति. तस्या नेत्रयोरधस्तात् शनैः शनैः श्यामिका समायाता, मृणालकोमला च तनुवल्ली सुतरां दुर्बला सञ्जाता. एतस्मिन्नवसरे स्वयं शिवः प्रगल्भवाग् ब्रह्मचारिवेषं धारयित्वा तत्पुरतः समुपस्थितो बभूव-

अथाजिनाषाढधरः प्रगल्भवाग् ज्वलन्निव ब्रह्ममयेन तेजसा
विवेश कश्चिज्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रमो यथा.

असौ ब्रह्मचारी स्वागतसपर्याः स्वीकृत्य परम्परानुसारं सप्तश्लोकात्मकान् कुशलप्रश्नान् करोति. तत्र प्रथम एव कुशलप्रश्नः स्वास्थ्यविषयकः सोऽयमुद्ध्रियते. हरो ब्रह्मचारिवेषधरो जिज्ञासते-

अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते
अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनम्.

अर्थात् हे पार्वति! अनुष्ठानसहायकानि वन्यकाष्ठानि कुशादिहरित-तृणानि बहुधा स्नानोपयोगीनि निर्मलजलानि किमु ते पर्वतप्रदेशेऽस्मिन् सुलभानि? अथ च तपः साधयन्ती कच्चित् स्वकीय-शक्तिसामर्थ्ययोः सीमातिक्रमणं तु नैव कुरुषे ? शिवः अर्थान्तरन्यासमलङ्कारं प्रयुञ्जानो निवेदयति-शरीरमाद्यं खलु धर्मसाधनम् इति.

वस्तुतः सम्यग् धर्मसाधनायै प्रथमा आवश्यकता साधकस्य साधिकाया वा स्वस्थशरीरं भवति. यावत् साधिकाया व्यक्तेः शरीरे शुद्धिर्भवति तावदेव मनसि शान्तिः प्रज्ञायाञ्च ज्ञानसम्भारो विलसतः. अन्यथा यदि परिश्रमैः स्वास्थ्यहानिर्ज्यायसी सञ्जाता- तदा तपश्चरणेन को लाभः स्यात्. यदा आश्रयगृहम् अग्निशिखाभिः कवलीक्रियमाणं भवति तदा परिसरप्रदेशे कूपखननेन को लाभः स्यात्? अन्येनापि कथितं तथ्यविदा सुभाषितकृता-

यावत् स्वस्थमिदं शरीरमरुजं यावच्च दूरे जरा
यावच्चेन्द्रियशक्तिरप्रतिहता यावत् क्षयो नायुषः,
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
सन्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः?

अयं शरीरस्य स्वास्थ्यचिन्ताप्रश्नो भारतस्य आध्यात्मिक-भौतिकपरम्परयोरन्तराले सुचिरेण जाज्वल्यमानस्तिष्ठति. महाकविः कालिदास एव अन्यत्र ब्रूते-शरीरं न महत्त्वपूर्णं वस्तु. रघुवंशे महाकाव्ये यदा गोचारणपरः सम्राड् दिलीपो भयानकसिंहं आक्रान्तारं ददर्श-

स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श
अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लम्.

स्वञ्च सायकपुङ्ख एव सक्ताङ्गुलिं किमपि प्रतिकर्तुम् असमर्थम् अन्वभवत् तदा न्यवेदयत् त्रपासन्नतः कान्तवपुष्को नवायुष्को भूपतिरेकातपत्रः-

किमप्यहिंस्यस्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः
एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु.

हे सिंह! यदि माम् अहिंस्यं स्वल्पमात्रमपि मनुषे, तर्हि मामकीने यशः शरीरे उज्ज्वलकीर्तिमय-विग्रहे दयां कुरु. एतानि मृत्तिकाशरीराणि तु नश्वराणि भवन्ति. अद्य सन्ति श्वो न भवन्ति. अतो भौतिक-शरीर- पिण्डरक्षार्थम् अनास्थावन्तो वयम्.

एतयोः कालिदासस्य द्वयोरुक्त्योः परस्परविरोध आभास्यमानोऽपि वस्तुतो मिथःपूरक एव वर्तते. तत्र शिवः पार्वतीं कथयति -शरीरं धर्मसाधनम् अत्र दिलीपोऽपि सिंहं कथयति- शरीरं न धर्मात् प्रेयो भवति. धारणात्मकः खलु धर्मो द्विविधः स्वीक्रियते-आभ्यन्तर आत्मज्ञानरूपो धर्मः-यमवलम्ब्य अन्नप्राणमनःप्रभृति-पञ्चकोषात्मकं शरीरं यमनियमासनप्राणायामादिभिः प्रगतिपदवीम् ईश्वर-सायुज्यसमुन्नतिं प्रापयन्ति योगीश्वराः. अपरश्च बाह्यो विविधनामभिः प्रचलितः समाजसंधारणायै स्वीकृतो विलसतितरां धर्मः, यत्र प्रमुखतया-

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः
धीर्विद्या क्षान्तिरक्रोधो दशकं धर्मलक्षणम्.

एतेषां सहावस्थिति-सहायकानां गुणानां कर्तव्यानां वा अपरिहार्यता निश्चीयते.

उभयथाऽपि पुरुषार्थसिद्ध्यै शरीर- स्वास्थ्यं न विभाजनरेखा तदेव आधाररेखा भवति. शरा ईर्यन्ते उद्यमाः क्रियन्ते अनेन इति शरीरम्, उद्यमवीथ्याञ्च महर्षिणा चरकेण साधु निगदितं-

धर्मार्थकाममोक्षाणाम् आरोग्यं मूलमुत्तमम्.

अर्थात् न केवलं धर्मकृते, अर्थ-काम-मोक्ष-साधनायामपि शरीर-स्वास्थ्यमेव मूलहेतुर्भवति.

अथ चार्वाकान् वर्जयित्वा समग्रयाऽपि भारतीयमनीषया शरीरस्य धर्मसाधनतैव निर्धारिता विद्यते. देहस्य भोगसाधनता अथवा भोगमय-मृगमरीचिकाऽनुसृतिः न क्वापि सूरिभिः प्रशंसिता.मा नाम संग्रही कश्चन द्वैधीभावे विषीदतु, यथाऽऽह भर्तृहरिः-

धन्यानां गिरिकन्दरेषु वसतां ज्योतिः परं ध्यायता-
मानन्दाश्रुकणान् पिबन्ति शकुना निश्शङ्कमङ्केशयाः,
अस्माकं तु मनोरथोपरचितप्रासादवापीतट-
क्रीडाकाननकेलिकौतुकजुषामायुः परं क्षीयते.

इति हेतोः शरीरबन्धः संरक्षणीय इति सन्दिशन्नपि तस्य धर्मसाधनतां नायकमुखेन मन्त्रयते कवीश्वरः कालिदासः-शरीरमाद्यं खलु धर्मसाधनम्.

महाजनो येन गतः स पन्थाः

जनेषु कोऽप्यन्यतमो महाजनः
प्रगीयते धन्यतमो महाजनः,
पथा च येन व्रजितो महाजनः
श्रितो जनस्तं भविता महाजनः.

महाभारते सरोवररक्षकं यक्षं प्रति निवेदिता सत्यव्रतधुरीणेन युधिष्ठिरेण सूक्तिरियम्-

वेदा विभिन्नाः स्मृतयो विभिन्ना, नासौ मुनिर्यस्य मतं न भिन्नम्
धर्मस्य तत्त्वं निहितं गुहायां, महाजनो येन गतः स पन्थाः.

शाश्वती जीवनदृष्टिरेषा वर्तमानकालेऽपि याथातथ्येन लोकप्रकाशं विकिरति. असारे परिवर्तिनि संसारे मत्ताङ्गनाऽपाङ्गलोलं नरजीवितं निगद्यते, यत्र जनाः स्वानुभूतिमात्रेण सर्वविधज्ञानसन्दोहमवाप्तुं न शक्नुवन्ति. ज्ञानलवाहङ्कारभाजः असंख्यकुमार्गावलम्बिनो दुर्विधाः स्वेच्छाचारिणो वा व्यक्तिगतदोषैः समाजं दूषयन्ति. अभिहितं सुभाषितावल्याम्-

आसीज्जनः कृतघ्नः, क्रियमाणघ्नश्च साम्प्रतं जातः
इति मे मनसि वितर्को, भविता लोकः कथं भविता?

पुरा केचित् कृतघ्ना आसन्, कृतं उपकारं घ्नन्ति स्म. सम्प्रति क्रियमाणघ्ना भवन्ति, उपकारसमकालमेव उपकारकं विनाशयन्ति. अथ भविष्यत्काले कीदृग्दुष्यन्मनोवृत्तिकैः अथवा करिष्यमाणघ्नैः जनैः मेदिनी मेदुरा सम्पत्स्यते? आँग्लभाषायां प्राह सूनृतं कविः-

We think our fathers fools, so wise we grow
our sons will no doubt, think us so.

अयं खलु अविच्छिन्नक्रमः. यः पूर्वमहापुरुषान् न मनुते तस्य भाविसन्ततिः तमपि न मंस्यते. यदा सर्वे इत्वरा भवन्ति तदा केन्द्रव्यवस्था शैथिल्यं कलयति. न नाभिभङ्गे ह्यरका वहन्ति. कथितं भगवता व्यासेन–

बहवो यत्र नेतारः, सर्वे पण्डितमानिनः
सर्वे महत्त्वमिच्छन्ति, तद् वृन्दमवसीदति.

प्रायो महापुरुषचरितादर्शम् अविमृश्य कपटकलेवरधूर्त्ता महत्त्वकामिनो भवन्ति. ते कर्हिचिद् वास्तविकगरिमाणं नाप्नुवन्ति. अन्योक्तिः विशदयति भट्टेन्दुराजस्य–

उदस्योच्चैः पुच्छं शिरसि निहितं जीर्णजटिलं
यदृच्छाव्यापन्नद्विपपिशितलेशाः कवलिताः,
गुहागर्ते शून्ये सुचिरमुषितं जम्बुक सखे
किमेतस्मिन् कुर्मो यदसि न गतः सिंहसमताम्.

शृगालो लाङ्गूलकम्पनेन केशप्रवर्धनेन पिशितभोजनेन गुहानिवासेन च सिंहत्वं न प्राप्नोति. लोके वस्तुतः कष्टकदम्बकसहिष्णुभ्यः कुटिल-परिस्थितिजिष्णुभ्यः परम्पराग्रजेभ्यः पूर्वजेभ्यः प्रणतिभावः सुतरामावश्यकः. भारतवर्षे त्यागमयवर्चसो वदान्ययशसो रामकृष्णबुद्धगान्धिप्रभृतीन् महामतीन् उपलक्ष्य गीतं प्रसङ्गरत्नावल्याम्–

ये दीनेषु दयालवः स्पृशति यानल्पोऽपि न श्रीमदो
व्यग्रा ये च परोपकारकरणे हृष्यन्ति ये याचिताः,
स्वस्थाः सन्ति च यौवनोन्मदमहाव्याधिप्रकोपेऽपि ये
तैः स्तम्भैरिव सुस्थिरैः किल भरक्लान्ता धरा धार्यते.

महाकविः भर्तृहरिश्च–

प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं
काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम्,
तृष्णास्रोतोविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा
सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः.

इति स्रग्धरायां साधुपदवीसमाश्रयणमेव कल्याणपरायणं निरूपयति. तपोमयजीवनं असिधाराव्रतमिव सर्वङ्कषशीलविराजितं भवति–

प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरं
त्वसन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः,
विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम्.

अद्यापि सर्वथा हृद्यनिरवद्यानि आदर्शगुणसमृद्धानि रामादीनां जीवनचरितानि चरमलक्ष्यभूतानि गीयन्ते. एषाम् अनुकरणे सर्वदा चिरप्रत्यग्रताबोध उपस्नेहयति. वस्तुतः–

गवादीनां पयोऽन्येद्युः सद्यो वा जायते दधि
क्षीरोदधेस्तु नाद्यापि, महतां विकृतिः कुतः?

अतएव रामादिवद् वर्तितव्यं न रावणादिवदिति काव्यप्रयोजनेषु व्यवहारज्ञानम् अम्लानम् अवधीयते. धैर्यवत्ताप्रभृतीनि सर्वाणि उदात्तलक्षणानि रामचरिते चरितार्थानीव लभ्यन्ते–

उदये सविता रक्तो रक्तश्चास्तमये तथा
सम्पत्तौ च विपत्तौ च महतामेकरूपता.

राघवेश्वरकृते च समुल्लिखति वाल्मीकिः–

आहूतस्याभिषेकाय विसृष्टस्य वनाय च
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः.

विवेकानन्दो दयानन्दश्च महर्षी स्वदेशम् अविद्यान्धकारदन्द्रम्यमाणं दृष्ट्वा सोढ्वापि नानाविधविभीषिका नवज्योतिः प्रसारयामासतुः. बालगङ्गा-धरतिलकरानाडे-वीरसुभाषप्रष्ठाः स्वाभिमानगरिष्ठा अविस्मरणीयजागरणशङ्खं राष्ट्रनभसि प्रदध्मुः. अनेके जनाः स्वकल्पितमहाजनत्वं विश्वनेतृत्वकृते वाञ्छन्ति. नीत्से अराजकतासमुद्भवं पृथुप्रतिमम् उदात्ततरमानवं कल्पयामास. मार्क्सः क्रान्तिसमुच्छलितं स्वार्थविरहितञ्च नैतिकपुरुषं व्यतानीत्. बुद्धख्रिष्टगान्धि-प्रभृतयो महामानवाः पापपरिहारिकां मानवदिशं मेनिरे. एते महाजना देशजातिकालबन्धनेभ्यः स्वतन्त्रा युगे चिराय जाग्रति.

अद्यत्वे ज्ञानलवदुर्विदग्धैरालोचनाजग्धैर्महापुरुषाणां चरितावलीषु शङ्कापङ्कलेपः सावलेपं क्रियते. केनिचदभिधीयते Do as Shri Ram did, do as Lord Kṛṣṇa said- कुरु रामो यथा चक्रे, कुरु कृष्णो यथावदत्. कृष्णादीनां चरितपद्धतिः मनःप्रभृतिकरणसार्थनिग्रहं योगपरिग्रहं व्याकुरुते. अत्र विवेकबुद्धिः आचारसङ्घस्य पूर्णशुद्धिः. मनीषिभिः समाम्नातं-यदस्माकं सुचरितं तदनुकरणीयम्, किन्तु वर्तमानकाले यत् किञ्चिद् दुश्चरितमिव प्रतीयते तद् वारं वारमनुक्रियते सुचरितं नैकवारमपि. वस्तुतो नवयुगाविष्कारं निर्विकारम् ऊरीकृत्य क्रमायातं पुरातनं चरितजातमपि सर्वथानुकरणीयम्. सूक्तं सूरिभिः-

तिष्ठत्येकेन पादेन चलत्येकेन पण्डितः
नापरीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत्.

प्रतिदिनं स्वचरितं महापुरुषचरितेभ्यः कलनीयं तुलनीयञ्च. इयं रामराज्यस्य सार्वजनीनसमुन्नतेश्च अनन्या सरणिः-

प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः
किन्नु मे पशुभिस्तुल्यं किन्नु सत्पुरुषैरिति.

सत्पुरुषाणां चरितनिकुरम्बं परवर्त्तिकाल आचारशास्त्रं भवति अतो दीना अक्षरहीना वा ये शास्त्राध्ययनं कर्त्तुं न पारयन्ति, तेषां महाजनलीलानुकृतिः निःश्रेयसे अलम्-

उपचरितव्याः सन्तो यद्यपि कथयन्ति नैकमुपदेशम्
यास्तेषां स्वैरकथास्ता एव भवन्ति शास्त्राणि.

वर्तमानसमाजे या प्रत्यहम् अपराधवृद्धिर्दरीदृश्यते, तस्या इदमेवाबाधं सिद्धौषधम्.

हितोपदेशं शृणुयात् कुर्वीत च यथोचितम्
विदुरोक्तमकृत्वाऽभूत् कौरवः शोकशल्यभाक्.

येन च कृतकृत्यधीमता स्वल्पमपि भोगतल्पं विहाय सदनुकरणं विधीयते, अवश्यमेवासौ उन्नतिशिखरमाश्रयते. महर्षिद्वैपायनेन साधु विशदितम्-

अनुगन्तुं सतां वर्त्म कृत्स्नं यदि न शक्यते
स्वल्पमप्यनुगन्तव्यं मार्गस्थो नावसीदति.

तेषामेव लोकनायकानां धन्यतामापद्यते जीवनं, ये शास्त्रविवादकर्दमेषु अनिर्मग्नाः सदाचारतत्त्वानि महापुरुषाणाम् अनुशीलयन्ति. अमी विवेचित-गुणदोषवंशा मानवोत्तंसा राजहंसा इव प्रशस्यन्ते-

अनेकशास्त्रं बहु वेदितव्य-
मल्पश्च कालो बहुलाश्च विघ्नाः,
यत् सारभूतं तदुपासितव्यं
हंसो यथा क्षीरमिवाम्बुमध्यात्.

भौतिकी संस्कृतिः

आध्यात्मिकी संस्कृतिः सम्प्रति भारतकृते न तथा हितकरी यथा भौतिकी भवतात्. विपश्चितां प्रत्यक्षगोचरोऽयं तावद् विषयो यदद्यत्वे नानाविध-बुद्धिवैभवविकाससन्तानसन्दानितमानवकुलसङ्कुले संसारेऽस्मदीयभारतं निम्नस्तरस्पर्शीति. एतद्दर्शं दर्शमतीव दूयामहे वयम्. इदम्प्रथमतया भारतीयैरस्माभिः स्वदेशोच्छ्रापण एव यत्नो विधेयः.

पश्यन्तु सुधियः, ब्रुवन्ति बलवैभवविरहिता जगतो निराशीभूतचेतसः कुण्ठितात्मानोऽध्यात्मवादिनो यदात्मना सह परिचयेन तादात्म्येन चात्यन्तिकी उन्नतिर्बोभवीति. न वरमेते वियति साटोपं मुष्टिप्रहारं कुर्वन्ति आहोस्वित् सलिलताडनमाचरन्ति स्नपयन्ति च भूयः पानीयेन मातरिश्वानम्. ऋग्वेदीयात् कालादारभ्येदानीन्तनं समयं यावत् प्रवर्त्तितायामजस्रज्ञानधारायामात्मा सुतरामनिश्चित एव तिष्ठति- वाचोऽप्यत्र निवर्त्तन्ते अप्राप्य मनसा सह. एवम्भूत आत्मनि निर्बन्धं विधाय केचन पण्डितम्मन्यमानाः प्रत्यक्षस्य जगतोऽसारतां प्रतिपादयन्ति.

अलं पुनरनया अधःपतनसारिण्या कान्दिशीकत्वचारिण्या राष्ट्रावनति-कारिण्या दृष्ट्या. उत्थीयतां भारतवासिभिर्बद्धपरिकरैरखिलविश्वेन सह जिगमिषुभिः समाजसुधारकैर्लोकाचारनिष्णातैः भौतिकनीतिज्ञैश्च. विरच्यन्तां प्राचीनेतिहासग्रन्थाः, सम्पाद्यन्तां भविष्यद्योजनाः, सश्रममुत्पाद्यन्तां मसृणवस्त्राणि पोषकाण्यन्नानि खनिजद्रव्याणि च आविष्क्रियन्तां विविधसौकर्यकारीणि यन्त्राणि.

मन्ये पुरांशतो हिन्दुस्थान आध्यात्मिकी संस्कृतिरवर्तत. अनया पुनरलौकिकत्वजुषा दृष्ट्या देशस्य इतिहास उपेक्षितः, शरीरपोषणञ्च अधरीकृतम्. नैतदैतिह्यविशारदानां परोक्षं यत्पश्यतामध्यात्मवादिनामग्र एव

महमूदगजनवी विपुलरत्नराशिभरितं सोमनाथमन्दिरं लुलुण्ठ. एतादृश्यां संस्कृतौ पश्चात्तु दोषाः समापतन्त्येव- यतो हि अतत्त्वज्ञा आत्मतत्त्वं मिथ्या-विश्वासाचारैरन्यथयन्ति. सर्वे न पुनस्तत्त्वज्ञातारो भवन्ति, कथमन्यथाऽकथयिष्यत् स्वयं कंसारातिः-

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्
जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन्.

एतदपि स्पष्टतरं स्याद् विषमजगन्मार्गाध्वनीनानां यत् सुदूरमप्यन्तरिक्ष उड्डीयमानेन पतत्रिणा भोज्यं भुवि एवावतीर्य प्राप्यते. प्रायशः सत्यदानत्याग-दयाऽपरिग्रहजुषोऽप्यध्यात्मवादिनः स्वार्थसाधनवेलायां दैन्यं समालम्बन्ते. किमु न विमृष्टम्-

दीनादीनमुखैः सदैव शिशुकैराकृष्टजीर्णाम्बरां
क्रोशद्भिःक्षुधितैर्निरन्नविधुरां दृष्ट्वा निजां गेहिनीम्,
याच्ञाभङ्गभयेन गद्गदगलत्त्रुट्यद्विलीनाक्षरं
को देहीति वदेन्न दग्धजठरस्यार्थे प्रभूणां पुरः.

एवञ्चाशेषशास्त्रतत्त्वानुशीलनसञ्जातनिर्मलशेमुषीका विपश्चिच्छिरोमणयो भौतिक्याः संस्कृतेरपरिहार्यत्वं निश्चिन्वन्तु. आध्यात्मिकी संस्कृतिस्तु बहुकालविचारिता प्रचलिता च सती पूर्वतोऽपि भारताजिरे स्थिता एव.

मध्यप्रदेशाः

मध्या रेखा तन्वती कालमानं
मध्याऽवस्था प्रीतिसर्वङ्कषा च ,
मध्यो लोकः सर्वलोकानुपालो
मध्येराष्ट्रं भान्ति मध्यप्रदेशाः .

प्रान्तसप्तकप्रतिवेशीया मध्यप्रदेशीया निसर्गसौन्दर्यकरम्बिता लोकबिम्बिता च निश्चयादेव राष्ट्र-समन्वयपथे पप्रथे परःशतकाव्यसंवेदिनी पुण्यमेदिनी.

नागवल्मीकविन्यासिनीयं वनी
दण्डका कण्टकाकीर्णदूर्वावनी ,
यत्र बभ्राम पद्भ्यामयोध्यापतिः
सा कथं नैव जाजायतां पावनी.

अत्र निसर्गतः-

मेकलोपत्यका मन्दिरैरङ्किता
विन्ध्यमाला विशालाद्रिशालाङ्किता ,
काऽपि सह्याचले मेनका मूर्च्छिता
यक्षपीडेव शैलेषु चित्राङ्किता.

इयं भिल्लाय उद्योग शृङ्खलिताऽपि संवहन्ती विलासपूरम्, दुर्गकेन्द्रिताऽपि नित्यं महासमुद्रविहारिणी, नारायणपुरेऽपि मधुस्फालितजनपदा, विश्रामपुरेऽपि कृष्णाङ्गार-श्रमवती, खदिरदुर्गकोणेऽपि कलयन्ती विशदकलाविश्वम्, स्वर्गजाऽपि मेघदूतप्रिया सस्पृहाऽलकायै, तमसासिक्ताऽप्यलं ज्योतीरथाङ्किता, प्रस्तरमये

सागरोत्सङ्गेऽपि वेल्लितसुवर्णपद्माकरा, चिराय विक्रमवशंवदाऽपि संज्ञयोज्जयिनी, गुप्तगोदावरीस्रोतस्यपि शिखामज्जितसर्वलोका, बालाघाटेऽपि वर्द्धमानयतिविभ्रमा, त्रिपुरीपरिसरेऽपि जाबालितपोऽनुष्ठानसाक्षिणी, खर्जूरेश्वर-वेदिकाऽपि दृष्टमरकतफला, नवधारायामपि पुराणकूप-मण्डूकलक्षणा, मन्दसौरपरिवेशेऽपि विस्फुरन्ती मृगवनशालिनी, भूपालनियन्त्रिताऽप्यहो स्वतन्त्रतामनुभवन्ती विराजते मध्यप्रदेशावनी.

मध्येऽरण्यानि हन्त! आदिवासिनां लघूनि रम्य-मृत्तिकागृहाणि मृत्तिकोपलेपितानि मृत्स्नाकच्चरवासा: श्मश्रुलुप्तरदवासा: संश्रयते कर्षक:. अनधीती दीन: सन् बहुशो न पीन: सन् ग्राम्यो विश्रब्धजन: प्रकृति जन्य-सुखराशौ तोषं जुषते जोषम्. स्वदते क्षीरं पेयं भावे सति मैरेयं वृन्तपक्व-मधुरफलं भोज्यं घृतसमुच्छलं, चेदभावबाध्यता बिल्वबदरिका भुङ्क्ते पङ्कपरिलीनमीनदर्दुरिका उपयुङ्क्ते.

नगरं भूमीदेव्या भूषावलयस्थली, ग्रामटिका निष्किणाऽवदातदेहमाधुरी. अत्र वारि निर्मलं मेदिनी सुवासिनी व्योम भाति चिक्कणं धीरमारुतो धनी. धेनूनां हम्बारव: प्रणदो दधिमन्थभव: प्रत्यहमिह मधुश्रव: स्वरबन्धो मुसलभव: पक्षिणाञ्च कलरव: श्रूयते प्रभाते. प्राणोष्मा वास्तविकी भूवास्तव्यानां भूयसां जनानां रमते ग्रामाङ्गणे. इह जातोन्मेषाणां दलविलुलितवेषाणां नृणामुत मेषाणां कृष्णरिक्थवेतालै: कूटनीतिवाचालैरतिसन्धानं बहुत्र संश्रयणं यत्र कुत्र किन्तु कर्णशष्कुलीरनारतं क्षिणोति.

अयमगस्त्य-मार्कण्डेय-वाल्मीकि-बाणसेवितमधूकवनमध्यो विन्ध्य:, इयममृतनीरा तीर्थमयशरीरा गह्वरगभीरा लोललहरीभिरुत्सङ्गतो लालितेरम्मदा नर्मदा, त इमे मुद्रित-पश्चिमाशा-समुद्रतटमाना: कलया सप्तपुटाह्वाना: सुरभिवीरुत्-कूर्दमान-कपिकुरङ्गहरय: सह्य-वैडूर्यादिगिरय:, सोऽयं प्रचुर-प्रपातशृङ्खल: सूत्रितदण्डकाञ्चल: परिचितोपत्यकाभि: संश्रितोत्कल:पावनमेकल:, असौ त्वञ्जसा कूजत्क्रौञ्चकुररसारसा मूर्त्तिमत्-कारुण्यरसा लोकमान्दी-विनोदन-मलीमसा तमसा, इमे ग्रावमूर्त्तिभिर्निपीयमान-मैरेया लोकमाधुरी-धौरेया हृष्यत्कुविन्दकर्षकबल्लवा: स्निह्यत्-पुष्पकोरकपल्लवा: समवेतनर्तक-कुशीलवा: शम्भुसात्कृतपाञ्चभौतिक-प्रतिमालवा: प्रीतमालवा:.

सर्वे स्पृहणीयमञ्जिमानं महिमानञ्च मध्यप्रदेशेभ्यः प्रदिशन्ति.

इह दोषाविष्करणं तु सूर्यास्ते लक्ष्यते न लोकचरिते, शोणधाराः शैलशिखरेभ्यः पतन्ति न क्षतनिकरेभ्यः, सिप्रा भर्तृहरितीर्थात् स्खलति न कामिनीकलेवरात्, छलिकरूपं रङ्गमञ्चे महीयते न व्यवहारे, तु-हि-न-प्रभावा वृत्तपूरणे भवन्ति न शस्यजाते, अन्त्यवर्णाधिकारे काव्यस्पर्द्धालवो विवदन्ते न नागरिकाः, मूर्च्छन्ति वीथीषु पञ्चतारोदिता जनावासा न जनताः, भवति च प्रकृतिप्रत्ययविच्छेदो व्याकरणे न राजनीतौ.

प्रदेशसन्दर्भे को नाम विस्मरेद् भुवनकीर्त्तिवल्लरीप्ररोहं कालिदास-समारोहम्, यस्मिन् समवेता गायन्ति विद्वांसः-

प्रबोधि नीलाम्बरजित्वरं महः
कदम्बशाखान्तर-लोलसञ्चरम्,
सदाऽऽविरास्तां वचनावलीषु नः
कृते सुदाम्नः श्रुतिसंहितां पठत्.

कार्तिकशुक्लानेहसि शाङ्र्गपाणिजागरामनोज्ञकं सुपर्व कामपि गरीयसीं महिमसम्पदं बिभर्ति. शुभग्रहसमूहयुते पावनमुहूर्तेऽस्मिन् प्राग् द्विसहस्राब्द्या वाग्विलासः कालिदासः सकलामेव मेदिनीमकृत काव्यदोहदिनीम्.

सम्प्रत्यपि मोदभरादुज्जयिनीप्राङ्गणे शरदि शरदि विश्वात्मा मधुमय उल्लासोऽसौ नियतं जागर्ति. यानधूमकृष्णमुखी तोरणचयपिञ्जरिता नवजननीवात्सल्यं वहति तीर्थनगरी. सा भृतकान् कृतकान् वा जीनान् पीनानथवा भाष्यकौमुदीजैत्रान् धिया कोमलच्छात्रान् प्राप्य कीदृशानपीह तर्णकान् भिन्नराष्ट्र-नामरूपवर्णकान् स्यन्दिनी पयस्विनीव जायते.

भवेत् प्रबोधोऽत्र मनागुदित्वरः
पुरोनिमीलत्-सुरवाक्प्रवृत्तये,
विलीयमानाञ्जलितोयसत्क्रियाः
पिबन्तु किन्नः पितरोऽश्रु केवलम्.

सम्प्रति प्रतिज्ञायतां यत्तां निर्गत्वरां त्वरामयवृत्त्या वृत्त्यादिलोभवर्जिता. जितानेहःपरिभाषां भाषां परिशीलयेम. क्रीडेयुरथाक्रीडे सदा चोपनिषदा सह नवलप्रोद्भासः कला अत्र सकलाः.

प्रभातं सञ्जातं प्रसरति नवालोकपटली
चतुर्दिक् स्वातन्त्र्यप्रचुरमिहिकाकर्बुरमही,
दलद्दूर्वातल्पे क्षणमिह निषण्णाः श्रमहरे
स्वराष्ट्रं स्वां भाषां स्वकमपि च कुर्वीमहि नवम्.

दूरे कुसुमकथा

विश्वस्मिंन् विदितचरी चिराय कविनिकुरम्ब-कलितक्रीडाऽवनी ललितसाहित्य-कल्पलतिका-नन्दनवनी प्रभूतवृन्दारकसरस्वतीशब्दशिल्पि-सञ्चयिनी पावन-तपोवनपरम्परा-यशोवितान-जयिनी उज्जयिनी, यस्यामेकदा शास्त्रविचारपरिषदा समं समायोजिते समकालीन-संस्कृतकविसमवाये षोडश वाणीवशीकरणपरायणाः परःशतकाव्यरचनाचणाः सहृदयवृन्दैकशरणाः सारस्वतकविचरणाः समेत्य पुनरपि महाकालपरिसर- निषीदत्कालिदास-परिषत्-प्राङ्गणे प्रसृमरविश्वालवालकेन्द्रीभूत- कीर्त्तिप्रकाशं प्रत्यक्षावभासं महाकविकालिदासम् उज्जीवयामासुः.

प्रवर्त्तमाने फाल्गुनशुक्लपक्षीय-होलाष्टके तदानीं गोधूलिवेलावलक्षिता-यामष्टम्याम् उन्मिषति कविकदम्बक-विलोकन- समुत्सुकसरस्वती-मसृणभास्वरललाटकल्पे गृहीत- चित्रदन्तुर-गवाक्षसंवले हिमांशुमण्डले सार्धसप्त-वादनवेलातः सम्प्रवृत्ता निर्व्यूढसुधर्मसम्पादनभारस्य श्रीमद्-वरदराजायङ्गारस्य वदान्यसादस्पत्येऽसौ काव्यगोष्ठी.

संयोजनगरिम्णा स्वयमेव कलित-सञ्चालनचातुरीको विश्रुतगीत-माधुरीको डॉ. भास्कराचार्यः समभ्यर्च्य सद्यो-निबन्धबन्धुरया स्रग्धरया महाकालं प्रथमतया सागर-विश्वविद्यालये वलितमनःप्रसादं विन्ध्येश्वरी-प्रसादं कविसंसत्-पुरश्चरणार्थं समाह्वयत्. श्रीमिश्रेण तथा नवलगीतद्वयी मधु-रस्वरयुता वितता, यदालिखितमिव सर्वतः सहृदय- निवहसङ्कुल-मकादेमीसभागृहं व्यराजत. तदनन्तरं हैदराबादवर्त्तिन उस्मानियाविश्व-विद्यालयादुपागतो गोष्ठीमञ्चमलञ्चकार कवितापञ्चवटी- विचरणपरायण-श्रीरामचन्द्रडुमहाभागः, येन कविसूरिणा प्रस्तुतरचनासु व्याघ्रीतनय-संवादमुदाहरन्ती निरतिशय-प्रीतिमविन्दत् सामकालिकी कविता.

तार्त्तीयीकक्रमे निजकीर्त्ति-मेदुरितनागपुरसम्मानो डॉ. श्रीधरभास्करवर्णे-कराभिधानो महाकविः स्वकीयतीर्थभारत-नाम्नः काव्यग्रन्थादनेक-रमणीयरचनाः प्रास्तावीत्. ततश्च-

हैमे पद्माकरपरिसरे खेलगामी मरालो
यङ् क्रेङ्कारङ् कलयति सकृत् कम्रकिञ्जल्ककण्ठः,
तञ्चेत् कृत्स्नं श्रवणचुलुकैरीहसे सन्निधातुं
प्रीतिङ्कुर्याः कविरथवरैः श्रीनिवासाभिधानैः.

इति सञ्चालकसमुद्घोषानन्तरमाविरासीत् कश्चन कौशेयपरिधानीयसंवृत-सिंहसंहननपरिचेयः सहज-गान्धर्वपरिपाटीखल्वाटीकृत-वारटेयः पुनरंशावतीर्ण इव कालिदासो वैशालेयः. अमुना कवितल्लजेन न केवलं प्रसृत्वरझङ्कारसारणीभिः स्वरलहरीवितानमाच्छादितम् अपि त्वञ्जसा साम्प्रतिकचिन्तासन्तानसूत्राण्यपि सहृदयकर्णशष्कुलीषु संवेशितानि-

विपत्रितेयं जीवनलतिका
केवलकुटिलकण्टकाकुलिता
दूरे कुसुमकथा.........इति.

अथ च पञ्चमः कवीनां शब्दविद्यापञ्चाननः सीताचरितप्रबन्धन-पल्लवितधामा सनातनोपनामा महाकविर्द्विवेदी डॉ. रेवाप्रसादः प्रखर-युगबोध-पूरिताभी रचनाभी रथ्याप्रदूषणदुर्भरं रणरणकजर्जरं वर्त्तमानयान्त्रिकजीवनस्तरं प्राचीकटत्. तमनुगतः समन्ततोऽपि वेषकेशयशो-राशिभिर्धवलयन् दिशामुखानि भूपाल-मन्दिर-विराजमानोऽपि सामान्य-सहृदयजनगोत्री डॉ. प्रभुदयालुरग्निहोत्री विविधसमकालीन-परिवेशव्यञ्जनावदातैः भुजङ्गप्रयातैर्विलसितुमारब्ध. यथा नाम केवलमेकः प्रदर्श्यते पुलाकः-

न याचे कलत्रं न वा चारुमित्रं
न चित्ते चरित्रं मदीयङ्कदाचित्,
इयं देहली सिद्धिपीठेश्वरी मे
कथञ्चिन्नमोवाकमङ्गीकरोतु.

एतदनन्तरं सागरविश्वविद्यालयीय-विभागाध्यक्षपदवीविशेषितप्रभः त्रिपाठी डॉ. राधावल्लभः समुत्सुकसमज्यासाम्मुख्यमयासीत्. किशोरकविरयं नवगीतविधया निर्धुन्वन् गोष्ठीकुतूहलसञ्चयं गहनाकूतसंश्रयं रचनाद्वयं श्रावितवान्. इयमासीद्दशवादनीया निशावेला यदाऽसौ जगतीजङ्घालोज्ज्वल-सहजतेजा महाकविनागार्जुनः कथमपि जर्जरतरोऽपि कम्पमान-स्वरोऽपि रसपीवरो मञ्चमारुक्षत्.

नेत्रप्राघुणकीभूतः सोऽयं भर्तृहरिः पुनः
प्रीतिप्रव्रज्ययोस्तन्वन् नव्यां नागार्जुनीयताम्.

इति सञ्चालककवचनमालिकाभिः सहृदयविसर-करतलतालिका-भिश्चाभिनन्द्यमानो मनीषी कश्मीर-हिमालय-निसर्गसौन्दर्यभव्यानि सुरभारती-काव्यानि कलया कवयाञ्चकार.

तदानीमथ समाह्लादितसमस्तकोविदवृन्दः कठिनदण्डकादिकान्तारवीथी-मिलिन्दः पीत-मैथिलमाहिषेयी-पयोनिष्यन्दः कविरानन्दो नाम तथा गरिम-गम्भीरगिरा झम्पान्दोलितो मातङ्गीदण्डकमगायद् यथा विक्रमयुगीनकाव्यगोष्ठ्यां निषीदाम इति सर्वैरपि चिराय विभ्रान्तम्.

इमं विकस्वर-निलिम्पभारती-विभ्रमनिकायं कविसमवायं केन्द्रीय-शिक्षामन्त्रालयमाध्यमेन कृत-सुरवाणी-समुद्धरणपणः परम-निरवद्य-वावदूकताचणः शर्म्मा डॉ. रामकरणः, बडौदापरिवेष्टितशोधविद्यास्वाभिमानी डॉ. अरुणोदयजानी, विश्रान्तवाराणसीकान्दिशीकताप्रवादः प्रत्यक्षीकृत-नीलकण्ठडमरुकनिर्ह्लादः पण्डितकालिकाप्रसादः, पल्लवित-रतिप्रहेलिका-कन्दलः प्रथितकीर्त्तिः श्रीवेङ्कटाचलः, एक एव संस्कृतगिरः काकुपाठी डॉ. कमलेशदत्तस्त्रिपाठी च के के न दिगङ्गना-कामिनीभुजङ्गाः साभिषङ्गमसेवन्त.

सार्धैकादश-वादनीय-वेलायां परितःप्रमोदाद् बर्हिणेषु विस्मृतवासयष्टिषु सञ्चालकोऽपि कविरूपेण वाचां प्रचारमूरीचकार.

सुवर्णकल्पवल्लरी सखे न लूयतां, कालिदासपालिता हि सा.

नितान्तकान्तकोमला, सनर्मलास्यविह्वला

कलापबन्धकुन्तला, कलामयी शकुन्तला

सुगन्धमादनी न विस्मृता विलीयतां, मेनकानिभालिता हि सा.

इतिप्रभृति लोकगीतमूर्च्छनाकरम्बितं रसविजृम्भितं प्रस्तुत्य तेन सदसस्पतये सुधासध्रीचीनां वाचामवसरस्तेने. असौ-चैकमात्र-संस्कृदैनिकप्रकाशनमतिः साक्षादिव बृहस्पतिः प्रथमन्तु समवेतसकलहृदयालुभ्यः पुष्कलानाशीराशीन् व्यतनीत् पश्चाच्च कमनीयकाव्य-कौशलकला-लीलावतीर्भारतीः स्वकीयच्छन्दोभिः सुचिरमनीनृतत्.

स्वातन्त्र्य-सूर्योदयः

नवलजलधराणां वृन्दकं व्योमसीम्नो
विकिरति मृदुमन्दां सीकरालीं समन्तात्,
सपदि विवरजालैर्भिद्यमानं धरित्र्या
हृदयमिव मनोज्ञैस्तन्तुभिर्हन्त सीव्यत्.

चिराय वार्षुके शुकोदर-मृदुहरित-दूर्वामयसमये कादम्बिनी-कदम्बक-करम्बितवियति दुर्दिनर्तौ भारतीया वयं स्वतन्त्रता-सुदिनमपश्याम कामप्रदम्.

सूर्याचन्द्रमोभ्यां प्रकाश-सन्तमोभ्याञ्च रोचते स्वातन्त्र्यम्. द्रुमविहारिकाभ्यः शुकसारिकाभ्यो बिलेशयेभ्यः पन्नगेभ्यो नगेशयेभ्यः कुरङ्गेभ्योऽपि रोचते स्वातन्त्र्यम्. परं नामीषु विधि-विडम्बनया केऽसकृत् पारवश्य-दामनीमनीयन्त. वयमपि चिरत्न-शरत्सु यावनानां गोरुण्डानाञ्च पर्यायशःपरवशा बभूविम.

सौभाग्यतः समवाप्तायां संकल्पित-रामराज्यसाम्मुखीनतायां स्वाधीनतायां व्यतीते चेयति सहस्रमुखलोकोत्सवजङ्घाले ऋतुचक्रवाले कियच्चन चेष्टितं नो गर्हणीयं, किमपि निबर्हणीयं बहु चार्हणीयं सन्तिष्ठते, मन्ये-

आभा-रतो भारतदेश एव
निर्भार-तन्तूकृत-दास्यपाशः,
प्रक्षेपयन् भा-रतये ग्रहालीं
विज्ञान-सम्भारतया विभाति.

परमद्य विकरालमुखी जगति जरीजृम्भीति पुष्कल-परमाणुजन्यास्त्र-सञ्चयबिभीषिका. सर्वे स्वातन्त्र्यपदा यावदात्मनोऽवबुध्य निजगृहवितर्दिकासु प्रतितिष्ठासन्ति, तावत्तानेकपदे हस्तिपदात्मा कश्चन जाल्मदुरभिसन्धिरिह चेष्टते निमज्जयितुम्.

जनसाधारणो रणोर्जितविद्वेषमये समये मयेदं लब्धव्यमिति मितिहीन-वैयक्तिककाङ्क्षया क्षयान्वितविपत्तीरपि तीरपिहितनेत्रकोऽत्र को विलक्षयेत् क्षयेत्. एवं सति-

मुक्तिकल्पलताकन्दः कस्य न स्मृतिगोचरः
पुण्यश्लोको वदान्यात्मा नेतृवर्योऽस्ति नेहरुः.
दुर्योधनाङ्ग्लसाम्राज्य-परीहारसमुद्धुरम्
तद्रथं वाहयामास मोहनो गान्धिसञ्ज्ञया.
निन्दनं श्वेतसत्तायाः कारायाश्चाभिनन्दनम्
चक्रे जवाहरो नित्यं त्रिरङ्गध्वज-वन्दनम्.
विदेशागतवस्त्राणां स हि दग्ध्वा कदम्बकम्
स्वीचक्रे मुदितो "खादीं" लक्ष्मणो वल्कलं यथा.
प्रधानमन्त्रिणामाद्यस्तन्त्रावापप्रवर्त्तकः
बभौ जनार्दनः साक्षात् कमलायतलोचनः.
नेहरुः क्षणशो येते जायतां हन्त! नेह रुः
प्रत्येकश्च वलद्वृन्तं विलसेद् वल्लरीपरुः.
शान्तेः स मातरिश्वाऽभूद् दीनानां हर्षवर्द्धनः
जनतायाः समाश्वासः प्रकाशपुरुषो भुवः.

सारस्वती जिजीविषा

जिजीविषयैव जनः स्थातुमीहते जगति गमनशीले, सद्मतल्पं शिश्रीषति संसारे सरणशीले. वीतश्वः-परिचये विश्वस्मिन् भावियोजनाः स विश्वसन् करोति, एकला जिजीविषैव तत्पदयोः पुरुषकार-शक्तिसम्पदं तनोति.

ज्योतिरिङ्गणस्फूर्त्ते देवि जिजीविषे! कान्दिशीकतां प्राप्तान् देव-भारतीपुत्रानङ्गुलिद्वयोल्लासित-सिचयाञ्चलवलयादवलोकयस्व. अमी पर्यायतया पराचीना निरायतयो जगति सीदन्ति, करुणं विषीदति च सा निगम-कल्पवल्लरीप्रसूः सुपर्वभारती.

परप्रत्ययनेय-बुद्धिभिः परं प्रवञ्चिता मुग्धबोधपाठ्यक्रमवीथ्या विलुञ्चिता विस्मृतजीवातुकिलकिञ्चिता जनाटव्यां हन्त ! सन्देहवाडवाञ्चिता स्वदेहल्यां निमिकुल-दुहितेव साऽद्य रोरुदीति. किमिदं ननु दिष्टविलसितं प्रश्वासानां संस्कृतेरनन्त-सद्विकासानामथवा शशशृङ्गता सनातनविश्वासानाम्?

भुवनसृमरे भौतिकयुगे कम्पोत्तर-विजिज्ञासया यामन्ये पिपठिषन्ति चन्द्रकेतु-युवकाः, याञ्च राष्ट्रभारती-मनोज्ञनादतन्त्रीमिव लालयन्ति कण्ठतः कवीन्द्र-कुशलवकाः, यस्याः प्रत्याहारः शिवडमरुव्याहारः पाणिनीयसंस्कारः पुनरत्यावश्यकः, तां तरसा बाधयितुं छद्मतो विभाषयितुं कलया वा लोपयितुं जाल्म उत्सहेत कः?

प्रसृमर-जनसन्ततिः फक्किकासंस्कृतिः क्षुद्विजृम्भाकुला दीनताशृङ्खला दूरसंवेशिनी जीविकाऽन्वेषिणी भिन्नवाणीमयं सेवमानाऽऽश्रयं क्वापि वृन्दावने पैतृके पावने सीरसङ्क्षालिका कुण्ठकुद्दालिका किञ्च सञ्जागरा धीरतावागुरा हृत्पटीस्यन्दनां प्रीतिसंवेदनामेव संश्रित्य जीवत्यहो!

जयति विबुधभारती-व्यञ्जनासाहिती प्राक्तनी मञ्जुला चेतनासंवला यन्त्रणाऽऽवेदने स्वस्तिसंवेदने किन्तु नव्याऽपि वाक् पोषणीया मनाक् साऽनिशं

वर्द्धते व्यक्तये स्पर्द्धते पर्वशोभारते स्वे गृहे भारते यान्त्रिकीजर्जरे चापि विश्वाजिरे लोकमाङ्गल्यकृत् काव्यवीथीसुहृत् संस्क्रियामूलिकाऽऽख्यायिकातूलिका साम्यविभ्राजिता नाट्यनीराजिता पुस्तकालङ्कृतिः पत्रिकाझङ्कृतिः शोध-संवित्कलैः पूरिता पाटलैः सान्द्रताऽपूर्वया राजिता दूर्वया.

इयं दूर्वा नाम वेदचतुष्टयीव चिर-संवलितपुण्या, उपनिषदिव कन्दलित-बृहदारण्या, महाभारतकथेव प्रतिपर्वोपचितरसप्रसरा, रामायण-गाथेव लवकुश-कल्पाङ्कुरा, भासभारतीव बहुल-भूमिकारम्भजयिनी, कालिदास-लेखनीव ऋतुचक्रवाल-सञ्चयिनी, बाणभट्टतूलिकेव विन्ध्याटवी-विलासिनी, भवभूतिकरुणेव दण्डकारण्यप्रवासिनी, श्रीहर्षकल्पनेव चिद्वलग्रन्थिबहुला, पण्डितराजमाधुरीव सहजानुप्राससंवला, क्षमारावकवितेव सम्प्रदायप्रभेदन-सङ्कुला वर्णेकर-साहितीव रागनिकुरम्बमञ्जुला च मन्ये परिचितचरी समेषां चक्षुष्मताम्.

अस्ति सम्प्रत्यपि शतपर्विका-सदृशी शाश्वती जिजीविषा संस्कृतभाषायाः. कति न साहस्र्यो विविधोपसर्ग-संवराणां संवत्सराणां व्यतीयुः परमूरीकृतानन्त-वैदेशिक-वाङ्नदा, सार्थवाहितशब्दरत्न-परिच्छदा, व्याकरण- वानीरदुर्मदा, सुरभारती-नर्मदा कलगीत-झाङ्कृतैरनाहतं प्रवहत्येव. आरण्यक-चेतनाऽनुरूप-रमणीयोद्देशेषु मध्यप्रदेशेष्वपि चिरन्तनकालादेव वाल्मीकि-कालिदास-भवभूति-राजशेखर- भोजराज-पद्मगुप्तादीनां विश्वसुरभि-साहित्यनिबन्धनबन्धुरा महनीयतरा सुरगवी-परम्परा विराजतेतराम्.

इह विसृत्वर- विज्ञानजाले बहुविधसङ्क्रान्तिजम्बाले वर्तमानकालेऽपि विद्यन्ते परोलक्षं कृत-साधुशब्द-साधना विहित-काव्याराधना वर्धमान-प्रबन्ध-धना बन्धुजना येषां प्रत्येकं श्वसितेषु संस्कृतमेव संवसति. केचन विलिखन्ति नवलपरम्परा-सम्भाव्यानि महाकाव्यानि, केऽपि कलयन्ति लोकलीलाऽ-नुकरणपटूनि नाटकानि, केचन प्रथयन्ति चूर्णगद्यवीथी- विजृम्भित- कमनीयार्थाः कथाः अन्ये च प्राचीन-सहस्राब्दीभ्यः शब्दब्रह्मवत् सहृदयैः कण्ठचुलुकितं साहित्य-निचयमेव सन्तर्पित-चेतसः परिशीलयन्ति.

मेघदूतसमुन्मेषः

कमनीयकाव्यकाननकेसरी कविताविलासः कालिदासः सहृदयानां हृदयव्यूहमान्दोलयन् भूयसा पूज्यमानः साहित्यजगति विजयते. यानि यानि कविवरेण्येन काव्यानि निरमायिषत,प्रतिनिधिभूतानि सम्पृक्तवागर्थसंवलितानि तानि सम्प्रत्यपि कविभिरुपजीव्यन्ते चर्व्यन्ते च यशोमरीचिकया समं चतुर-सूरिचक्रवालैः. अथ को हेतुः यत्संस्कृते पुरातनकालिदासः आङ्ग्ले पुराणः शेक्सपियरः, प्राचीनहिन्द्यां प्राग्भवः तुलसी अर्वाचीनहिन्द्याञ्च प्रथमः प्रसाद-कविरेव श्रेष्ठप्रतिनिधयो भवन्ति? मन्ये, भाषाया जीवनस्य च प्रथमयौ-वनोद्भेदसम्मदं नान्यः कश्चिदुन्मादः पराजयते. अतएव अग्रगण्या गीतिः ऋतुसंहारः, आदिमं दूतखण्डकाव्यं मेघदूतम्, आदिममहाकाव्ये कुमारसम्भव-रघुवंशे आदिप्रौढनाटकानि च शाकुन्तलपुरस्सराणि सर्वाणि कालिदासमेव कविकुलगुरुपदवीमारोपयन्ति.

यथा ऋतुषु मन्दं माकन्दमाधुरीधुरीणो वसन्तः प्रविशति तथैव कविपुङ्गवस्यापि चेतसि विरहविजृम्भामयी कापि सुकुमारमेघदूतरूपा कल्पनाकलिका समुन्मिमेष. सुविदितमेव विदुषां यद् ऋग्वेदे पणीन् प्रति सरमा सन्देशवाहिनी प्रहिता. वाल्मीकिरामाणे सीतां प्रति हनुमान्, महाभारते दमयन्तीं प्रति राजहंसः, श्रीमद्भागवते च कृष्णपार्श्वे रुक्मिणीप्रणयदूतो द्विजराड् विसृष्टः. तेषामेव सरणिः कविशिरोमणिना मेघदूतेऽनुसृता स्यात्. कतिपये पूर्वप्रभावा विशेषतः सीताहनुमद्वृत्तान्तेभ्यः अधोलिखिताः स्युः-

भासस्याभिषेकनाटके हनुमानशोकवनिकायां प्रथमसम्बोधने प्राह 'जयत्वविधवा'. मेघदूतेऽपि प्रथमसन्देशवाक्यं भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहमित्यस्ति. पुनश्च 'इत्याख्याते पवनतनये मैथिलीवोन्मुखी सा' यक्षी समपेक्षिताऽऽस्ते. कालिदासेन यक्षो जनतनयास्नानपुण्योदकेष्वेव वसतिं

कुर्वाणो वर्णितः. व्योममार्गोत्पाती मेघो हनुमत्तुल्यामेव सृतिमुरीकरोति. वाल्मीकिरामायणे पवनात्मजो विश्रान्त्यै मैनाकपर्वतमशिश्रियत् किष्किन्धा-काण्डवर्त्तिनि वार्षुके वातावरणे च- 'समुद्वहन्तः सलिलातिभारं बलाकिनो वारिधरा नदन्तः, महत्सु शृङ्गेषु महीधराणां विश्रम्य विश्रम्य पुनः प्रयान्ति.' तथैव मेघदूतेऽपि 'खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्ता'ऽस्ति मेघः. वाल्मीकिर्वक्ति 'नभो मेघैः संवृतं गिरिसन्निभैः.' कालिदासेनापि च 'अद्रेःशृङ्गं हरति पवनः किं स्विदित्युन्मुखीभिः' सिद्धाङ्गनाभिः शङ्क्यमानो वारिदः प्रादर्शि. परम्परायां लङ्काप्रवेशकाले लघुरूपमापद्यते प्राभञ्जनिः. तथैव मेघोऽपीतः प्राबोधि-'गत्वा सद्यः कलभतनुतां शीघ्रसम्पातहेतोः क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः' इति. सीतायाश्चूडामणेरभिज्ञानमिव यक्षोऽप्याशंसते 'साभिज्ञानप्रहितकुशलैस्तद्वचो-भिर्ममापि प्रातः कुन्दप्रसवशिथिलं जीवितं धारयेथाः'.

सादृश्यैरेभिर्विद्वांसो हनुमद्वृत्तान्तमेव मेघदूतोपजीव्यमाम्नासिषुः. किन्तु विदाङ्कुर्वन्तु दरकुड्मलितलोचना मनीषिणः क्व पटुकरणवन्तो हनुमदादयो दूताः क्व च धूमज्योतिःसलिलमरुतां सन्निपातो मेघः? कीदृशी भावनासीमा सुकोमलोन्मादिनो विरहरागस्य? अतो मन्ये सन्देशवाहिता वारिदस्य हनुमत्तुल्याऽभूत् किन्तु कालिदासकल्पनाङ्कुरणं वाल्मीकेः प्रसङ्गान्तरादेव स्यात्. तदितः प्रस्तूयते. उदन्वन्तमुत्तीर्य रुरोद विरही रामचन्द्रः-

शोकश्च किल कालेन गच्छता ह्यपगच्छति
मम चापश्यतः कान्तामहन्यहनि वर्द्धते.
न मे दुःखं प्रिया दूरे न मे दुःखं हृतेति वा
एतदेवानुशोचामि वयोऽस्या ह्यतिवर्त्तते.
वाहि वात यतः कान्ता तां स्पृष्ट्वा मामपि स्पृश
त्वयि मे गात्रसंस्पर्शश्चन्द्रे दृष्टिसमागमः.
कदा नु खलु मां साध्वी सीता सुरसुतोपमा
सोत्कण्ठा कण्ठमालम्ब्य मोक्ष्यत्यानन्दजं पयः?

भावश्चायमनूदितो यथाप्रसङ्गं कवीश्वरेण-

आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति.

यथा रामो वातं प्रार्थयते तथैव यक्षः पयोदं ववन्दे. मेघस्तु कामरूपः. स्वेच्छारूपधारी कामोद्दीपयितेति बुध्यतामधःपङ्क्तिध्वनिः-

सन्तप्तानां त्वमसि शरणं, तत्पयोद! प्रियायाः

सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य.

कामोद्दीपके दूतकर्मारोपः तुल्यमेव सन्देशकाव्यकर्तृभ्यां कालिदास-घटकर्पराभ्यां कृतः, तथाहि-

'मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः

कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे.'

इति मेघदूते यक्षेण, घटकर्परकाव्ये च 'निचितं खमुपेत्य नीरदैः, प्रियहीनाहृदयावनीरदैः.1', प्रोषितप्रमदयेदमुद्यते सन्देशवाक्यम् 'निर्गतोऽसि शठ! मासि माधवे, नोपयासि शयितेऽपि माधवे.21'

कालिदासस्यैव रीतिमनुसृत्य पश्चात् पञ्चाशत्प्रायसंख्याकानि दूतखण्डकाव्यानि रचितानि, येषामधिकांश-समुद्गमो जैनवङ्गरामकथासम्प्रदायेभ्यो बभूव. नेमिचन्द्रपान्थपवनादिदूतपरम्परायाम् आधुनिककविः मालवमयूरपत्रिका-सम्पादयिता जूतादूतमपि व्यररचत्. एषा स्नेहमेदुरा विरहसन्दिष्टिः संस्कृतहिन्दी-कृष्णकाव्येऽपि उद्धवसन्देश-रूपेण, भ्रमरगीतमाध्यमेन, यशोदातः पान्थसन्देशरूपेण च निबद्धा. यथा भोलानाथकविकृते पान्थदूते गोपिका काचित्- 'कृष्णं तज्जलनीलपेशलतनुं स्मृत्वाऽपतन्मूर्च्छिता. 3' तथैव रत्नाकरस्यापि हिन्दीकवेः कृष्णो राधाधम्मिल्लविधुरितं सुगन्धि कह्लारमाघ्राय मूर्छाच्छन्नो भवति.

वस्तुतोऽथ प्रकृतिप्रेमप्रतिभाविशेषादयो हि कालिदासस्य कविचक्रचक्र-वर्त्तिगुणा ये समग्रनैपुणीसंवलनया मेघदूतं मूर्ध्नि साहित्यस्य व्यदधुः. प्रकृतेः तलप्रशंसकोऽयं कवीश्वरः. न नागरी कृत्रिमता यथार्थसृष्टिसारस्यमाप्नोति इति मन्वानोऽयमभिज्ञानशकुन्तले प्राह-'दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः'. मध्येऽरण्यानि स्वैरं विजृम्भमाणा मृदुलतान्ता लतान्ता यां सौन्दर्यभरभरितां विभां बिभ्रति, न तामिमा नलप्रणालिकासिक्ताः चञ्चत्कर्त्तरीकर्त्तननियमिता नागरवाटिका- व्रततयः स्प्रष्टुमपि शक्ताः. क्व कृत्रिमधूपागुरुगन्धीनि शुष्ककुट्टिमानि क्व चाधिमेघदूतं वर्षाहेतुको दग्धारण्येषु सन्तप्तार्द्रभूमेः सद्यःसीरोत्कषणसम्भवो नासिकाप्यायी सुगन्धः-

दग्धारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम्.

सर्वातिशायिप्रतिभया कालिदास एव जानाति म्लायत्कान्ति समुदयदनङ्गानां दयनीयाङ्गनानां वैरहीम्. 'उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां, मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा' इति विरहिणीनां गुप्तमनोविज्ञानं कथं सुष्ठु प्रकटितमस्ति. शकुनसमये सर्वैः कविभिः नेत्रबाह्वोः वर्ण्यते स्फुरणं, किन्तु धन्यः सूक्ष्मदर्शी कालिदासः यस्य कामक्षीबाया यक्षपत्न्याः शकुनायिता मसृणा श्रोणी पुस्फोर-

सम्भोगान्ते मम समुचितो हस्तसंवाहनानां
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम्.

कृतार्थाः संस्कृतरसज्ञा ये 'मेघे माघे गतं वय' इति कथयन्तो मस्तिष्क-बुभुक्षायै माघकाव्यं हृत्पिपासायै च मेघदूतमनुशीलयन्ति. विश्वस्मिन्नपि निखिलेऽमेरिकाँऽऽग्लजर्मनलैटिनचीन-तिब्बतसिंहलानां साहित्यमाधुरी-मधुव्रता विद्वांसोऽनूद्य मेघदूतमास्वादयन्ति. एतामेव महाकवि-कालिदासकृतिं मोनफ्रेचमहोदयो विश्वस्य सर्वश्रेष्ठां कृतिमाह.

अर्वाचीन-कविपञ्जिका

संशयितभाषान्तरणे वर्तमानवातावरणे निखिलविश्वम्भराव्यापिन्या विविधवर्त्तनीराजि-नीराजितायाः साम्प्रतिकसुरभारतीकवितायाः दुष्करं कृत्स्नसमाकलनम्. केवलमाञ्चलिकदृशा यशस्विसारस्वतलेखनीशालिनः प्रथमं निदर्श्यन्ते येऽद्य रचनाः पल्लवयन्तोऽजस्रं काव्यान्तरिक्षे प्रकाशन्ते. तेषां नामावल्या समं वृत्तानुशासन-नियन्त्रितं प्रमुखवैशिष्ट्यसूत्रमपि सङ्केत्यते-

रेवा-रीति-मनोरमा वटुरसा वर्णेकरालङ्कृता
छन्दोज्ञानमयी नवार्थ-करणश्रीः श्रीनिवासा गुणैः,
सद्वृत्तिप्रणवाभिराज-वचना लोकम्पृणा नूतना
वक्रोक्तिस्फुरितेह भास्कररुचिः काव्याम्बरे राजते. 1

कविवर्या इमे सहृदयलोके विदितचरा अतः सङ्केतविवृतिरत्र पर्याप्नुयात्. रेवेति सनातनो महाकविर्द्विवेदी रेवाप्रसादः, वटुर्वाराणसेयः खिस्ते वटुकनाथशास्त्री, वर्णेकरः कवीश्वरः श्रीधरभास्करः, ज्ञानोपनामा साहित्यपारदृश्वाऽवस्थी बच्चूलालः, करणो दीपिकादिप्रबन्धकृद् रामकरणशर्मा, श्रीनिवासः स्वीकृत-जयदेवगीतिका-प्रथः श्रीनिवासरथः, प्रणवो मित्रदूतललामः सुरभारतीसमृद्धिकामः सुहृदिच्छारामः, अभिराजश्च वाग्वधूटी-परायत्तरागकेन्द्रः सुकविराजेन्द्र इत्यादि.

एतान् समग्रविधकाव्यकुतूहलिनोऽतिरिच्य वर्त्तन्त आधुनिकाः केचन चूर्णकजुषः कालविसङ्गतिं विषयीकृत्य काव्यवीथीं प्रथयन्तः-

नागार्जुन-कमलेशौ माधव-दाशौ प्रभात-विनयौ च
परमानन्दसमेता मुक्तकमाल्यानि कलयन्ते.2

कमलेशोऽयं मुक्तच्छन्दोवितानकृत् त्रिपाठी कमलेशदत्तः, प्रभातनामा प्रयागकविः प्रभातशास्त्री, विनयो विन्ध्येश्वरीप्रसादमिश्र उज्ज़यिनीशब्दकृत् परमानन्दश्चाप्यलीगढनिकेतनः शास्त्री परमानन्दः. मुक्तक-समानान्तरा साम्प्रतं स्तोत्रलहरीपरम्पराऽपि राष्ट्रचेतनाभिः स्नाता पुरस्सरति. तत्र-

वेलण्करो राष्ट्रियभक्तिचेताः
श्रीराधिकावल्लभ उक्तिवेत्ता,
प्रसादमूर्त्तिः खलु चण्डिकायाः
स शेवडे वाऽऽप्तवचःप्रणेता. 3

ऊह्यानि खलु परिचितचराणि कविनामानि. नैव केवला स्तोत्रसरणिः प्रागिव नवा प्रचलन्ती विलोक्यते कूटकाव्यविधा. मदीयं मृत्कूटमेतस्मिन् क्रमे न समायाति. क्व वर्त्तत इति निशाम्यताम्-

वेङ्कटाचलकूटेभ्यः प्रादुरासीत् सरस्वती
मग्नाः काशीतटे यस्यां कविताप्रशिशिक्षवः. 4

राजशेखरेण कथितं-यः परं पठितुं वेत्ति, तस्य सिद्धा सरस्वती! एतादृशा गीतिलयमाधुरीमधुव्रता बहुधा मञ्च-नभोवाणी-दूरदर्शनविश्रुताः सम्प्रति सन्ति-

हरिराम-रमाकान्तौ रुद्रदेव-जनार्दनौ
पुष्पा च नलिनी चैव कवयो लयकोविदाः. 5

एषु मुखरित-मालवमयूरो रुद्रदेवः प्रकाशितार्वाचीन-संस्कृतो निखिलराष्ट्रमञ्चझङ्कृतो रमाकान्तश्च किमपि विशिष्योल्लेखमर्हतः. संस्कृतकविसमवाया अद्यापि सज्जन्ते लोकप्रियाश्च भवन्ति, तेषु-

जानकीवल्लभो रागवर्षी रविः
कोऽपि सत्यव्रतो वृत्तराशिच्छविः,
ओम्प्रकाशोऽथवा बाबुरामो भवेत्
पद्यमालाकरो रूपदर्शी कविः. 6

अथ च-

इन्दुः कम्पितवाक् सुधाकरकविः काकुप्रसन्नाक्षरः
पीयूषोऽपि च वासुदेवसुकविः ख्यातौ स्वगीतव्रजैः,
कान्ताः केचिदुमा-रमेश-भगवद्विष्णुश्रियां सङ्गिनः
सोत्प्रासं स्वरयन्ति राष्ट्रमहिम-श्लोकावलीकाकलीम्. 7

क्वचित् पुनः परिष्कारपेशल-सुरवाक्पद्यैः-

अनुवदति जवेन प्रेमनारायणोऽसौ
शिवशरण-कवीन्द्रो लोकतन्द्रां धुनीते,
अभिनवपदयोगाद् राजते चन्द्रभानुः
प्रचलितपरिचेता रामपूर्वः किशोरः. 8

दुर्गादत्त उपाध्यायो गिरिजाशङ्करस्तथा
कृष्णो मायाप्रसादश्च कवन्ते कम्रवृत्तकैः. 9

कृष्णोऽत्र कृष्णलालः. किञ्च कतिपये-

अमरनाथ-सुराजपुरोहितौ
प्रभुदयालुरिलाकवठेकरौ,
शशिधरश्च तृणीकृतपिङ्गलां
नवलवृत्तकलां परिचिन्वते. 10

काशीरामो मुल्लपूडी रमानुगतशङ्करः
शास्त्री रामस्वरूपश्च वर्त्तन्ते कवयोऽधुना. 11

क्वापि च दरोत्तानभाषया-

हरिदत्तजगन्नाथौ शिवदत्त-परीक्षितौ
समं प्रशस्यमित्रेण मञ्जुलक्ष्मीं वितन्वते. 12

'उत्तिबिसेसो कब्बं भासा जा होइ सा होउ' इति निदर्शयते हास्यरस-प्रस्तुतिजैत्रः प्रशस्यमित्रः.

एकोऽद्य गीतसारणीं गायत्यपर: श्लाघात्मकपद्यानि रचयति कोऽपि च क्षणतरलित: प्रायोजनिकतामूरीकरोति-

कपिलः सुन्दरराजो रहसविहारी वनेश्वरो धीरः
सम्प्रति ये श्लोकन्ते तेष्वेकः सेमवालोऽपि. 13

अथ ये काव्यं विचारयितुं जानन्ति, तेऽपि सम्प्रदायत: कवय:. तादृशा: शोधशालिन: कविताप्रत्यभिज्ञानिनश्च पारेसङ्ख्यं विलसन्ति सङ्ख्यावन्त:. तेषु निदर्शनाय-

समीक्षकाः सन्तु शतं वदान्याः
परन्तु मान्यः प्रभुदत्तशर्मा,
मतिर्यदीया नवकुन्तकाभा
न जातु शूलाकुरुते शकुन्तान्. 14

एवञ्च स्वर्णयुगमिदं संस्कृतकविताया इति मन्ये सत्यमेव वक्ति मिश्रतरङ्गसङ्गमपरिष्वङ्ग-पूतान्तरोऽभिराजराजेन्द्र:.अर्वाचीनसंस्कृतकविताया: स्वरूपदृशा क्रमाञ्चितमेतत् कविनामजुष्टं वैशिष्ट्यं निरूप्य संवेदितेन हृदा निवेद्यते-

पुण्या दूर्वेव काव्याकृतिरतिरुचिरा भारती भारतीया
पूर्वं भूगोलवन्द्या खनकतनुधरैश्छागकैश्चर्विताऽभूत्,
सा भूयः प्राणशक्त्या कथमपि वलिता कोरकाग्रैर्ललन्ती
संरक्ष्या दुर्मदेभ्यः स्वगृहपिशुनतापामरेभ्यः खरेभ्यः. 15

2. गवेषणा

मेघदूतस्य मध्यप्रदेशयात्रा

भारतवर्षस्य विविधविन्यासबन्धुरां वसुन्धरां रुचिरसप्तरङ्गप्रकाशम् आकाशं च समधिकृत्य यावदुत्कण्ठितं, यत्सूक्ष्मतया ममतया च काव्यचित्र-पटलिकायामारोपितं महाकविना कालिदासेन-तावान् स्यादेव कस्यचित् कवित्वजीविनः प्रतिभावकाशः स्यादेव च कस्यापि तूलिकावैशदी सम्भवेताम्. गङ्गायमुनयोः सिन्धुब्रह्मपुत्रयोः नर्मदागोदावर्योश्च वीचिमुखरः कलकलप्रवाहः कालिदासस्य रसपेशलासु कवितासु निरन्तरमेव राजतेतराम्. षट् प्रबन्धेषु तदीयेषु क्वचिद् उदीच्याः दक्षिणां क्वापि च प्राच्याः प्रतीचीमनुक्रीडतो राष्ट्रजीवनस्य चित्रवीथी चिरं प्रत्यग्रतां भजते.

आरभ्य वङ्गेभ्यः समुद्रवेलाविहारः करणीयश्चेत्, पाण्ड्यकेरलसौराष्ट्र-सौरभं स्पृशता पारसमार्गेण हिमालय-कामरूपादीनां वृत्तयात्रा विधेया चेत् सपद्येव नेत्रप्राघुणकीक्रियतां तर्हि महाकविः. असौ महाराजरघोः रथवरे भवन्तमारोप्य निश्शुल्कं परिक्रामयिष्यति. अमुष्य रचनासु एकतो हिन्दमहासागरस्य गभीरत्वं अन्यतो हिमालयस्य पावनत्वं, स्वप्नमाधुर्यशालिनः स्वर्गस्य प्रांशुत्वं च वर्त्तन्ते, अतएव निरन्तरं प्रतिभारतस्य भारतस्य प्रतिनिधिकविरूपेण स एव सम्मान्यते.

अथ राष्ट्रप्रेमा महाकवेः भारतवर्षस्य हृदयसमुदारे मध्यवर्त्तिक्षेत्रे सर्वाधिकप्राकट्यमूरीकरोति. अत्र स्वाभिमानसमुन्नतं वक्षःकल्पं पर्वतशृङ्खला-सौन्दर्यं, अन्तः करणस्वरूपिण्यो रत्नगर्भाः खनिभूमयः, विविधाः स्रोतोवहाः अनेकाः प्रपातधाराश्च सविशेषा विलसन्ति. कालिदासस्य त्रयः प्रबन्धा ऋतुसंहारम्, मेघदूतम्, मालविकाग्निमित्रञ्च प्राचुर्येण अस्यैव प्रदेशतिलकस्य विशदच्छविं प्रकटयन्ति. एकः ऋतूनां षाड्गुण्यशालिनीं छटामङ्कयति, द्वितीयो

वार्षिकसुरभिसंमुच्छ्वसितानि विरहिजनहृदयानि सान्त्वयति, तृतीयश्च राजपरिषत्सु नृत्यभङ्गिममुखरां प्राचीनकलामुद्द्योतयति.

मेघदूतसंज्ञं खण्डकाव्यन्तु प्राच्याः पश्चिमपरिधिपर्यन्तां मध्यप्रदेशस्य अविकलां प्रकृतिशबलां दृश्यवीथीं प्रस्तौति. अम्बिकापुरात् मन्दसौरं यावदशीतियोजनानाम् एतादृङ् मनोज्ञसर्वेक्षणं नान्यत्र विलोकयितुमाप्यते. तदानीं नागरी सभ्यता विदिशाविशालादशपुरेषु जरीजृम्भ्यमाणा बभूव. दण्डकारण्ये पुनः आरण्यकसंस्कृतिः अविम्लानैव पल्लविता व्यलसत्. विश्वप्राङ्गणे नाट्यकलायाः प्राभातिकीमाभां विस्तारयन् प्राचीनतमो भरतमञ्चः सम्भावितशरभङ्गाश्रमस्य[1] अन्तिके वर्तमानरामगढ़ाभिधे रामगिरौ एवासीत्. रङ्गमञ्चे बहुधा राष्ट्रियस्तराणि कविसम्मेलनानि दूरागतरूपदक्षलक्षितानि नाटकानि चायोज्यन्त[2]. मेघदूतस्य सूक्ष्मा अभिव्यक्तयो विश्वासयन्ति यत् कालिदासः काले कालेऽत्र समागत्य समायोजनधुर्यतामङ्गीकरोति स्म.

आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलम्
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु,
काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम्.[3]

इति सजलाक्षो जलदमभिधत्ते यक्षः किं वा नायकमुखेन कविरेव मन्त्रयते. नागपुरवर्त्तिनि सानुविरहिते रामटेकपर्वते न सङ्गतिर्मेघदूतस्य सङ्घटते. न तत्र दण्डकारण्यं न कुटजकुसुमं, न धातुरागो, न शिलाफलकानि, न च पुण्योदका पुष्करिणी, नैवापि अनुरूपा पवनपदवी लभ्येरन्.

सरगुजाकान्तारेषु तपस्विनां देवदासीनाञ्च सान्निध्ये निवसन् महाकविरवन्त्याः संस्मृत्य नैजीं विरहवेदनां तुम्बुरुगन्धर्वसाधारणस्वरेण प्रकटयितुमाचकाङ्क्ष.

---

1. पूजितं चोपनृत्तञ्च नित्यमप्सरसां गणैः, तद् ब्रह्मभवनप्रख्यं ब्रह्मघोषनिनादितम् वाल्मी.रा. 3.1.4-10
2. A Fresh light on Meghaduta-V.K. Paranjape p.p.152-164.
3. पूर्वमेघः 12

अहह तुम्बुरुः, आद्यो विपञ्चिकाचार्यो रम्भापरीरम्भसम्मदम् अनुभवन् कुवेरसविधे चिरेण बलिपुष्पाणि प्रापयद् येन शापभर्जितो दण्डकारण्ये विराधस्य विकरालकलेवरं लब्धवान्[1]. असौ शरभङ्गस्य आश्रमान्तिके बम्भ्रम्यमाणः कथं शापमूर्च्छनामयापयदिति वाल्मीकिरामायणप्रसङ्गं स्वस्मिन् आरोप्य आषाढस्य प्रथमदिवसे उत्कण्ठावाहकं बलाहकं शब्दशिल्पी ययाचे. मानसूनसंज्ञा पारम्परीणा पवनपदवी सरगुजामण्डलादेव प्रथमं पश्चिमाभिमुखी तदनु चिरेण उत्तराशां कलयति, यदालक्ष्य प्रार्थयते यक्षः–'किञ्चित् पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण:'[2] मित्र मेघ! इतो हि सिद्धाङ्गनासेवितनाट्यशालासानोः भवानुत्पत्य शिखरमारोहतु–येन इन्द्रधनुः– प्रवलितं श्यामलं वपुः बर्हापीडवतः श्रीकृष्णस्य साम्यं भजेत. यात्रापरिश्रमे तत्सदृशी रसिकवृत्तिरेव सुखप्रदा स्यादिति प्रथमनिर्देशः.

उन्नतक्षेत्राणां कषणपरिमलं जिघ्रन्नेव भूयो मनोरमपर्वतम् आम्रकूटं द्रष्टासि. त्वयि शिखराधिरूढे पक्वपीताभरसालैराच्छादित आम्रकूटो वात्सल्यमय्या धरित्र्याः स्तनशोभां तनिष्यते. गिरिरयं रामगढ़ाद् नवयोजनेषु शहडोलमण्डलस्य अमरकण्टको मन्येत. अत्र समग्रराष्ट्रस्य त्रिभागमुज्जीवयन्त्योः शोणनर्मदयोरुद्गमधारे विलोक्यैव कश्चिदवगमो भवति–किं वक्षोजसाम्यम् आम्रकूटस्येति.

यक्षः अग्रे विवृणोति वत्सल! ततः परं विहरन्नेव विन्ध्योपत्यकासु प्रपातजर्जरां नर्मदां विशालगजकलेवरे विच्छित्तिचर्चितां भूतिमिव प्रेक्षिष्यसे. दृश्यमिदं द्वयोरव स्थानयोर्भवितुमीष्टे–अमरकण्टकस्य परस्मिन् भागे दूध-धाराकपिलधाराप्रपातयोरथवा एकादशयोजनेषु जबलपुरे स्फाटिकतटाङ्क-पातिप्रपातस्य भेड़ाघाटवर्तिनः.

स परामृशति–सुहृद्वर! जम्बूनिकुञ्जेषु राशीभूतं रेवानीरं स्वैरं निपीय पम्फुल्ल्यमानकेतकीधवलं नितान्तनिर्मलं दशार्णमण्डलमवगाहेथाः. दशार्णानां विदिशाभिधाना राजधानी, तत्रत्या रसवती सरिता वेत्रवती, यौवनपण्यपरिमलधरा नीचगिरिकन्दराश्च दिक्षु सुप्रथिताः.

---

1. अनुपस्थीयमानो मां रम्भासक्तमुवाच ह. वाल्मी.रा. 3,4,18-19
2. पूर्वमेघ:16.

धसानसरितं परितो दशार्णक्षेत्रं बुन्देलखण्डनाम्ना सम्प्रति निगद्यते. विदिशाराजधानी भिलसान्तिके बेसनगरभग्नावशेषेषु वेद्यते. पूर्वोक्तकन्दराः पुनर्गव्यूतौ उदयगिरिसांच्योः अवस्थिताः सन्ति. यक्षः सानुरोधमुदीरयति जलधर! यद्यपि गतिवक्रता काचिद् भवित्री तथापि उज्जयिन्याः स्नेहसाक्षात्कारो दृष्टिमद्भिर्न परिहरणीयः. विदिशामार्गेण उज्जयिनी-यात्रा रामगढ़स्य रामगिरित्वं भूयः पुष्णाति इत्यपि वामन कृष्णपराञ्जपेमहोदयेन प्रत्यपादि.[1]

सः अनन्तरसृतिं परिचाययति-प्रकृतिपुरुष! पार्वतीनिर्विन्ध्ययोः[2] सलिलसौभाग्यं वितन्वानो वियति समुत्पतन् अवन्तिकाललामभूताम् उज्जयिनीं दृष्ट्वैव मे व्याहारगुरुतां ज्ञास्यसि. सा हि न कथमप्यलकातो न्यूनशोभां कलयति-

स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शैषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम्.[3]

तत्र निशासु कियान् सञ्चारो जागर्त्ति, सिप्रावातः कीदृशीं प्रत्यग्रतामर्पयति, नर्त्तकीनां कथं नयनानि तरङ्गायन्ते, आपणे कियन्ति रत्नानि दरीदृश्यन्ते सर्वं स्वयमेव अनुभवितासि.

महाकालस्य प्रदोषनीराजनामन्वीक्ष्य कस्याञ्चिद् भवनवलभौ यामिनीशेषं सेवेथाः. उज्जयिन्याः परस्मिन् प्रत्यूष एव निष्क्रामन् स्तोकदूरे प्रसन्नपानीयां गम्भीरां द्रक्ष्यसि. पिपासा जागर्त्ति चेदमुष्या वानीरशाखा अपसार्य पानीयमापीय प्रतिष्ठेथाः. वसुधासमुच्छ्वासगन्धिन्यन्तरिक्षे सन्तरन् देवगढ़ इत्यपरनाम्नि देवगिरौ स्वामिकार्त्तिकेयं स्नपयित्वा कृतार्थः सन् उदीचीमाश्रयेथाः. तटिन्याश्चर्मण्वत्याः[4] चञ्चद्वीचिकाश्चोरयन् तस्यामेव दिशि दशपुरदर्शनेन कृतकृत्यो भवितासि. तत्रत्याः कामिन्यः कथञ्चिदेवं प्रेक्षिष्यन्ते-यथा रोलम्बवन्ति कुन्दकुसुमानि मार्गावरोधार्थं प्रक्षिप्येरन्.

---

1. A Fresh light on Meghaduta-p. 227
2. स्वनामख्याता नेबुज- नदी.
3. पूर्वमेघः 32
4. वर्तमाना चम्बल-नदी.

दशपुरं वायव्यकोणे मध्यप्रदेशस्य सीमानगरं सम्प्रति मन्दसोरनाम्ना विराजते:. इत: समनन्तरं दिल्ली-थानेश्वरयोरन्तिके वर्षन् सन्देशधरो जलधरो हिमालयमाप्नोति. तथापि समग्रयात्राया: त्रिंशदाकर्षणकेन्द्रेषु ऊनविंशतिदर्शनीय-स्थलानि मध्यप्रदेशपरिधौ समापतन्ति. इदमालक्ष्यते साकल्येन यन्मेघदूतं महाकवेरभीष्टस्थलानामेव शाश्वती स्मृति: मन्दाक्रान्ताभिराबद्धा जागर्त्ति-

इष्टान्-देशान् विचर जलद प्रावृषा सम्भृतश्री:
मा भूदेवं क्षणमपि च ते विद्युता विप्रयोग:.

अश्वघोष-कालिदासयोः संवादः

आस्तां वैक्रमी वार्त्ता. इतरे चासतां तत्तत्तिथिनिर्धारणोपायव्राताः. अश्वघोषकालिदासयोः काव्यवीथ्यां विशङ्कटं विलोक्यमानाः शब्दभावसंवादा एव सम्यक् परीक्षिताः पौर्वापर्यनिर्णयाक्षरं लक्षयेयुः. महाकवेरश्वघोषस्य विविधशैलीवितानबन्धुरायां काव्यवसुन्धरायां क्वचन वाल्मीकिकालिदासयोरिव काव्यगरिमा क्वचन विशदव्याकरणवैदुष्यपेशलश्चमत्कारः क्वापि च सामान्य-शास्त्राणामवरकोटिं विन्दाना विसंष्ठुला श्लोकवर्णनपद्धतिरवाप्यते. अनिश्चयाञ्चिता शैलीयं तस्य बहुश्रुतत्वं कामं व्यनक्तु, न कथमपि मौलिक-प्रतिभाप्रसरं समर्थयते. तथापि विहायैताः प्रातिभासिक-दृशस्तथ्यपरीक्षणं विदधीमहि.

सौन्दरनन्दं दशप्राय-स्थलेषु रघुवंशेन, नवधा कुमारसम्भवेन, प्रसङ्गत्रये शाकुन्तलेन प्रत्येकमेकस्मिन् पदे च विक्रमोर्वशीय- ऋतुसंहाराभ्या-मधोनिर्दिष्टतालिकानुसारं संवदति-

कालिदासः	सौन्दरनन्दम्
1. अवाकिरन् बाललताः प्रसूनै- राचारलाजैरिव पौरकन्याः. रघुवंशम् 2/10	सलाजैर्माधवीपुष्पैरुपहाराः कृता इव. 1/12
2. धनुर्भृतोऽप्यस्य दयार्द्रभाव- माख्यातमन्तःकरणैर्विशङ्कैः, विलोकयन्त्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः.	शरण्येभ्यस्तपस्विभ्यो विनयं शिक्षिता इव. 1/13

रघु. 2/11 तथा द्रष्टव्यं कुमार. 5/15	
3. एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु. रघु. 2/57	निरपेक्षाः शरीरेषु धर्मे यत्र स्वबुद्धयः. 1/16
4. पितरीवाग्निसंस्कारात् परा ववृतिरे क्रियाः. रघु. 12/56	स्ववंशसदृशीः क्रियाः 1/25
5. सुरभिर्यशोभिः रघु. 2/3	आपुर्यशोगन्धमतश्च 1/59 तथा द्रष्टव्यं 2/29
6. नक्षत्रताराग्रहसङ्कुलाऽपि ज्योतिष्मती चन्द्रमसैव रात्रिः. रघु. 6/22	तन्नाथवृत्तैरपि राजपुत्रै- रराजकं नैव रराज राष्ट्रम्. तारासहस्रैरपि दीप्यमानै- रनुत्थिते चन्द्र इवान्तरीक्षम्. 1/60
7. वत्सस्य होमार्थविधेश्च शेषं ऋषेरनुज्ञामधिगम्य मातः, औधस्यमिच्छामि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः. रघु. 2/66	गामधर्मेण नाधुक्षत् क्षीरतर्षेण गामिव. तथा-नासृक्षद् बलिमप्राप्तम्. 2/19-20
8. नेत्रैः पपुस्तृप्तिमनाप्नुवद्भि- र्नवोदयं नाथमिवौषधीनाम्. रघु. 2/73	आकृक्षद् वपुषा दृष्टीः प्रजानां चन्द्रमा इव. 2/22
9. निनाय साचीकृतचारुवक्त्रः. रघु.6/14	मुखेन साचीकृतकुण्डलेन. 4/19 मुखेन तिर्यङ्नतकुण्डलेन. 6/2
10. गर्भाभिषेको नाम सर्गः. रघु.19	भार्यायाचितको नाम सर्गः.4

11. विकारहेतौ सति विक्रियन्ते
येषां न चेतांसि त एव धीराः.
कुमार. 1/59

तेन सत्स्वपि भोगेषु
नासेवीन्द्रियवृत्तिता. 2/42

12. भूतार्थशोभाह्रियमाणनेत्राः
प्रसाधने सन्निहितेऽपि नार्यः.
कुमार. 7/13

स्वेनैव रूपेण विभूषिता हि
विभूषणानामपि भूषणं सा. 4/12

13. न षट्पदश्रेणिभिरेव पङ्कजं
सशैवलासङ्गमपि प्रकाशते
कुमार.5/9

रक्ताधिकाग्रं पतितद्विरेफं
सशैवलं पद्ममिवाबभासे.
4/21

14. शैलाधिराजतनया
न ययौ न तस्थौ.
कुमार. 5/85

सोऽनिश्चयान्नापि ययौ न तस्थौ
तरँस्तरङ्गेष्विव राजहंसः.
4/42

15. महार्हशय्यापरिवर्तनच्युतैः.
तथा-
तदा प्रभृत्युन्मदना पितुर्गृहे.
कुमार.5/12,55

विचित्रमृद्वास्तरणेऽपि सुप्ता
वैडूर्यवज्रप्रतिमण्डितेऽपि,
रूक्माङ्गपादे शयने महार्हे
न शर्म लेभे परिचेष्टमाना. 6/31

16. यं सर्वशैलाः परिकल्प्य वत्सं
पृथूपदिष्टां दुदुहुर्धरित्रीम्.
कुमार.1/2

तवास्मि गां साधु निपीय तृप्त-
स्तृषेव गामुत्तमवत्सवर्णः.
18/11

17. इति देह-विमुक्तये स्थितां
रतिमाकाशभवा सरस्वती.
अथ मदनवधूरुपप्लवान्तं
व्यसनकृशा परिपालयाम्बभूव,
शशिन इव दिवातनस्य लेखा
किरणपरिक्षयधूसरा प्रदोषम्.
कुमार. 4/39-46

इत्येवमुक्ताऽपि बहुप्रकारं
स्नेहात्तया नैव धृतिं चकार,
अथापरा तां मनसोऽनुकूलं.
इति युवतिजनेन सान्त्व्यमाना
हृतहृदया रमणेन सुन्दरी सा,
द्रमिडमभिमुखी पुरेव रम्भा
क्षितिमगमत्परिवारिताऽप्सरोभिः.
6/44-49

18. मनोरथानामगतिर्न विद्यते.	मृगराजमथो बृहद्रथा
कुमार. 5/64	प्रमदानामगतिर्न विद्यते. 8/44
19. खे खेलगामी तमुवाह वाहः.	व्याघ्रः क्लमव्यायतखेलगामी. 10/10
कुमार. 7/49	खेलगामी महाबाहुः. 12/11
20. अवेहि तनयां ब्रह्मन्नग्निगर्भां	देव्यामपि यवीयस्यामरण्यामिव पावकः.
शमीमिव. शाकुन्तलम् 4/4	2/57
21. कामो दाणिं सकामो होदु.	यास्यामि तस्माद् गृहमेव भूयः
शाकुन्तलम्-4	कामं करिष्ये विधिवत् सकामम्.7/47
22. क्षौमं केनचिदिन्दुपाण्डु	यत्र सूक्ष्माणि वासांसि फलन्ति वृक्षाः.
तरुणा माङ्गल्यमाविष्कृतम्,	
दत्तान्याभरणानि तत्-	एवंविधान्याभरणानि यत्र
किसलयोद्भेदप्रतिद्वन्द्विभिः.	स्वर्गानुरूपाणि फलन्ति वृक्षाः. 10/20-23
शाकुन्तलम् 4/5	
23. अस्याः सर्गविधौ प्रजापतिरभू-	मधुमास इव प्राप्त-
च्चन्द्रो नु कान्तिप्रदः,	श्चन्द्रो नव इवोदितः,
शृङ्गारैकरसः स्वयं नु मदनो	अङ्गवानिव चानङ्गः
मासो नु पुष्पाकरः.	स बभौ कान्तया श्रिया.
विक्रमोर्वशीयम् 1/10	2/59
24. तडित्पताकोऽशनिशब्दमर्दलः	ता निःसृताः प्रेक्ष्य वनान्तरेभ्य-
ऋतुसंहारम् 2/1	स्तडित्पताका इव तोयदेभ्यः 10/39

उपर्यङ्कितेषु चतुर्विंशति-काव्यादान-प्रसङ्गेषु सन्तु नाम केचिदकिञ्चित्कराः संवादाः किन्तु षष्ठक्रमे कतिचिद्राजपुत्राणां कृते तारासहस्रोपमाने, विश्रुतचरे चतुर्दशसादृश्ये स्वल्पकालार्थं निष्क्रमणात् प्राक् तरङ्गमालापर्याकुलराजहंसस्मरणे, ऊनविंशपर्याये क्लान्तस्य नाम व्याघ्रस्य खेलगामित्वे, चतुर्विंशतितमे बिम्बग्रहणे च रूपकप्रसङ्गं विना तडितः पताकात्वनिर्देशे सर्वथैव कृत्रिमाः परकीयकल्पनानुकाराः प्रतीयन्ते.

सप्तदशक्रमाङ्कवर्तिनि साम्ये तु स्पष्टतरमाभाति सुवर्णाक्षीसुतेन विहितं प्रसंगहरणम्. कुमारसम्भवे पौराणिकसङ्केतदृशा विलपन्ती रतिराकाशवाण्या कथञ्चिदनुकम्प्यमाना मरण-व्यवसायबुद्धिं मन्दीचकार, सौन्दरनन्दे पुनस्तयैव शैल्या, सदृशैः शब्दवृन्दैस्तैरेव च क्रमपातिच्छन्दोभिः कयाचिद् युवत्या सान्त्व्यमाना सुन्दरी स्वमन्दिरं विलासिनीभिः परिवृता प्रविशति. अमुष्य महाकवेर्विवेचनार्हं रचनान्तरं बुद्धचरितमेव विद्यते, यत्र पञ्चसु प्रसङ्गेषु रघुवंशमहाकाव्यस्य सकृदेव च शाकुन्तली छाया प्रतिभाति.

कालिदासः	**बुद्धचरितम्**
1. आनन्दजः शोकजमश्रु बाष्प- स्तयोरशीतं शिशिरो बिभेद, गङ्गासरय्वोर्जलमुष्णतप्तं हिमाद्रिनिस्यन्द इवावतीर्णः. रघु.14/3	भीतिप्रमोदजन्ये द्वे वारिधारे मुमुचे नरेन्द्रः. प्रीता च भीता च बभूव देवी शीतोष्णमिश्रेव जलस्य धारा. 1/28-29
2. स पल्वलोत्तीर्णवराहयूथा- न्यावासवृक्षोन्मुखबर्हिणानि, ययौ मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन्. रघु. 2/17	ततः कदाचिन्मृदुशाद्वलानि पुंस्कोकिलोन्नादितपादपानि, शुश्राव पद्माकरमण्डितानि गीतैर्निबद्धानि स काननानि. 3/1
3. तासां मुखैरासवगन्धगर्भै- र्व्याप्तान्तराः सान्द्रकुतूहलानाम्, विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन्. रघु. 7/11	वातायनेभ्यस्तु विनिःसृतानि परस्परायासितकुण्डलानि, स्त्रीणां विरेजुर्मुखपङ्कजानि सक्तानि हर्म्येष्विव पङ्कजानि. 3/19 तथा द्रष्टव्यम् 3/21
4. ततो मृगेन्द्रस्य मृगेन्द्रगामी.	स राजसूनुर्मृगराजगामी

रघु. 2/30	मृगाजिरं तन्मृगवत् प्रविष्टः. 7/2
5. एकातपत्रं जगतः प्रभुत्वं	आदित्यपूर्वं विपुलं कुलन्ते
नवं वयः कान्तमिदं वपुश्च.	नवं वयो दीप्तमिदं वपुश्च.
रघु. 2/47	10/23
6. गच्छति पुरः शरीरं	ततो निराशो विलपन् मुहुर्मुहु-
धावति पश्चादसंस्तुतं चेतः.	र्ययौ शरीरेण पुरं न चेतसा.
शाकुन्तलम्1/31	6/67

अत्र काव्यद्वयी कालिदासीया केवलमनुशीलिता, तुलनीयपदेषु च मनागसमर्थतैव भूयोऽपि साकेतकशिरोमणेः प्रतीयते[1]. इह प्रथमतृतीयकोष्ठयोः मन्ये महाकवेः प्राथमिकरचनाकालत्वेन प्रतिवारमेकस्या एव कल्पनाया द्विः पल्लवनं न मौलिकतालवं कवयितुः पुष्णाति. अथापि कालिदासेन राम-प्रत्यागमनकाले रघुकुलजनन्योः संवेदित -नेत्रेषु शोकजन्याश्रुणः प्रमोद-प्रसूतबाष्पाणां च कल्पितो युगपत्प्रादुर्भावः. बुद्धचरिते पुनः सिद्धार्थ-जन्मक्षणे कल्पितः पित्रोर्भयप्रमोदावसरः. कल्प्यतां नाम पुत्रजन्मनि भयम्, किन्तु हर्ष-संवलित-भयानुभावत्वेन नेत्राभ्यां विसदृशवारिधाराप्रसरो न क्वापि श्रूयते न च भजते काव्यौचितीम्[2].

इत्थं विहिते सति काव्यान्तरङ्गपरीक्षणेऽस्मदीय-सम्मत्या निश्चितमेव पश्चाद्वर्ती कनिष्कसमकालीनो वदान्यवागश्वघोषः स्वीक्रियेत.

---

1. बुद्धचरिते चतुर्दशसर्गादारभ्याष्टाविंशतितमं सर्गं यावदनुष्टुब एव निरन्तरप्रयोगः कृतः अनुष्टुभामवरकोटिकता यथा-
तस्माद् व्याससमासाभ्यां तन्मे व्याख्यातुर्हसि
यच्छ्रुत्वा शृण्वतां श्रेष्ठ परमं प्राप्नुयां पदम्. सौन्दरनन्दम् 12/17.
2. कालिदासेनासकृत् प्रयुक्त आम्रस्य चूतपर्यायोऽश्वघोषेण प्रथमतयाऽश्लीलगन्धी स्वीकृतः-
प्रतियोगार्थिनी काचिद् गृहीत्वा चूतवल्लरीम्
इदं पुष्पन्तु कस्येति पप्रच्छ मदविक्लवा बुद्धचरितम् 4/41.

रघुवंशत्रयोदशे नर्मनिकषः

उपक्रम्यतेऽथ कवित्वचूडायिते रघुवंशे काचिदौचित्यचर्चा. रामस्य पुष्पकयात्रां विवृण्वतः त्रयोदशसर्गस्य सहृदयैर्गीयते माहात्म्यं-यदत्र राष्ट्रप्रेमा विजृम्भितः कविवरस्य विहङ्गमदृशा निसर्गचित्रणेन. सर्गसंज्ञा च मल्लिनाथेन निर्दिष्टा 'दण्डकाप्रत्यागमनम्' इति, या हि न कथञ्चिदौचित्यवती स्यात् -नैव रामो दण्डकां प्रत्यागच्छति, न च दण्डकायाः प्रत्यागच्छति.

वस्तुतः प्रकृतिचित्रणं प्रत्यागमनेतिवृत्तञ्च गजनिमीलिकया सर्गेऽस्मिन् समाकलयन्तो विद्वांस उपेक्षन्ते ध्वनिमनौचित्यसमन्वितम्. महाकविना नितान्तमेकान्तं पुष्पकस्य चन्द्रशालाशिखरप्रान्तमधिष्ठापितौ[1] मर्यादामहिम-धुरीणौ सीतारामचन्द्राविति प्रथमश्लोकस्य 'मिथः' पदेन, 'मिथोऽन्योन्यं रहस्यपि' कोषतश्च प्रकटितम्.

चन्द्रशाला नाम न कालिदासोपज्ञा रहःप्रकल्पना, वाल्मीकिरामायणेऽपि अन्तः पुष्पकं गुप्तगृहाणि वर्णितानि सन्ति-

ततः काञ्चनचित्राङ्गं वैदूर्यमणिवेदिकम्
कूटागारैः परिक्षिप्तं सर्वतो रजतप्रभम्.

6 / 121/ 24

किन्तु तत्र समरव्यतिकरसमुद्धृता भारतीयमर्यादेव हुताशनभर्जित-करुणापवादेव सकलवनौकसां मातेव सीता सर्वेषां मध्यवर्तिनी तिष्ठति, यथा सीतारामचन्द्रयोर्वचांसि सर्वश्राव्याणि स्युः.[2]

---

1. पुष्पकचन्द्रशालाः क्षणं प्रतिश्रुन्मुखराः करोति. रघुवंशम् 13/40 'चन्द्रशाला शिरोगृहमित्यमरः.
2. वाल्मीकिरामायणम् 6. 123. 55-56.

रघुवंशस्य त्रयोदशसर्गे पुनः उपजातीनां विंशतिः निसर्गवर्णनपरा अपि नर्मगर्भतां व्यनक्ति–

मुखार्पणेषु प्रकृतिप्रगल्भाः स्वयं तरङ्गाधरदानदक्षः
अनन्यसामान्यकलत्रवृत्तिः पिबत्यसौ पाययते च सिन्धूः.

इति बहुपत्नीकस्य समुद्रस्य निरन्तराधरपानकर्तृत्ववाच्यतः 'एकपत्नीकेन मया कथं नाधरपानं क्रियेत' इति व्यज्यते. अथ च नायको यत्र अनपोढ-स्थितिः,[1] मुक्तशृङ्गारविरोधी; नायिका च परम्परायां रावणस्य अनन्यसामान्य-कलत्रवृत्तित्वं श्रावं श्रावं दूयमानमानसा स्यातां, तत्र प्रस्तुतपद्यस्य कियदौ-चित्यमिति विभावनीयमेव.

अग्रे च–

वेलानिलः केतकरेणुभिस्ते सम्भावयत्याननमायताक्षि
मामक्षमं मण्डनकालहानेर्वेत्तीव बिम्बाधरबद्धतृष्णाम्.

इति मार्गगतो रामो बिम्बाधरबद्धतृष्णं स्वं मण्डलकालहानेः अक्षमं निवेदयति. मण्डनकालहानेरिति कर्मणि षष्ठी, तथापि हेतौ पञ्चमी[2] गन्धवती चेदर्थं कुत्सयेदेव. इह अनसूयातिसृष्टदिव्याङ्गरागेण जानक्याः सदामण्डनं, केतकरेणूनां बिम्बाधरं प्रति अकिञ्चित्करत्वमुदात्तत्वं धीरत्वञ्च नायकस्य सर्वं खल्वेकपदे निहन्ति महाकवेरिन्द्रवज्रा. हनुमन्नाटकेऽपि क्वाचित्क एवंविधः श्लोकः सङ्गृहीतः[3]–यत्र सद्यः परिणीतो रामचन्द्रो दिवसमसहिष्णुः चित्रलिखितान् सूर्यवाजिनस्ताडयति कशाभिः.

किञ्च,

अद्धा श्रियं पालितसङ्गराय प्रत्यर्पयिष्यत्यनघां स साधुः
हत्वा निवृत्ताय मृधे खरादीन् संरक्षितां त्वामिव लक्ष्मणो मे.

---

1. रघुवंशम् 12. 31.
2. विभाषा गुणेऽस्त्रियाम् 2. 3. 25.
3. हनुमन्नाटकम् 2.1.

अस्मिन् गर्ह्यवादिनि पद्ये 'भरतस्तथा अनघां श्रियं प्रत्यर्पयिष्यति,यथा हि अन्धपिच्छिलायां गिरिगुहायामादिवसं त्वया सार्धमुषितो लक्ष्मणः खरदूषणयुद्धसमाप्तौ अनघां[1] भोगाभावादनुच्छिष्टां त्वां समर्पितवान्' इति प्रतिपादितम्. मन्ये, सीतालक्ष्मणयोः अघगन्धोऽपि अशेषां रामकाव्यपरम्परां कलुषयेत्, रामश्च ईदृग्वचः प्रवणत्वे स्वचरित्रमसौम्यस्वराद् रजकादधश्च्यावयेत्, कियच्चिरं कालिदासश्च अनुचितोपमानानि-समाकलय्य उपमासम्राट् सम्भेवत्. भरतस्य राजलक्ष्म्या अभोगः अनेन उपमानेनासाधारणतया विशदित इति चेत्, किन्तर्हि सीतालक्ष्मणयोरेव अभोगः सुलभोपमानम्? यतः एकान्तरपद्येन अयमेव भावः पुनरुच्यते-

पित्रा विसृष्टां मदपेक्षया यः श्रियं युवाप्यङ्कगतामभोक्ता
इयन्ति वर्षाणि तया सहोग्रमभ्यस्यतीव व्रतमासिधारम्.

एभिरुत्कटपद्यैः अन्यैः षोडशभिः[2] परिहासधीकृत्पदबहुलैः समुद्रादिवर्णनैश्च वस्तुतः सर्गप्रबन्धस्य अर्थशक्त्या दम्पत्योर्नर्म व्यज्यते, यद्धि सीतायाः करुणविरहानन्तरं द्राङ् न बहु शोभते, विशेषतो रामद्वारा- यस्य हि दिव्यादिव्यप्रकृतिः सर्गारम्भ एव महाकविना प्रतिश्रुता स्यात्-

अथात्मनः शब्दगुणं गुणज्ञः पदं विमानेन विगाहमानः
रत्नाकरं वीक्ष्य मिथः स जायां रामाभिधानो हरिरित्युवाच.

---

1. 'अनघा' पदेन प्रायः स्त्रीसम्बन्धतो भोगाभाव एव विवक्ष्यते कालिदासेन, तथा ह्यग्रे- 'अवैमि चैनामनघेति किन्तु लोकापवादो बलवान्मतो मे', (रघु. 14. 40), 'अखण्डं पुण्यानां फलमिव च तद्रूपमनघम्' (शाकुन्तलम् 2.10).
2. रघुवंशम् 13.2-4, 10-14, 18, 20, 21, 28, 32, 34-35, 42.

कालिदास-साहित्ये स्त्रीपात्राणि

साहित्यस्य यावन्ति पृष्ठानि परीवर्त्येरन् तावत्सु कामिनी-रूपाणि नित्यवैविधीं कलयन्ति संलक्ष्यन्ते. बहुत्र न पर्याप्नोति कवि-प्रतिभा तदङ्कने. तथाहि निवेदितं हिन्दीमहाकवि-बिहारिणा-

लिखन बैठि जाकी सबी, गहि गहि गरब गरूर
भए न केते जगत के, चतुर चितेरे कूर.

बिहारी सतसई-347.

अथ कवयित्रा समं विधुरतां विधातुरपि वर्णयति महाकविकालिदासः. कवतेऽसौ पार्वती-सन्दर्भतः-

वृत्तानुपूर्वे च न चातिदीर्घे जङ्घे शुभे सृष्टवतस्तदीये
शेषाङ्गनिर्माणविधौ विधातुर्लावण्य उत्पाद्य इवास यत्नः.

कुमार. 1/35.

अत्र तदीयजङ्घयोः सर्वङ्कषत्वं विवृण्वता कविना शुभे इति विशेषणेन तयोः पावनत्वं कान्तिमत्वञ्च विशिष्य संकेतितम्. परवर्ति-विश्वकवीनां कान्तिमत्यो नायिकाः (ब्रिलियण्ट हिरोइंस) नैकवारं चर्चापदवीमुपयाताः. मन्ये स एवायं कान्तिगुणो योषिदलङ्कारेषु नाट्यशास्त्रेऽपि प्रमुखतया परिगणितः[2] पार्वतीप्रभृतिनायिकाचित्रेषु[3] चकास्ति. तथा हि मङ्गलस्नान-विशुद्धगात्री शैलसुता "प्रफुल्लकाशा वसुधेव रेजे"[4] परिणयमण्डपोन्मुखी च सा-

---

1. कुमारसम्भवम् 1/49, मालविकाग्निमित्रम् 2/13, विक्रमोर्वशीयम् 1/10, अभिज्ञान- शकुन्तलम् 2/10, प्रभृतिपद्येषु.
2. दशरूपकम् 2/30-42.
3. कुमार. 1/24, 25, 43.
4. तत्रैव 7/11.

क्षीरोदवेलेव सफेनपुञ्जा पर्याप्तचन्द्रेव शरत्-त्रियामा
नवं नवक्षौमनिवासिनी सा भूयो बभौ दर्पणमादधाना.

कुमार. 7/26

उर्वश्या असाधारणीं रूपदीप्तिं निबध्नन्नेष कविः पद्मयोनेर्विधातुः स्थानान्तरणमेव कल्पयति वक्ति च-

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः.

विक्र. 1/10

चन्द्रः कामः कुसुमाकरो वा ईदृशीं कान्तिमनोहरामाकृतिं रचयितुमीष्टे नासौ जटापाठपरायणो जरठमेधाजडो वेधाः. शकुन्तला "प्रभातरला"[1] इन्दुमती चामुना "सञ्चारिणी दीपशिखेव" चित्रिते.[2] न केवलं सामान्यपरिस्थितौ बहुकृत्वो विषादवातावरणेऽपि नेमाः स्निग्धरुचिवैशिष्ट्यं विरहयन्ति. मेघदूते मूर्तिमती विरहभावनेव यक्षी दुःस्थिता सती-

हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वा-
दिन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्ति.

मेघदूतम् (उ.) /21

जलदमालिकाभिरंशतः करम्बितकान्तिना विधुमण्डलेन सोपमिता. अङ्गनानां मुखच्छविसनाभीनि भुजान्तराल-वलित्रयोरु-नखादीन्यपि[3] कविना सदृशच्छविशालीनि वर्णितानि.

अतिरिच्य खल्वेतान् बहिरङ्गरूपविन्यासान् कालिदासीयनायिकाः सद्यः-पातिभिः[4] संवेदितान्तःकरणैः पृथक् परिचयरेखामर्हन्ति. तथा हि शापविरहिता यक्षवधूटी चकितहरिणीप्रेक्षणा, उष्णैरश्रुभी रात्रीर्यापयन्ती मेघाच्छन्नवासरे

1. अभिज्ञान. 1/23
2. रघुवंशम् 6/67,
3. कुमार. 1/33-42, ऋतुसंहारम् 2/26, रघु. 16/63, मालविका. 3/11-12, विक्रम. 2/7 पुरस्सरस्थलेषु.
4. मेघ. (पू.)/10

दरजागरा स्थलकमलिनीव चालिखिताऽस्ति.[1] यक्षः सन्देशहरमनुरुन्धे-

तस्मिन् काले जलद! यदि सा लब्धनिद्रासुखा स्या-
दन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व,
मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथञ्चित्
सद्यः कण्ठच्युतभुजलताग्रन्थि गाढोपगूढम्.[2]

नारीमनोविज्ञानविदुरेण कविना प्रथमप्रहरभग्ननिद्रा मण्डलितबाहुलता स्वप्नकैतवं विवृण्वाना शैलजाऽपि सदृशतया सञ्चित्रिता.[3]

विविधसन्दर्भसोपानेषु योषितां मनःप्रचला भावशबलता यथा निपुणं निरूप्यते कालिदासेन तथा न कैश्चनान्यैः कवीन्द्रब्रुवैः. तपोवनसंस्कारिता प्रणयोन्मेषविसंष्ठुला शकुन्तला स्यात्[4] किंवा प्रथमतया शिवं वीक्ष्य "वेपथुमती सरसाङ् गयष्टिर्निक्षेपणाय पदमुद्धृतमुद्वहन्ती, मार्गाचल- व्यतिकरा- कुलितेव सिन्धुः शैलाधिराजतनया स्यान्नेदृशः[5] परत्र लक्ष्यते भावसम्भेदः. जानाति स एव शोकाश्रूणामुष्णत्वं शिशिरत्वञ्च प्रमोदबाष्पाणाम्. सभ्रातृकलत्रस्य रामस्य साकेतप्रत्यागमने कौशल्यासुमित्रयोः परमशबला- मौपम्यकरम्बितां संवेदनामङ्कयति महाकविः-

आनन्दजः शोकजमश्रु बाष्पस्तयोरशीतं शिशरो बिभेद
गङ् गासरय्वोर्जलमुष्णतप्तं हिमाद्रिनिष्यन्द इवावतीर्णः.

रघु. 14/3

सत्यम्, विशुद्धतमान्यन्तःकरणान्येव सद्यः संवेदनस्पन्दमनुभवन्ति यत्कृते कालिदाससाहित्ये भूयांसि नारीपात्राण्यपि तपोविशेषमहिम्ना परिष्कारोन्मुख-

---

1. तत्रैव (उ.)/19, 26-27.
2. तत्रैव 34.
3. कुमार. 5/57
4. अहिणवकुससूइपरिक्खदं मे चलणं. कुरुवअ- साहापरिलग्गं च मे वक्कलं. (बी. एच्. यू. कालिदासग्रन्थावल्याः 445 पृष्ठाङ्के)
5. कुमार. 5/85.

वृत्तीनि वर्णितानि. तपोभिरवन्ध्यरूपतां कामयमाना[1] पार्वती, तपसे सूर्यनिविष्ट-दृष्टिर्जानकी,[2] वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः शकुन्तला[3] तादृश्य एव समुज्ज्वलतेजोनिर्झरिण्यः सन्ति. वृथैव दीनसमीक्षकैरासां पुरतः समानीयन्ते तुलाकोटिभिरुच्छाल्यमाना ईव-हेलन्-डीडो-मिराण्डा 'प्रभृतयः पाश्चात्त्य-कामकरण्डिकाः.

अङ्कलक्ष्मीरिव[4] भारतीया नारी सहचरी[5] सहधर्मचारिणी[6] च भवति. नूनमजमुखतो विपन्नायामिन्दुमत्यां कश्चन राष्ट्रियसंस्कृतिस्वरः श्रूयते-

गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ
करुणाविमुखेन मृत्युना हरता त्वां वद किन्न मे हृतम् ?

8/67

सर्वं विशेषणजातमतिरिच्य किन्न मे हृतमिति वचो नार्या अनिर्वचनीय-महिमानं द्योतयति, यं पुनः स्पष्टतया व्यनक्ति विरही यक्षः- तां जानीथाः परिमितकथां जीवितं मे द्वितीयमिति.[7]

सप्ततन्तुसम्मिते कालिदासीयसाहित्यमण्डपे विविधवृत्तिसमन्विता मङ्गलमुखरिताः सुवासिन्यो विलसन्ति. मुग्धे पद्मिन्यौ सीता[8]-पार्वत्यौ[9] मध्या च पद्मिनी नायिका शकुन्तला,[10] चित्रिण्यः क्रमशो मुग्धामध्याप्रगल्भाश्च राजन्ते मालविकायक्षदयितोर्वश्यः[11]. अत्र चैकोनविंशरघुवंशकोण एव शङ्-खिनीहस्तिन्यावपि सामि दृश्येते.

---

1. कुमार. 5/2.
2. रघु. 14/66.
3. अभिज्ञान. 7/21
4. रघु. 6/43,
5. विक्रम. 4/32
6. विक्रम. पृ॰ 421.
7. मेघ. (उ.)/20
8. रघु. 14/59-67,
9. कुमार.8/2,
10. अभिज्ञान. 1/18, 21, 27.
11. मालविका. 2/3, मेघ. (उ.)23, विक्रम. 1/7.

अपि विस्तारिणि काव्यफलके सहजतया पल्लवितानां नायिकाऽवस्थानां बहूनि दुर्लभचित्राणि सन्ति विलसन्ति, यथा- विलोचनेन्दीवर-वारिबिन्दुभिर्निषिक्तबिम्बाधरचारुपल्लवा:[1] प्रोषितभर्तृका:, अल्पाभरणभूषिता नीलांशुकपरिग्रहा रभसाभिसारिका:,[2] क्रोधभिन्नवलयैर्विवर्तनै: प्रच्छदान्तं क्लेदयन्त्य: खण्डिताश्च.[3]

हन्त, नारीणां का न वैविधी प्रतिनिहिता कालिदासेन! इह वल्गति मदविह्वला स्खलितवागिरावती,[4] प्रणयिनं निगडयति रशनाभी रति:[5], परामृशति चरणाभ्यामुर्वशी[6], स्वदते सुरभिमृत्तिकां शनैरन्त:सत्त्वा सुदक्षिणा[7], वत्सलमातृत्वमनुरुन्धे गौतमी, सेर्ष्या तातप्यते ज्येष्ठा धारिणी, बिडालगृहीतेव परभृतिका सीदति कनिष्ठा मालविका,[8] कुट्टिनीव कलयति कूटं परिव्राजिका कौशिकी, सेवन्ते दारिका:[9], सञ्चरन्ति दूतिका:, परिहसन्ति निर्व्याजं प्रियंवदादिक-सख्य:.

निष्कर्षत: "सृष्टिराद्येव धातु:"[10] कामिनीयं कालिदासेन कमनीयाकृतिपरम्पराभि: सुतरां प्रमाणिता.

---

1. ऋतु. 2/12, मेघ. (उ.)/21-34,
2. विक्रम. पृ. 374, कुमार. 4/11 ऋतु. 2/10, मेघ. (पू.)/37.
3. रघु. 19/22,
4. मालिविका. पृ.290, रघु. 19/12,कुमार. 4/12, 8/77-80, ऋतु. 6/32-33,
5. कुमार. 4/8, रघु. 19/17,
6. विक्रम. 4/39, कुमार. 4/17 , 7/19, अभिज्ञान. पृ. 554.
7. रघु. 3/3-4,
8. जो बिडालगहीदाए परहुदिआए. माल विका. पृ. 300,
9. मालविका. पृ. 306, विक्रम. पृ. 380.,
10. मेघ. (उ.)/19.

यायावरविप्रो राजशेखरः

कविराजोऽयं काव्यमीमांसायां चतुस्त्रिंशद्वारं अन्यत्र च रूपकेष्वात्मानं यायावरं यायावरीयं वा प्रवक्ति. पश्चाद्वर्त्तिनि साहित्येऽपि अमुनैव उपाधिनाऽयं भूयसा सम्बोधितः[1]. प्राचीनस्मृत्यनुसारतः शालीनयायावरौ गृहस्थविप्राणां द्वौ भेदौ स्तः.[2] आप्टेमहोदयेन एतदपि सुष्ठु निध्यातं यद्राजशेखरो महेन्द्रपालराजस्य गुरुरुपाध्यायश्च तत्पिता तस्यैव राज्ञो मन्त्री च बभूवतुः. प्राचीनकाले ह्यमूनि ब्राह्मणास्पदानि पदान्यासन्. सार्धमेव-

बभूव वल्मीकभवः पुरा कविस्ततः प्रपेदे भुवि भर्तृमेण्ठताम्
स्थितः पुनर्यो भवभूतिरेखया स वर्त्तते सम्प्रति राजशेखरः.

(बालरामायणम् 1.16; बालभारतम् 1.13)

इत्यनुसारतो भवभूतिप्रभृतिविप्राणामवतारभूतो राजशेखरोऽपि विप्र एव स्यात्.कर्पूरमञ्जर्यामवन्तिसुन्दरीनाम्नी कवेः पत्नी 'चाहुआणकुलमौलिमालिआ' कथिता. चौहानवंशश्च प्रख्यातराजपूतक्षत्रियाणाम् आसीत्. अथात्र आप्टेस्टेनकोनोमहोदयाभ्यां राजशेखरस्य कृतिष्वारम्भिकशिवपरकपद्यैः तस्य शैवत्वमनुमितं[3] कथितञ्च 'यच्छैवो जातिच्युतिं विनापि राजन्यकुमारीं परिणयेत्[4].

डा. हुल्त्जः अवन्तिसुन्दर्या जात्यनुरोधतः क्षत्रियमेनं मनुते-' महेन्द्रपालस्य सकलकलानिलयविशेषणेन स्पष्टं भवति यद्राजशेखरस्तस्य नाध्यात्मिकगुरुः

---

1. धनपालकृता तिलकमञ्जरी.33 , इत्यादि.
2. History of Dharma śastra, Vol. II, p. 641&42 and footnotes etc. द्रष्टव्या विद्धशालभञ्जिका पृ. 7. भास्कर-रामचन्द्र आप्टे द्वारा सम्पादिता-पूना 1886
3. कर्पूरमञ्जरी -स्टेनकोनो, पृ. 180
4. कर्पूरमञ्जरी डा. मनोमोहनघोषः. (प्रस्तावना पृ. 64)

अपितु काव्यनाट्यप्रभृतिलोकलाध्यापकोऽभूत्, एतच्च क्षेत्रं क्षत्रियाणामपि न निषिद्धमस्ति. महेन्द्रपालो राजशेखरकविं पश्चात्किञ्चनयोग्यताप्त्यै उपाध्यायं व्यधासीत्. कर्पूरमञ्जर्या नवमपद्यतः प्रमाण्यते यदयं बाल-कैविककवि-राजोपाध्यायपदेषु क्रमशः नियुक्तोऽभूत्. क्रमश्चायम् उपाध्यायशब्द-माध्यात्मिकगुरुतार्थतो दूरीकरोति.'[1]

क्षत्रियस्य गुरुत्वमन्त्रित्वे धर्मसूत्राविरुद्धे इति डा. मनोमोहनघोषः कवेः क्षत्रियत्वमाशङ्कते. एष हि कोनोमतं निकृन्तन् कथितवान् -'यदि राजशेखरो ब्राह्मणोऽभूत्, तदापि विवाहोऽसौ न शैवरीत्या अपि तु तान्त्रिकविधिना अनुलोमविधिना वा निष्पन्नः स्यात्.'[2] कीथप्रभृतयोऽनेक इतिहासकृतः पर्याप्त-विवेकं विनैव क्षत्रियमेनमाचक्षते.

पी. वी. काणे, मीराशी, केदारनाथशर्मसारस्वतप्रष्ठा विद्वांसो राजशेखरं ब्राह्मणममन्यन्त. काणेमहोदयानुसारं 'क्षत्रियाणां यायावरकुलं न क्वचनालोक्यते. अध्यापकत्वस्य सम्यगनिषेधेऽपि नोचितं प्रतिभाति यन्नवमदशमशताब्द्योः भूपद्वयेन क्षत्रिय उपाध्यायो व्रियेत. आधुनिकलेखकानां तत्पत्नीकुलविषयिणी केवला शङ्काप्यपार्था यतः प्राचीनमध्यकालीनभारते विहितोऽभूदनुलोमविवाहः'[3] सारस्वतानुसारतः 'अद्यापि महाराष्ट्रेषु सहरिकीर्त्तनमटन्तो धेनुभिरनेकजनै-श्चानुगम्यमानाः सन्तो दरीदृश्यन्ते. ईदृशस्यैव कस्यचन यायावरमहात्मनो वंशे जातत्वाद् राजशेखरः स्ववंशं यायावरीयशब्देनालङ् कृतवान्'.[4]

अथ मत्समीक्षायां समस्येयं क्षणं जटिलतरा जायते. राजशेखरः स्वाभिमानमिव प्रदर्शयन् पत्न्याः कुलमुल्लिलेख. अनुलोमविवाहसङ्कोचस्य स्वाभिमानस्य च न सामञ्जस्यं भवति. पुनः 'ब्रह्मभ्यः शिवमस्तु' (बालरामायणम् 1.10, बालभारतम् 1.5) इति सादरं विप्रान् स्मृत्वा, रामं 'निजवंशमौक्तिकमणिं'[5] कथितवान्. भूयोऽपि बालरामायणस्य नवमाङ्के

---

1. Indian Antiquary, Vol. 34, p. 178-179 (1905 A.D.)
2. कर्पूरमञ्जरी -घोषः (प्रस्तावना पृ0 64)
3. History of Sanskrit Poetics, p. 215 (1961 A.D.)
4. काव्यमीमांसा, बिहार राष्ट्रभाषा परिषद् पटना, 1954, 'कविराज राजशेखर' पृ. 4
5. बालरामायणम् 1.15

विजिगीषू रामो रावणं प्रति साटोपमाचष्टे –'अयमसौ क्षत्रियो रामः, स भवानक्षत्रियो रावणस्तदत्र दृश्यतां कतरो विनेयः कतरो विनेतेति.' उक्तिरियं रामस्यैव चरित्रं व्याहन्ति, यतो हि लोका न ब्राह्मणविमर्दकमपि तु राक्षसविमर्दकममुं सम्मानयन्ति. स्यादत्र 'नायकमुखेन कविरेव मन्त्रयत' इति बलीयान् न्यायः. अन्यत्रापि विप्रानुद्दिश्य सन्ति कतिचन जुगुप्सावाक्यानि, यथा- 'अच्चहमो कविञ्जलो बम्हणोति.'[1] आपाततः तथ्यान्येतानि क्षत्रियपक्षं पुष्णन्ति.

अधुना दृढतरो ब्राह्मणपक्षः पुरस्सरति. यायावरनाम्नी क्षत्रियजातिः न क्वापि चक्षुःश्रवणयोर्गोचरी भवति बभूव वा. ब्राह्मणजातिश्च वैदिककालतः चतुर्दशखिस्तशताब्दीं यावत् शुद्धतया यायावरनामतः, पश्चादद्यावधि अपभ्रष्टसदृशनामतः प्रसृताऽऽस्ते. यजुर्वेदस्य तैत्तिरीय-(5.2.1.7) काठक (19.12) संहितयोः आपस्तम्बश्रौतसूत्रे (3.1.1,3), देवलस्मृतौ (1.128) याज्ञवल्क्यस्मृतौ (1.128)[2] वैखानसगृह्यसूत्रे च यायावरब्राह्मणा वर्णिताः. प्रायः सर्वत्र यायावराणां वर्यकोटिका सञ्चरणभिक्षार्जनवृत्तिरितः प्रपञ्चिता.[3]

महाभारते जरत्कारुरास्तीकश्च यायावरविप्रौ. अत्र सञ्चरणभिक्षार्जनाभ्यां सममेव कवित्ववैशिष्ट्यमपि यायावराणां प्रदर्शितम्.[4] एकादशखिस्तशताब्दी-समुत्पन्नो याज्ञवल्क्यस्मृतिभाष्यकारो विज्ञानेश्वरः संयमिनां ब्राह्मणानां शिलोञ्छवृत्तिं यायावराणामेव वृत्तिमाह.[5] प्रायो द्वादशशताब्द्यामाप्तजनिः श्रीमद्भागवतटीकाकृत् श्रीधरस्वामी 'यायावरं प्रत्यहं धान्ययाच्ञा'(श्रीमद्भागवतम्

---

1. कर्पूरमञ्जरी पृ. 16 (कोनोसंस्करणम्)
2. अत्रैव मिताक्षराभाष्ये उद्धृतो देवलव्याहारः.
3. विस्तरेण 'बालरामायणम् प्रथमोभागः' मदीयग्रन्थो द्रष्टव्यः.
4. यायावरकुले धीमान् भविष्यति महानृषिः.
   जरत्कारुरिति ख्यातस्तपस्वी नियतेन्द्रियः. महाभारतम् 1.38.12
   आस्तीकस्य पुराणर्षेर्ब्राह्मणस्य यशस्विनः. 1.13.6; द्विजवरोत्तम 1.56.26 आस्तीकस्य कवेः साधोः. 1.16.1; 1.58.31
   राजशेखरस्य काव्यमीमांसायामपि आस्तीकमुनिः प्रशंसित एकत्र-
   'आस्तीकोऽस्ति मुनिः स्म विस्मयकृतः.....यस्याद्यापि सविभ्रमं फणिवधूवृन्दैर्यशो गीयते' पृ. 44
5. याज्ञवल्क्यस्मृतौ (1.128) मिताक्षराभाष्यम्.

7.11.16) इति वक्ति. चतुर्दश (1310–1360) शताब्दीजो गृहस्थरत्नाकररचयिता चण्डेश्वरोऽपि यायावरविषये सदृशमेव हारीतमतमुद्धरति.[1] तर्हि कथं न राजशेखरो दशमशताब्द्यां यथोक्तगुणविशिष्टो विप्रः स्यात्?

महाभारतोल्लिखितं यायावराणां भिक्षुकत्वं कवित्वञ्च राजशेखरोक्तयाया-वरपूर्वजानां नामस्वपि ध्वनितं भवति. तरलः कविराजश्च (बालरामायणम्1.13) कवेः पूर्वजावास्ताम्. कविराज इति उपनाम भिक्षुककवीनामिव प्रतिभाति यतः कस्यापि नाम कविराज इति प्रायो न भवति, महाकवित्वञ्च तस्य प्रसिद्ध्यभावे असम्भवमेव. तरलनाम स्यात्कवेः प्रतिद्वारं सत्वरतामुपलक्षयति. वस्तुतः समयपरिवृत्त्या यथा यथा भिक्षाऽवरवृत्तिर्बभूव, तथा तथैव भिक्षुविप्राणामपि सामाजिकस्थितिरवरा सञ्जाता. उत्तरभारते कविभिक्षवो 'ब्रह्मभट्टाः'[2] निम्नकोटिविप्रा मन्यन्ते. तदपि भट्टचारणाभ्यां वरीयांसस्ते. महाराष्ट्रादागता राजशेखरपूर्वजा ईदृक्षा एव विप्रा आसन्निति दिशानया निश्चप्रचम्. महाराष्ट्रियब्राह्मणेषु यायावराणामद्यत्वे का स्थितिरिति वक्तुं दुःशकम्. कतिपयकाश्यपगोत्रीयविप्राणाम् 'आवारे' इत्युपनाम तत्र प्रचलितमस्ति.[3] कदाचिदेत एव यायावरवंशजाः स्युः, यतो हि 'यायावरीयशब्दस्य' 'आवारे' इति अपभ्रष्टरूपं भवेत्. पारस्यगिरः 'आवारा' शब्दस्यार्थः मराठीगिरः 'उनाड' शब्देनाभिधीयते,[4] अतो न तस्यच्छाया ब्राह्मणानामस्मिन् उपनाम्नि सम्पतिता स्यात्.

महेन्द्रपालस्य गुरुरुपाध्यायश्च ब्राह्मण एव भवेदित्यन्तरङ्ग- प्रमाणैः स्पष्टीक्रियते. अस्यैव रघुवंशिनो राज्ञः राजसभायामभिनीयमाने बालरामायणनाटके (4.64) रामः परशुरामं प्रत्याह–'रघूणां ब्रह्माणः किमपि यदमी गोत्रगुरवः.' इति. राजशेखरः कस्याञ्चिद्राजसञ्चालितपाठशालायामुपाध्याय आसीत्, यतःकाव्यमीमांसायामसकृत् कृताऽऽस्ते शिष्यचर्चा.[5] अथैतदर्थे

---

1. गृहस्थरत्नाकरः पृ. 415–421.
2. √भट् भाषणे–भटतीति–बाहुलकात् तन्.
3. हिन्दीमराठीशब्दकोष–महाराष्ट्र राष्ट्रभाषा सभा, पूना (1956)
4. जातिभास्कर पृ. 89 एवं ब्राह्मणोत्पत्तिमार्त्तण्ड पृ. 143
5. सैष शिष्यहिताय नः. काव्यमीमांसा पृ.2 (दलालसंस्करणम्) शिष्याणां दर्शितस्त्रिविधो विधिः.पृ.21

हुल्त्जघोषादयो मनीषिण: कथितवन्त: यत्क्षत्रियोऽपि कथञ्चिदध्यापको भवितुमर्हतिस्म, किन्तु भूयोऽप्यधोनिर्दिष्टे प्रमाणान्तरे मनीषिणोऽमी किं वक्ष्यन्ति? विवाहादिपौरोहित्यकृत्यकारयिता अपि तदानीमुपाध्यायशब्दवाच्यो बभूव-यत: कर्पूरमञ्जर्यामेकस्मिन् स्थले विवाहप्रसङ्गत: उपाध्याय आकर्यते[1] एतादृश: कुलगुरु: पुरोहितो वा उपाध्यायो ब्राह्मण एव भवितुं शक्नोतीति न कश्चन सन्दिहीत.

क्षत्रियकुमारीमवन्तिसुन्दरीं कवि: आप्टेसम्मतशैवमतेन काणेसम्मतानु-लोमप्रथया वा कथं परिणिनायेति कल्पनाया एव विषय:. शैवमतापेक्षया तु राजशेखरादृतस्य जैनधर्मस्य[2] कौलतन्त्रस्यैव[3] वा स्वतन्त्रता पर्याप्ततरा, यदयं क्षत्रियललनामङ्गीकरोतु. एतावत् स्पष्टत: कथ्येत यत्तदात्वे ब्राह्मणा: स्वैरं राजन्यकन्या: परिणिन्यु:. स्मृतिकारा: प्राय: सदैवानुलोमविवाहं प्रशंसन्त: प्रतिलोमं जगर्हु:, अथ वस्तुस्थिति: समानेहसां प्रत्यक्षदर्शिनाम् आरब्य-(अरबी) यात्रिकाणां वर्णनै: ज्ञायेततमाम्. द्वादशशताब्द्या नुझतुल-मुश्तकनामाऽऽरब्य-यात्रिको यत्र लिखति-'क्षत्रियया ब्राह्मणो विवाहं कर्तुमीष्टे, किन्तु ब्राह्मणकन्यां न क्षत्रिय: स्वपत्नीं विदध्यात्.'[4] तत्रैव दशमशताब्द्या: पूर्वार्द्धस्य राजशेखरसम-सामयिक: इब्न खुर्दबाऽऽख्य: आरब्ययात्रिको लिखति -'ब्राह्मणवर्गस्य कन्या विवाहे क्षत्रियपुत्रेभ्यो न दीयन्ते, किन्तु ब्राह्मणा: तेषां कन्या: स्वीकुर्वन्ति.'[5] राजशेखरो जातिग्रहिलो नासीदिति शार्ङ्गधरपद्धतिमध्ये समुद्धृताभ्यां तत्पद्याभ्यामाभाति-

सरस्वतीपवित्राणां जातिस्तत्र न कारणम्
व्यासस्पर्धी कुलालोऽभूद् यद् द्रोणो भारते कवि:. 189.18
अहो प्रभावो वाग्देव्या यन्मातङ्गदिवाकर:
श्रीहर्षस्याभवत्सभ्य: समो बाणमयूरयो: .190.19

---

1. उवज्झाओ हक्कारीअदु. कर्पूमञ्जरी पृ. 112
2. यशस्तिलकचम्पू:, तृतीयाश्वासत:.
   A second report of operations in search of Sans, mss., Journal of the Bombay-Branch of the Royal Asiatic Society No. XLiv,p. 45.(1884)
3. कर्पूरमञ्जरी 1.23-24.
4. History of India-By Elliot & Dowson, p. 76 (London 1867)
5. Do-p. 16 (अन्यदपिद्रष्टव्यम् -History of Dharmaśāstra, 2nd volume. p. 50-58, 448-450)

अतः कविराज़ो निस्सङ्कोचमनुलोमप्रथया विदुषीमवन्तिसुन्दरीमुरीकृतवान् इति प्रतीयते. कर्पूरमञ्जर्यां चौहानकुलोल्लेखः सम्भवतो भार्यानुरोधेन कृतो भवेत्.

ब्रह्मभ्यः शिवमस्तु वस्तु विततं किञ्चिद् वयं ब्रूमहे
हे सन्तः! शृणुतावधत्त विधृतो युष्मासु सेवाञ्जलिः.

(बालरामायणम् 1.10)

उक्तावस्यां 'ब्रह्मभ्यः शिवमस्तु' इति पदं न प्रणामसूचकमपि तु शुभाशंसासूचकमस्ति. 'वस्तुविततं......सेवाञ्जलिः' इति वाक्यं स्पष्टतः सकलसहृदयदर्शकान् प्रति कथितम्. यदि ब्राह्मणपरकमेतन्मन्येत कवेर्बद्धाञ्जलित्वं च प्रतीयेत तदपि न काचन हानिः. समयपरिवर्त्तेन यायावराणामवरा विप्रकोटिरासीदिति कथितमेव प्राक्. ब्राह्मणसमाजे क्षत्रिय-कन्योपयन्ता राजशेखरो हेयः स्यादेव, यतो स्वनाटकप्रस्तावनायां तेन समादृता ब्राह्मणम्मन्य-दर्शकाः.सामान्यतयाऽथ प्रबन्धारम्भे ब्राह्मणकवयोऽपि देवद्विजनृपादीनभिष्टुवन्ति, तथा हि तुलसीदासः- 'बन्दौं प्रथम महीसुरचरना' इति रामचरितमानसारम्भे ननाम.

स्तुत्येऽस्मिन्निजवंशमौक्तिकमणौ रामे विरामे द्विषां
कुण्ठा मे प्रतिभैव दैवतवशाद्वाचां प्रवृत्तिर्यदि.

(बालरामायणम् 1.15)

अत्र कवी रामं निजवंशमौक्तिकमणिमाह. अवधेयं यत्कतिपयपाण्डुलिपिषु 'मनुवंशमौक्तिकमणौ' इति पाठान्तरे सति[1] न पदमिदं निर्विवादम्. 'निजवंशमौक्तिकमणौ' इति पाठेऽपि कवेरित्थं स्पष्टतात्पर्यं यत् 'महेन्द्रपाल-राजकवेः मम प्रतिभा (महेन्द्रपालवंशस्य) रघुवंशस्य वर्णने तु प्रखरास्ति किन्तु रघुवंशिनो रामस्य वर्णने कुण्ठितास्ति, यतो ह्यसौ निजवंशस्य मणिभूतः (न मम).'

रामस्य 'अयमसौ क्षत्रियो राम....' इत्यादिक्षत्रियपक्षीयगर्वोक्तेः प्राग्

1. A Descriptive Catalogue of the Sans. Govt. Oriental Manuscripts Library. Madras, Vol.XXI (1918 A.D.), S.Kuppūswāmī Śāstrī.

रावणोऽपि 'अयमसावक्षत्रियो रावण:, स भवान् क्षत्रियो राम:, तद् दृश्यतां कतरो विनेय: कतरो विनेतेति' इत्थं विकत्थनाप्रवणो भवत्यतो नात्र कवे: क्वापि पक्षपात: सूच्यते. वस्तुतो बालरामायणे मध्येरामरावणयुद्धं क्षत्रियब्राह्मण-दलबन्धस्य या मनोवैज्ञानिकी पृष्ठभूमिरकल्पि, तस्या एव पल्लवनमेतत्. 'अच्चहमो' (कर्पूमञ्जरी पृ. 16) प्रभृतयो यादृशा: कटुशब्दप्रयोगा: कविना ब्राह्मणेभ्यो विहिता: तादृशा एव क्षत्रियेभ्योऽपि 'क्षत्रियखेट:' क्षत्रियवटुकीट:' 'कुक्षत्रिय:'[1] इत्यादयो विशेषणसङ्घाता: प्रयुक्ता:. फलतो यायावरविप्रो राजशेखर: केनापि तर्केण न क्षत्रियो मन्येत.

1. बालरामायणस्य क्रमश: 429,132, 338 पृष्ठाङ्का:
(भास्करसंस्करणम्, द्वितीयो भाग:)

राजशेखरवृत्तम्

क्षितिक्षितो विस्मृतिगह्वरं गता
विशीर्य सौधाः क्षितिगह्वरं गताः,
गताश्च सर्वे न परन्तु सा गता
कवेः स्थिरा सत्त्वमयी सरस्वती.[1]

अन्यसंस्कृतकवीनामपेक्षया विपुलतरो निजपरिचयः प्रत्तो राजशेखरेण, किन्तु सहस्राब्दीव्यत्यये नासौ पर्याप्ततरो सुखावबोधाय सञ्जायते. कियन्तिचित् स्युरेवं तथ्यानि-

समयः

त्रय आश्रयदातारो नृपाः कविना नामग्राहमुल्लिखिताः 1-महोदय-(कन्नौज) नरेशो रघुवंशी निर्भयोपाह्वो महेन्द्रपालः 2- तत्सूनुर्महीपालः 3. चेदिराजः कलचुरिवंशी श्रीयुवराजदेवश्च. महेन्द्रपालस्य विज्ञाततिथयः 893 खिस्ताब्दतः 907, महीपालस्य च 914 वर्षतः 929 खिस्ताब्दं यावत् सन्ति.[2] श्रींयुवराजदेवः 935 खिस्ताब्दकाले व्यराजत[3]. सर्वप्रथमं प्रथमयोरनयोः जे. एफ्. फ्लीट् विदुषा चरमस्य च डा. हुल्त्जसूरिणा प्रत्यभिज्ञानं विज्ञापितम्. आरभ्य ततोऽनेकशः मिराशीप्रभृतिमनीषिभिः विशदितोऽयं विषयः.[4] साहित्यिकोल्लेखा अपि कवेरेनमेव समयं समर्थयन्ते. नवमशताब्दीसम्भवा

---

1. स्वरचितसत्त्वमयीसरस्वती-कविताया: (11) सुरभारती 1962-63, प्रयाग वि. विद्यालयः.
2. राज्यकालश्य क्रमशः 885-910., 912-942 खिस्ताब्दाः मन्यते.
   History of Kanauj, Dr. R.S. Tripathi
3. The Chronological Order of Rājaśekhara's Works. V.V. Mirashi Studies in Indology, p.60.
4. Indian Antiquary, Vol. 16, 34, 62.

उद्भटानन्दवर्द्धनादय: समिङ्गिता राजशेखरेण स्वयमिङ्गितश्च स कुन्तकाभिनवसोमदेवधनपालसोड्ढलप्रष्ठै: दशमशताब्द्युत्तरार्द्धजै: विद्वत्कदम्बकै:.

युवराजदेवपौत्रस्य द्वितीययुवराजदेवस्य 975 खिस्ताब्दलिखिते बिल्हरीप्रस्तराभिलेखे सुश्लिष्टबन्धविस्मित इव राजशेखरोऽपि वर्णित इति 885 वर्षत: 975 खिस्ताब्दव्यापिनं तदीयजीवनानेहसं निष्कर्षन्ति मिराशीमहोदया:- 'यदिबालकवी राजशेखर: प्रथमाश्रयदातु: महेन्द्रपालस्य राजपरिषदं (900 खिस्ताब्दपार्श्वत:) पञ्चदशवर्षीयोऽभ्यगात् तर्हि बिल्हरीलेखकाले नवतिवर्षावस्थोऽसौ स्यात्. ईदृगेव दीर्घायु: तदुर्वरकाव्यकृतिभिरपि प्रमीयेत.[1] अत्र वक्तव्यं यदनुमानितोऽयं समय: पूर्वसीम्नि कतिपयहायनैर्विस्तारणीय:, यतो महेन्द्रपालस्य912 खिस्ताब्दावसेये राज्यकाल एव कथं पञ्चविंशतिवर्षदेश्यो राजशेखर: राजगुरु: उपाध्याय: षट्प्रबन्धप्रणयनधुरीणो[2] वा सम्भवेत्. अत: कविराजोऽयं 880 खिस्ताब्दपार्श्वतोऽवाप्तजनि: प्राय: शतायु:सौभाग्यभागभवत्. एतदपि कथ्येत यन्मिराशीमहोदय: कवेर्जनकं चेदिराजमन्त्रिणं मनुते[3], तत एव चेदिजातस्य राजशेखरस्य स्वत: कान्यकुब्जागमनं प्रतिपादयति. वस्तुतोऽसौ कान्यकुब्जपरिषदि महामन्त्रिपदमलञ्चकार अत्रैव च सञ्जातो राजशेखर इति सविस्तरमधोविवेचितम्.

पूर्वजा:

स मूर्त्तो यत्रासीद्गुणगण इवाकालजलद:
सुरानन्द: सोऽपि श्रवणपुटपेयेन वचसा,
न चान्ये गण्यन्ते तरलकविराजप्रभृतयो
महाभागस्तस्मिन्नयमजनि यायावरकुले.

बालरामायणम् 1.12

---

1. Mahākośala Historical Society papers, Vol, I, p, 17-18. Studies in Indology -P. 60 (Originally in 1934 A.D.)
   Corpus Inscriptionum Indicarum, Vol. IV. 1955, P.208
   अत्र पूर्वसीमानमाकुञ्च्य पञ्चाशीतिवर्षायु: कवि: सम्भावित:.
2. बालरामायणम् भास्करसंस्करणम् 1.5, पृ. 9
   तथा 'विद्धि न: षट्प्रबन्धान्' तत्रैव 1.12.
3. Corpus Inscriptionum Indicarum, Vol. IV, P. CLXXV

तदामुष्यायणस्य महाराष्ट्रचूडामणेरकालजलदस्य चतुर्थो दौर्दुकिः शीलवतीसूनुरुपाध्यायः श्रीराजशेखरः'. बा. रा. पृ.9

परिचयेऽस्मिन् कवेः प्रपितामहोऽकालजलदः 'महाराष्ट्रचूडामणिः' कथितः. महाराष्ट्रस्य विदर्भविषयः तत्रत्यं वत्सगुल्मनगरञ्च कविना सपक्षपातं पुनः पुनरङ्किते स्तः इति मिराशीमहानुभावः समुचितमेव सम्भावयति वत्सगुल्मं (आधुनिकमहाराष्ट्रस्य अकोलामण्डलान्तःपातिवाशीमस्थानम्) कवेः पूर्वजावासम्. कविप्रतिभोऽकालजलदः समभूत्. तदभिधानमपि दीपशिखा-कालिदास इव भवभूतिरिव वोपाहितमाभाति. सूक्तिमुक्तावल्यां (पृ. 486) शार्ङ्गधरपद्धतौ (777) सुभाषितावल्यां (843) भोजप्रबन्धे (विद्याभवन-संस्कृतग्रन्थमाला 21, पृ. 91) चादःसमुल्लेखो विलोक्यते. मिराशीविदुषोऽनुसारतः चेदिनरेशप्रथमकोक्कलस्य (850-890 खिस्ताब्दाः) सभाकविरकालजलद आसीत्. सम्भावनेयं चेदिसमभिनीताया राजशेखरीय-विद्धशालभञ्जिकायाः प्रस्तावनया परिपुष्यतेतराम्[2]. सुरानन्दः कवेः पितामहः स्यात्[3]. काव्यमीमांसायामेकस्मिन् प्रसङ्गे (दलालसंस्करणम् पृ. 75) सुरानन्दस्यापि मतं वर्ततेऽङ्कितम्. फ्लीटमहोदयो ह्येनं सूक्तिमुक्तावलिवर्तिन्याः-

नदीनां मेकलसुता नृपाणां रणविग्रहः
कवीनाञ्च सुरानन्दश्चेदिमण्डलमण्डनम्.

इति राजशेखरोक्तेः रणविग्रहोपाह्वस्य चेदिभूभृतो द्वितीयशङ्करगणस्य (890-910 खिस्ताब्दाः) सभासदमाह.[4]

---

1. Corpus Inscriptionum Indicarum P.CLXXIV. and A Practical Eng. Sans. Dictionary Vol. III, preface P. 137-138
by-Ananduran Borooah
2. (आकाशे) सखे सोमदत्त! किमात्थ तदकालजलदस्य प्रणप्तुस्तस्य गुणगणाः किमिति न वर्ण्यन्ते.' विद्धशालभञ्जिका पृ.8
3. 'न चान्ये गण्यन्ते' इत्युपेक्षयाऽऽकलिताः तरलकविराजादयः सगर्भ्या न स्युः 'यायावरकुलश्रेणेर्मुक्तायष्टेश्च मण्डनम्. सुवर्णबन्धरुचिरस्तरलस्तरलो यथा.' इति सूक्तिमुक्तावलिवर्तिन्या राजशेखरोक्तेरपि साधीयान् निष्कर्षो घोषमहाशयेनाकृष्टः यद् यायावरकुलश्रेणेः तात्पर्यं तदीयवंशशाखाभिसम्बद्धमस्ति.
4. Gazetteer of the Bombay Presidency, Vol. I, part II, p. 414

जननी कविराजस्य शीलवती पिता च दुर्दुको दुहिको[1] वेति बहुत्र कृतिषु चर्चितमस्ति. दुर्दुको महोदयराजस्य महामन्त्री समभूदिति मदीयं सम्मतम्. अवधेयं यत्कान्यकुब्जेऽभिनीतयोः बालरामायण-बालभारतयोरेब प्रस्तावनायां राजशेखरो महामन्त्रिपुत्रो महासुमन्त्रिपुत्रश्च कथितः. चेदिदेशे त्रिपुर्यामभिनीय-मानयोः कर्पूरमञ्जरी-विद्धशालभञ्जिकयोरेतादृशो नोल्लेखो लभ्यते.[2] महीपालराज्यकाले दुर्दुकः समं राजशेखरेण महोदयं विहाय चेदिराजधानीं प्राप. एतादृशो देशत्यागो भूपेतराश्रयणञ्च किञ्चिन्महत्त्वपूर्णमपेक्षते कारणम्. अथ महीपालस्य द्वितीयराजकविः क्षेमीश्वरः चण्डकौशिकनाटके समनन्तरमेव नान्द्याःकश्चित् कूटनीतिकारिणं दुष्टामात्यं वर्णयति.[3] अत्र महीपालं प्रति दुर्दुकस्यैव मनोमालिन्यं विविक्षितम्. पूर्वजाध्युषिता त्रिपुरी दुर्दुकराजशेखरयोरभीष्टाऽभूदेव, यतोऽमू पूर्वतः प्रशंसन्तौ (बालरामायणम् 3. 38-40, बालभारतम् 1.65) पश्चात्तामेवाध्यूषतुः. महीपालश्च महोदयाधिपः सहजविमनाश्चेदीशान् प्रत्यासीत्, यतो द्वितीयभोजं प्रतिद्वन्द्विनं कान्यकुब्जराजपीठे कलचुरिनृपः कोक्कलदेवो निवेशितवानासीत्. प्रथमयुवराजदेवस्य सम्बन्धिनौ राष्ट्रकूटेश-तृतीयेन्द्रः तृतीयकृष्णश्च महीपालराज्यं द्विराक्रमतः स्म.[4] अतएव बालभारतस्य प्रस्तावनायां महीपालः चेदिपतिकृते हस्तिज्वरसदृशो निर्दिष्टः. मिराशी-महोदयैः प्रथमयुवराजदेवद्वारा महीपालपराजयः सम्भावितः. वस्तुतः तथ्यैरैतिहासिकैरेवं प्रतीयते -यदा 938 खिस्ताब्दपार्श्वतः तृतीयकृष्णो महीपालाधिकृतं कालञ्जरदुर्गं जिगाय तदैव महीपालो राष्ट्रकूटकलचुरिभ्यां दुरभिसन्धिशङ्कया दुर्दुकमभ्ययुङ्क्त स च समं राजशेखरेण त्रिपुरीमैत्. काव्यमीमांसायां विशिष्टकविप्रशंसासु च राजशेखरेणानुल्लिखितः क्षेमीश्वरः तदनन्तरमेव संभवतो महीपालाश्रयमवाप चकार च गर्हणां भूतपूर्वमहामन्त्रिणः.

1. विद्धशालभञ्जिका पृ. 7
2. कर्पूरमञ्जरी मिराशीविदुषोऽनुसारं कान्यकुब्जेऽभिनीता, किन्तु मत्समीक्षासु तस्याः चेदिदेशाभिनीतत्वमापततीति द्रष्टव्यो मदीयग्रन्थः- बालरामायणम् प्रथमो भागः (पृ॰ 19-26). महोदयतः प्रवासविद्रवे शकलीभूतबालभारतकाव्यमीमांसे च कान्यकुब्ज एव रचिते इत्यपि तत्रैव निदर्शितम्.
3. 'आदिष्टोऽस्मि दुष्टामात्यबुद्धिवागुराऽलङ्घ्यसिंहरंहसा.... श्रीमहीपालदेवेन. चण्डकौशिकप्रस्तावना
4. History of Kanauj-R.S. Tripathi P.255&256. and The Age of Imperial Kanauj P.13, 34-35, 88.

व्यक्तित्वम्–

राजशेखरमाप्टेमहोदयो दाक्षिणात्यं,[1] स्टेनकोनो वैदर्भं, पं. सारस्वतो लाटदेशीयं[2] मनोमोहनघोषश्च मध्यदेशोद्भवं मन्वते.[3] अमी यथार्थतर्का अपि विद्वांसो न सन्ति साधुनिर्णयजुषः. पूर्वजानां राजकविकुले जातत्वात्, फलतो विदर्भचेदिकान्यकुब्जदेशमेदिनीषु कलितावासत्वात् कविराजः साकं पित्रा महोदयेऽबोधबाल्यं यापयित्वा सर्वत्र विद्यावाप्तये[4] कुतूहलवशाद्वाऽवश्यमेव देशाटनं व्यधासीत्. येन निसर्गतः तदीयकाव्येषु दक्षिणभारतस्य विविध–स्थानप्रथानां द्रविडकर्णाटलाटललनानाञ्च सूक्ष्मलावण्यानां वर्णनप्रावीण्यं दृश्यते. औचित्यविचारचर्चायां क्षेमेन्द्रोऽप्येतदेव तथ्यं प्रथयति–

कर्णाटीदशनाङ्कितः शितमहाराष्ट्रीकटाक्षक्षतः
प्रौढान्ध्रीस्तनपीडितः प्रणयिनीभ्रूभङ्गवित्रासितः,
लाटीबाहुविवेष्टितश्च मलयस्त्रीतर्जनीतर्जितः
सोऽयं सम्प्रति राजशेखरकविर्वाराणसीं वाञ्छति. 5.27

कविर्लाटवासिनां प्राकृतपटुत्वं प्रशंसति[5] तत्रत्यकवयित्र्याः प्रभुदेव्याश्च सस्नेहं स्मरतीति[6] पं. केदारनाथशर्मणा सम्भावितम्–'राजशेखरः प्रथमावस्थो लाटराजाश्रितोऽभूत् पश्चाच्च महेन्द्रपालमाशिश्रिये'. किन्तु वस्तुतो विश्लथेयं सम्भावना. विभिन्नप्रान्ताङ्गनानां कामचेष्टाः (बालरामायणम् 10.48, 86, 70–73, 75, 81–82, 87) भाषणनैपुणीश्च (काव्यमीमांसा पृ. 33–34) वर्णयन् राजशेखरः क्व क्व राजाश्रयमुररीकुर्यात्? लाटस्य विदर्भपार्श्ववर्त्तितया कविना कृतमात्मीयतामयं चित्रणम्. अथ लाटनाम्ना विदर्भमपि प्रायः परामृशति सः.

---

1. Karpūramañjari, konow, Preface P. 181.
2. काव्यमीमांसा, विहारराष्ट्रभाषापरिषद् (1954) कविराजराजशेखर पृ.8
3. Intoduction to Karpūramañjarī, Dr. Ghosh, p.66-68.
4. तदानीं विद्याध्ययनकृते न तथा कान्यकुब्जनगरं विदितचरमभूत् यथोज्जयिनीवत्सगुल्मे. काव्यमीमांसायां विद्यानुरागः प्रशंसितो वर्तते (काव्यमीमांसा पृ. 50–55)
5. बालरामायाणम् 10.68–69, काव्यमीमांसा पृ. 34
6. सूक्तीनां स्मरकेलीनां कलानाञ्च विलासभूः
प्रभुदेवी कविर्लाटी गताऽपि हृदि तिष्ठति.. सूक्तिमुक्तावलिः 4.94

कर्पूरमञ्जर्या एकैव नायिका क्वचन विदर्भवर्त्तिवत्सगुल्मनगरस्य क्वापि च लाटदेशस्य राजकुमारी कथितास्ते.[1] काव्यमीमांसाया देशविभागे (पृ. 93) न कोऽपि दक्षिणापथान्तर्गतः विदर्भव्यतिरिक्तो लाटजनपदोऽङ्कितः, इतश्च विदर्भवासिनः समुपेक्ष्य लाटवासिनां भाषणपटुत्वमुट्टङ्कितं (पृ. 34) समीक्ष्यते. अनेन कथञ्चित् प्रतीयतां यद् बाल्यपर्यटनेन दाक्षिणात्यदेशानां विवेचनं न साधीयोऽमुना कृतमासीत्[2]. राजशेखरो भारतस्यौदीच्यसीमस्वपि कदाचिद् व्यचरदिति तस्य बाह्लीकीदन्तक्षतानुरागो लम्पाकीकेशरचनाप्रियत्वं च प्रत्याययतः.[3]

कविपत्न्या अवन्तिसुन्दर्या नाम मैथिलीगान्धारीपाञ्चालीवत् पश्चात्कल्पित-माभाति. एवञ्चावन्तिक्षत्रियकन्यकया स्नेहचणः परिणयो राजशेखरस्य किञ्चित्कालिकनिवासं तत्रानुमापयति. मनोयोगादुज्जयिन्या महाकालेश्वर- (बालरामायणम् 10.80) संस्कृतप्रेम-काव्यकारपरीक्षा- (काव्यमीमांसा पृ. 50, 55) कामिनीसञ्चरणवीक्षणस्थितिरतकर्मप्रशंसा (बालरामायणम् (10.81) च तस्य यौवनोद्भेदानेहसि तत्रैव संस्कृतसाहित्यस्योच्चतमां शिक्षावाप्ति सूचयन्ति. अनन्यसंस्कृतकविसाधारणतयाऽवन्तिसुन्दर्याः समादरः, काव्यमीमांसायां तदीयतमतबहुमतं, विवाहोऽनुलोमश्च कथं न शक्नुवन्तु निगमयितुं विदुष्याः सहाध्यायित्वं तस्याः?

विधिवदधीतवेदव्याकरणपुराणदर्शनज्यौतिषार्थशास्त्रराजनीतिविषयो विकसितसारस्वतसत्त्वशेवधी राज़शेखरो 900 खिस्ताब्दतः पित्रा सार्धं महेन्द्रपालपरिषदि राजकवित्वं प्राक्रमीत्. बालरायायणप्रमुखषट्प्रबन्ध-प्रणयनेन राजानं दशवर्षैरेव प्रतिभाप्रभावितं कृतवान्[4].महेन्द्रपालस्तस्मै

---

1. 'अत्थि एत्थ दक्खिणावधे वच्छोमं णाम णअरं, तहिं मए एक्कं कण्णारदणं दिट्ठं. 'एवं 'अत्थि एत्थ लाडदेसे चण्डसेणो णाम राआ, तस्स दुहिदा घणासारमंजरी त्ति.' कर्पूरमञ्जरी पृ. 26, 104
2. द्रष्टव्यो मदीयग्रन्थः बालरामायणम् प्रथमो भागः पृ. 14 अधःटिप्पणम्.
3. 'बाह्लीकीदशनव्रणारुणदलैः पत्रैरशोकोऽर्चितः.' बालरामायणम् 5.38 विद्धशालभञ्जिका 1.25

   तथा 'लम्पाकीनां किरन्तश्चिकुरविरचनाम्.' बालरामायणम् 5.33
4. 'विद्धि नः षट् प्रबन्धान्.' बालरामायणम् 1.12

बालकवि-कविवरेण्यगुरूपाध्यायोचितं चादरमदात्.[1] दैवज्ञाः सहसैवामुं वाल्मीकिभर्तृमेण्ठभवभूतीनां प्रत्यक्षावतारं बभाषिरे.[2] पश्चान्महीपालस्य पालकत्वे बालभारतं काव्यमीमांसाञ्च रिरचयिषुः प्रवासव्यसनेन तत्प्रकरणं चेदिदेशे (वर्तमानजबलपुरं निकषा) त्रिपुरीमलञ्चकार. कलचुरिनरेशाश्रयेऽत्र व्यरचिषत कर्पूरमञ्जरीविद्धशाल- भञ्जिकाद्या नाटिकाः. तत्तद्भाषासु विविधप्रबन्धेषु सकलरसचक्रवालेषु च स्वतन्त्रप्रसरः कविराजो नितरां त्रिपुरीं गतो विरेजे.[3] बालभारतकाव्यमीमांसयोर वशिष्टभागाः केचनान्ये ग्रन्थाश्चेह सम्पूरिताः स्युरिति न सुशकमप्राप्तिहेतोर्वक्तुम्.

प्रथमयुवराजदेवस्य कर्पूरमञ्जर्याः प्रस्तावनायामनुल्लेखो विद्धशालि- भञ्जिकायाञ्च विमनस्कसङ्केतः कथं न प्रत्याययतां यद्राजशेखरः त्रिपुर्यां राजाश्रये सन्नपि राजकविपदवीं न समवाप. कविराजो महीपालानन्तरं क्षीयमाणां प्रतीहारश्रियमभिनन्दयितुं न पुनर्महोदयमजिगमिषत्, त्रिपुर्यामेव च मानीव पञ्चाननो यापितवानवशिष्टजीवनमिति सुप्रतीतं, यतो द्वितीययुवराजदेवस्यापि बिल्हरीलेखे वर्तमानप्रौढकवेरिव तस्योल्लेखो वर्तते. काले-काले विदर्भयात्रा- प्रसङ्गतो दाक्षिणात्यदेशा भूयो विहृताः स्युरिति तद्वर्णनप्रेम्णा प्रमाण्यते. ऐश्वर्यसम्पन्नयौवनादेव त्यागसौजन्यपराक्रमोपकारादयो व्यकसन् कविगुणा राजशेखरस्य.[4] अप्रतिहता पण्डितराजजगन्नाथस्येव काव्यधारा समग्रजीवनं सरसं कृतवती, परन्तु वार्द्धक्ये माघस्येव दुर्ललितेन परोपकारव्यसनेन कवेरासन्

---

1. बालकई कइराओ णिब्भरराअस्स तह उवज्झाओ.' कर्पूरमञ्जरी 1.1 एवं बालरामायणम् 1.5, 18 तथा पृ. 9.
2. बभूव वल्मीकभवः पुरा कविस्ततः प्रपेदे भुवि भर्तृमेण्ठताम्. स्थितः पुनर्यो भवभूतिरेखया स वर्तते सम्प्रति राजशेखरः.. बालरामायणम् 1.16
3. यस्तु तत्र तत्र भाषाविशेषे तेषु तेषु प्रबन्धेषु तस्मिंस्तस्मिंश्च रसे स्वतन्त्रः स कविराजः' काव्यमीमांसा पृ.19
4. आपन्नार्त्तिहरः पराक्रधनः सौजन्यवारांनिधिः
   त्यागी सत्यसुधाप्रवाहशशभृत् कान्तः कवीनां गुरुः,
   वर्ण्यं वा गुणरत्नरोहणगिरेः किं तस्य साक्षादसौ
   देवो यस्य महेन्द्रपालनृपतिः शिष्यो रघुग्रामणीः.. बालरामायणम् 1.18
   अत्रोर्ध्वपंक्तिद्वयविशेषणानि प्रसङ्गतो राजशेखरस्य महेन्द्रपालस्यापि च वर्त्तन्ते.

क्लेशविपाका:[1]. यदि सदुक्तिकर्णामृते प्रसन्नसाहित्यरत्नाकरे च राजशेखरनामत: समुद्धृतेयं वसन्ततिलका निजोक्तिरस्तु कवेस्तर्हि चरमभागे जीवनस्य कल्प्यतामवन्ति-सुन्दरीवियोगोऽपि.

अध्वश्रमाय चरणौ विरहाय दारा अभ्यर्थनाय वचनञ्च वपुर्जरायै.

एतानि मे विदधतस्तव सर्वदैव धातस्त्रपा यदिन किन्न परिश्रमोऽपि.

परवर्त्तिकाले कुन्तकादय: समीक्षका: पीयूषवर्षप्रभृतय: कवीश्वराश्च राजशेखरकृतीनां भूरिसमादरानुकरणं चक्रु:, किन्तु जीवनकाले सम्भवत: कविर्न प्रतिष्ठां समुचितामाप्तवान्, यतो निस्सृता: साक्रोशवाच:-

'ब्रूते य: कोऽपि दोषम्.........' (बालरामायणम् 1.12)

तथा **'जनापवादमात्रेण........ कस्मैचिद् यदि रोचते.'** (काव्यमीमांसा पृ. 61) वस्तुतो भारविसमयादेव सप्तमशताब्दीत: संस्कृतकवीनां पाण्डित्यप्रदर्शनरुचीनां परतितिक्षाप्रवृत्ति: ह्रासोन्मुखत्वमापन्नाऽऽसीत्. अन्येऽपि राजशेखरादनल्पीयांसं तात्कालिकनिरादरखेदं प्रकटीचक्रु: भवभूतिपण्डितराजादय: कवीश्वरा:[2]

---

1. 'किमपरमपरै: परोपकारव्यसननिधेर्गणितैर्गुणैरमुष्य.' विद्धशालभञ्जिका 1.6
2. 'यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जन:.अतिदुर्जनइति वक्तव्यम्.'

उत्तररामचरितम् 1.5

'ये नाम केचिदिह न: प्रथयन्त्यवज्ञाम्.......' मालतीमाधवप्रस्तावनायाम्. तथा 'विद्वांसो वसुधातले परवच: श्लाघासु वाचंयमा:......... आस्ये धास्यति कस्य लास्यमधुना........ वाचां विलासो मम..' भामिनीविलास:.43

अभिनेयं बालरामायणम्

चतुर्णवत्यधिकसप्तशतपद्यपेशलं राजद्विविधगद्यबन्धबन्धुरितं दशाङ्क-राजिका- करम्बितमिदं राजशेखरीयलेखनीललामकं बालरामायणमहानाटकं[1] नाभिनेयमिति समेषां साहित्येतिहासकृतां विदुषां सम्मतम्. स्टेनकोनो-बलदेवोपाध्यायप्रभृति- महाशयानां दृशा-

ब्रूते यः कोऽपि दोषं महदिति सुमतिर्बालरामायणेऽस्मिन्
प्रष्टव्योऽसौ पटीयानिह भणितिगुणो विद्यते वा न वेति,
यद्यस्ति स्वस्ति तुभ्यं भव पठनरुचिर्विद्धिः नः षट् प्रबन्धान्
नैवं चेद्दीर्घमास्तां नटवटुवदने जर्जरा काव्यकन्या..[2]

'राजशेखरः स्त्रग्धरायामस्यां स्वयमेव स्वकृतिदोषं विवृणोति. 'भव पठनरुचिः' इति पदेन नाटकस्य पठनीयता समर्थ्यते निरस्यते चाभिनेयता.' 'बालरामायणस्य प्रस्तावना एकाङ्कतुल्यास्ते, अङ्काश्च प्रत्येकं रत्नावलीसदृङ्-नाटिकापरिणाहं बिभ्रति' इत्याप्टेमहोदयोल्लिखितं तथ्यं कीथ-स्टेनकोनोपुरस्सरा विद्वांसोऽनूदुः.

वस्तुत उपर्युक्तमालोचकानां मतं सर्वथा भ्रमात्मकमस्ति. यदि वेङ्कटनाथेन चतुर्दशशताब्द्यां रचितस्य एकसप्तत्यधिकसप्तशतपद्यपिच्छिलस्य विविध-गद्यांश- जुषो दशाङ्कदार्शनिकनाटकस्य सङ्कल्पसूर्योदयस्य अभिनयो भवितुमर्हति तर्हि बालरामायणमप्यभिनेयम्. विंशतिश्लोकविशदा बालरामायणप्रस्तावना सङ्कल्पसूर्योदयस्य एकत्रिंशच्छ्लोककलितायाः प्रस्तावनायाः कथमधिकत-

---

1. अङ्कैश्च दशभिर्धीरा महानाटकमूचिरे. साहित्यदर्पणः.224
2. बालरामायणम् 1.12 (प्रस्तावना)

रोद्वेजिका स्यात्. अथ वी.वी. श्रीनिवासमहाभागः सङ्कल्पसूर्योदयस्य अनेकशः सफलाभिनयं दृष्ट्वा स्तुतिमुखरो बभूव.[1] वेङ्कटनाथोऽपि स्वनाटकस्याभिनेयतां सुष्ठु प्रत्येति.[2] महत्या रामलीलायाः प्रतिपादयितरि सप्ताङ्केऽनर्घराघवनाटकेऽपि सन्त्येव सप्तषष्ट्यधिकपञ्चशतपद्यानि, प्रसन्नराघवस्यापि च प्रस्तावना त्र्यधिकविंशतिपद्यैरन्तमेति. दामोदरमिश्रग्रथितं हनुमन्नाटकन्तु विनापि गद्यमष्टसप्तत्यधिकपञ्चशतपद्यालीमाकलयति. पुनः श्लोकसङ्गणनयैव न तारतम्यनिश्चितिरुचिता. दशाङ्केषु मृच्छकटिक-मालतीमाधवादिप्रकरणरूपकेषु स्यान्नाम श्लोकसङ्ख्याल्पता, किन्तु बहुलगद्यांशशालीनि न तानि कनीयांसि बालरामायणतः सन्ति. सुरगिरः सर्वश्रेष्ठनाटकमभिज्ञानशाकुन्तलमपि महाशयो मुग्धानलः अभिनयानुपयोगि आह, यतस्तत्र भावसुकुमारतयाः प्रकृतिपशुपक्षिणां मानवीकरणस्य च बाहुल्यमस्ति. दृशानया बालरामायणेऽपि कश्चित्कटाक्षेपं कुर्याद् यदत्र गृध्रवानरादयो मनुष्यवाचा व्याहरन्ति, दिव्यास्त्रैराहवे वीरा युध्यन्ति भवन्ति च विधुलोकव्यापिन्यो विमानतः स्वर्यात्राः. वक्तव्यमस्मिन् स्थले यदाङ्ग्लम-नीषिणामेतादृङ्मतानि न यथावन्मन्तव्यानि. भारतीयसंस्कृतसंस्कृत्योः यावत्पुरावृतं ते वैज्ञानिकदृष्ट्या स्पष्टीचक्रुः तत्सर्वात्मना स्तुत्यम्, किन्तु 'घोरजङ्गलकल्पं बाणभट्टगद्यम्' उताहो 'अनभिनेयम् अमुकसंस्कृतनाटकम्' इत्यादीनि तेषां वाक्यानि न श्रुतिवाक्यवदादरणीयान्यपि तु तर्कमनीषिकया परीक्षणीयानि सन्ति.

नैतत्परोक्षं प्रेक्षावतां यत् संस्कृतस्य रसनिर्भरनाटकेषु कथावस्तुनो वास्तविकता न तावती अवधीयते, यावती मध्येसहृदयदर्शकहृदयं रस-

---

1. I have, however had the good fortune of seeing it acted both in original Sanskrit and Tamil versions in various places in the province by several groups of talented and enthusiastic actors'.
Foreword by V.V. śrīnivāsan, P.XVII Sannkalpasūryodaya ed. by Pt. V.V. Kṛṣṇamāchārya

2. मौनं बिभ्रतु मत्सरेण नमितास्तूर्णं त एव ध्रुवं
कालोन्निद्रकदम्बगोलवपुषः कम्पस्फुरन्मौलयः,
किञ्चिद्व्रीडितकुञ्चिताक्षमवशादुत्तानदत्ताननाः
प्रस्तोष्यन्त्यवधिं प्रयोगपदवीसारस्यसारस्य नः. सङ्कल्पसूर्योदयः 1.24

सञ्चारवत्ता. समेषामद्भुत- दृश्यानामपि नाट्यप्रबन्धो विकसितरङ्गमञ्चेषु सूक्ष्मतया विधेयः. पशुपक्षिणः चित्रद्वारा प्रदर्शनीया अथवा नटा एव निजोत्तमाङ्गे कृत्रिमपशुपक्षिरूपयन्त्राणि स्वैरं परिदधीरन्. दिव्यास्त्रहेतुको वह्निदाहो जलप्लावनं वा संस्कृतस्य बलीयश्चित्रवद्वर्णनेन यथेच्छं प्रस्तूयताम्. युगेऽस्मिन् विज्ञानवति कृत्रिमधूमादेरुपयोगोऽपि सुकरतरः स्यात्. नाट्यशास्त्रस्य मण्डलकल्पनगति- प्रचारनाम्नोरेकादशद्वादशाध्याययोः भरतमुनिना व्योमगत-युद्धहेतुमण्डलार्थं रथविमानप्रासादगतयात्रायै, आरोहणावरोहणाभ्यां जलस्नानाय च विधिवदभिनयकृते विस्तृतविधिः साधु वर्णितोऽस्ति. आधुनिकता चेदभीष्टा, तर्हि रङ्गशीर्षं द्विधा विभज्य उत्प्लवनदृश्यानि वास्तविकानीव प्रदर्शनीयानि.

श्रीबलदेवोपाध्यायेन गैरोलाह्वेन वाचस्पतिना च स्वसंस्कृतसाहित्ये-तिहासयोः प्रतिपादितं यद् 'राजशेखरस्य प्रतिभा महाकाव्यरचनार्थमुपयुक्तासीद् नाटकनिर्माणार्थमसौ तावती नानुरूपासीत्. उक्तमहाकाव्यरचयितृभ्यः[1] समधिकादरप्रदर्शनेऽप्येतदेव रहस्यमस्ति. स्वमयं कविराजमवादीत्.'[2] एतादृगतलस्पर्शिनी कतिपयेतिहासकृतामालोचनाऽपि भ्रमजन्यैव प्रतीयते. यतः साहित्ये 'काव्यम्' इति शब्दः तथा व्यापकार्थगर्भितो यथा गद्यनाटकादयः सर्वेऽप्यस्मिन्नन्तर्भवन्ति. तत एव काव्यं नाटकश्च क्रमशः श्रव्यदृश्यकाव्ये अभिधीयेते. केवलं पठ्यमानं सत् नाटकमपि काव्यमभिनीयमानश्च सत्तदेव नाट्यमिति सुष्ठु सम्प्रदायतः स्पष्टीकृतम्-

'अनुभावविभावानां वर्णना काव्यमुच्यते
तेषामेव प्रयोगस्तु नाट्यं गीतादिरञ्जितम्.[3]

भरतमुनिर्नाटकेषु वर्णनांशं प्रायशः काव्यनाम्नाऽकथयत्. अभिनवगुप्त-पादोऽपि भूयोभूयः 'काव्यं तावन्मुख्यतो दशरूपात्मकमेव' 'काव्यञ्च नाट्यमेव'[4] इति मनुते. विचारणीयमिदं यद्राजशेखरः-

---

1. बालरामायणम् 1.16
2. संस्कृत साहित्य का इतिहास, बलदेव उपाध्यायः. पञ्चमसंस्करणम् पृ. 590
3. व्यक्तिविवेकस्य विंशतिसङ्ख्यपृष्ठे समुद्धृतम्.
4. अभिनवभारती (गायकवाडसंस्करणम्) . प्रथमखण्डे पृ. 292

बभूव वल्मीकभवः पुरा कविस्ततः प्रपेदे भुवि भर्तृमेण्ठताम्
स्थितः पुनर्यो भवभूतिरेखया स वर्तते सम्प्रति राजशेखरः.

बालरामायणम् 1.16

वंशस्थेऽस्मिन् वाल्मीकिभर्तृमेण्ठभवभूतिभ्यो यमादरमदात्, तेन किमु तस्य नाटककारता व्याहन्यते? न तिरोहितं विपश्चितां भवभूतिर्विशुद्धनाटककार एवासीदिति. वाल्मीकिरादिकविस्तु स्वोपज्ञरामकथया समस्तकविचक्रस्य मार्गदर्शी महर्षिः बभूव. भर्तृमेण्ठोऽपि स्वविशिष्टप्रतिभया राजशेखरस्यानुकार्यः स्यात्, अथवा राजशेखरो हरविजयादीनि यानि काव्यान्यरचयत् तेषु भर्तृमेण्ठकृतहयग्रीववधच्छाया भवेत्. एवञ्च निष्कर्षतो विशदितं यद् वाल्मीकि- प्रभृतीनां सम्मानकरणं न कवेः कथमपि नाटकनैपुणीं व्याहन्ति. आत्मानं राजशेखरः 'कविराजं' निरदिशत्, किन्तु सकलसंस्कृतकविसमय-शीलिता एवेयं परिपाटी. ऋतेऽत्र कवेः, नाटककारकृते नामान्तरनिर्धारणा न विद्यते.

यद्यपि दृश्यकाव्ये साक्षादाशुप्रभावोत्पादकता समपेक्ष्यते, तथापि पात्राणां चरित्रोन्नयनार्थं स्थलानि कानिचिदीषत्काव्यवर्णनात्मकान्यपि चेत्स्युः, न तर्हि कश्चिद्दोषः. 'दशरूपकस्य हीदं सर्वं विलसितं, यदुत कथाख्यायिके महाकाव्यमिति' प्रतिपादयता वामनाचार्येण पूर्वोक्तगुणविशिष्टमेव नाटकं श्रेय इत्यनुमोदितम्. इत्थं महेन्द्रपालनरेन्द्रस्य नाट्यसभायामभिनीतं बालरामायणं सर्वथाभिनेयं मन्येत.अद्यतनयन्त्रयुगस्य कार्यव्यस्तसामाजिका महीयश्चेदे-तन्मन्येरन् तर्हि संस्कृतनाट्यशास्त्रपरम्परां मनाक्श्लथयित्वा विजयदशमी-काले रामलीलाक्रमेण प्रत्यहमेकैकाङ्कतः पञ्चचत्वारिंशन्मिनटात्मकं मनोविनोदं लभेरन्. परमथ सार्धसप्तघण्टासमाप्यतो नाट्यतः समुद्वेजनं यन्त्रयुगस्य दोषो वक्ष्यते न तु बालरामायणसङ्कल्पसूर्योदययोः.

'ब्रूते यः कोऽपि दोषम्.......' (बालरामायणम् 1.12) इत्युक्त्या कविना स्वनाटकस्यानभिनेयता नैव स्वीक्रियतेऽपितु कश्चनालोचकम्मन्यः सव्यङ्ग्यमभिधीयते यत्-'त्वं राजशेखरादपि चतुरतरो भविष्यसि तदैव त्वित्थं कथयसि. भव पठनरुचिः अर्थादीषत्पठन-स्वभावो भव, तथा मे षट् प्रबन्धान्

1. काव्यालङ्कारसूत्रवृत्तिः 1.3.30-32.

परिचिनु, न मया बालरामायणमेवैकं व्यरचि'. एभिर्वाक्यशकलैरनभिनेयता न सम्बद्धा भवति. कस्यचिन्नाटकस्यापि गुणदोषौ पठनं विना न ज्ञेयौ स्तः. प्रयोगतो नाटकानि नाम प्रायः पठ्यन्त एव, अभिनयावसरस्तु कर्हिचिदेवापतति. कानिचन नाटकानि केवलमभिनीयमानि सन्ति विलसन्ति, पठ्यमानानि सन्ति च न विलसन्ति. अयन्तु वरीयान् नाटकस्यैव गुणगरिमा यत्पठ्यमाने दृश्यमानेऽपि च तस्मिँस्तुल्यानन्दसमुद्वेल्लनं स्यादिति सर्वैः पाश्चात्त्य-पौरस्त्यमनीषिभिः समर्थितम्[1]..

---

1. डा. राघवन् महाभागो 'भोजज् श्रृङ्गारप्रकाश' (पृ. 81-85) नाम्नि स्वशोधग्रन्थे अरस्तूडैसियरलेसिङ्गपुरस्सराणां पाश्चात्त्यविदुषामेतद्विषयिणीं विचारणां समद्धृतवानस्ति. भारतीयविचारकेषु द्रष्टव्योऽभिनवगुप्तः- 'अतएव तेषां (सहृदयानां) काव्यमेव (Read drama) प्रतीत्युत्पत्तिकृदनपेक्षितनाट्यमपि.' अभिनवभारती पृ. 288 (गायकवाडसंस्करणम्)

राजशेखरस्यावन्तिप्राकृतम्

राजशेखरस्य कृतिषु कर्पूरमञ्जर्याः प्राकृतं प्राचीनैरर्वाचीनैश्च सूरिभिः बहुशः समालोचितम्, किन्तु अन्येषां तद्रूपकाणाम् एतत्सम्बन्धि केनापि नाध्ययनं व्यधायि. भवतु, स्थालीपुलाकन्यायः प्रयुक्तः. अतः पूर्वं पूर्वेषां न्यायप्रयोगो निरीक्षणीयः.

स्टेनकोनोऽनुसारतः कर्पूरमञ्जर्या गद्यं शौरसेनीतः पद्यञ्च महाराष्ट्रीतो वर्तते. एतच्चिकीर्षयायं मनीषी त्रयोदशपाण्डुलिपिभ्यः स्वसंस्करण-समाकर्षणेऽनल्पमक्लमत्, तदापि च यद् बहुत्र एकस्मिन्नेव वाक्ये द्वयोरपि प्राकृतयोः अवशिष्टं मिश्रणं दृश्यते स्म तत्कथितमेतेन 'राजशेखरस्य न तादृग्वरीयसी भाषाविज्ञानचातुरी बभूव यादृङ् निविवेदयिषति सः.' तथा च 'सर्वभाषाचतुरोऽपि कविरयं न यथाभेदं प्राकृतानि पर्यचिनोदिति तदानीं प्राकृतानां जीवितवैधुर्यमनुमापयति.'[1] प्राकृतसर्वस्वकृन्मार्कण्डेयोऽपि इत्थमेव कथितवान् 'राजशेखरस्य महाराष्ट्रीप्रयोज्येषु श्लोकेष्वपि दृश्यत इति चेत्, तस्यैवाविमृश्यकारित्वं नापराधोऽनुशासनानाम्' (6.4) तथा च 'झाणेण वेअपढणेण कदुक्किआहिं (कर्पूरमञ्जरी) इति राजशेखरस्यापपाठ एव.'

1939 खिस्ताब्दे मनोमोहनघोषः कर्पूरमञ्जर्याः समालोचनात्मकं संस्करणं व्यररचत् प्रायतिष्ट च कतिपयप्राचीनपाण्डुलिपीनां साहाय्येन दुराग्रहपूर्वकं सम्पूर्णसट्टकस्यास्य भाषां शौरसेनीकर्त्तुम. अयं महाभागो ग्रन्थप्रस्तावनायां स्टेनकोनो-मतमपि साटोपमच्छिदत्.

---

1. Rājaśekhara's linguistic skill was not so remarkable as he likes to tell us.................Finally, from the fact that Rājaśekhara ''who knew all languages'' (i. 7[1]), did not correctly distinguish the different Prākrits, we may infer that the living knowledge of those dialects was, at that time, considerably diminished.
Karpuramañjarī, p. 203-4, Harvard Oriental Series.

विष्कम्भकप्रवेशकरहितो यस्त्वेकभाषया भवति
अप्राकृतसंस्कृतया स सट्टको नाटिकाप्रतिमः.

इति हेमचन्द्रानुशासनं समुल्लिखन् घोषो बभाषे यद् 'अप्राकृतसंस्कृतया' अर्थात् महाराष्ट्रीप्राकृतसंस्कृतातिरिक्तया एकभाषया सट्टकः क्रियते. फलतः केवलया शौरसेन्या कर्पूरमञ्जरी रचिता. 'अन्यानि च राजशेखरेण यानि त्रीणि त्र्यधिकानि वा रूपकाणि व्यरचिषत, तत्र विविधपात्रेषु संस्कृतस्य विविधप्राकृतानाञ्च विनियोजने स नाट्यशास्त्रादिष्टानेव नियमानशिश्रियत्.'[1]

अत्र वक्तव्यं यद्राजशेखरीयकृतिषु सर्वास्वपि महाराष्ट्रीशौरसेन्योः सङ्कर एव दरीदृश्यते. मृषैव कर्पूरमञ्जरीसंस्कारकैः पाठसङ्कर्षणकदर्थनान्वभावि कविराजे प्राक्षेपि च कलङ्कपङ्कः. घोषमहोदयो वस्तुस्थितिं बलादपहस्तयति. एवं प्रतीयते यदयं विद्वान् राजशेखरस्य बालरामायणबालभारतविद्धशाल-भञ्जिकादीनि रूपकान्तराणि न कदाचित् चक्षुःप्राघुणकीचकार. एतेषु न क्वापि भरतसम्मतो भाषावैविध्यनियमः प्रयुक्तोऽस्ति. अतः कर्पूरमञ्जरीभाषां कथमपि शौरसेनीकृत्य रूपकान्तरभाषाः मिथ्यातिरस्करिण्या सञ्छाद्य न सेत्स्यति सिद्धान्तो घोषस्य. अपरतः अपारमपि यततोऽस्य संस्करणं महाराष्ट्रीप्राकृतं विना नास्ते. प्रस्तावनायाः द्वितीयपद्ये अकलिअ, अजणिअ, अघडिअ शब्देषु (1.18) च स्पष्टमेव 'तो दोनादौ शौरसेन्यामयुक्तस्य'[2] इति सूत्रं समुल्लङ्घ्य महाराष्ट्री प्रवर्त्तते. प्रचलितपरम्परायां कर्पूरमञ्जर्या गद्यपद्यांशौ मिश्रप्राकृतेन उदाहृतावासाताम्[3], तर्हि परम्परैव किमविवेकिनी मन्यताम्? पुनः सट्टकस्य महाराष्ट्रीतरेण एकप्राकृतेन निबन्धनीयत्वं न

---

1. Besides the Karpūramañjarī, Rājaśekhara wrote three or more plays and in them he adhered to the rules given in the Nāṭyaśāstra about the assignment of Sanskrit and different dialects of Prakrit to different characters.

   Karpūramañjarī, Edited by Ghosh p. 65

2. प्राकृतव्याकरण 4.260
3. मार्कण्डेयः कर्पूरमञ्जर्याः 1.17, 1.32, 1.11, 2.8 पद्यानि क्रमशः 7.61, 5.118, 1. 50, 6.48 सूत्रेषूद्धृतवान्. विद्याभवनसंस्कृतग्रन्थमालाया दशरूपके काव्यप्रकाशे च 1. 23, 1.20 सङ्ख्याकानि पद्यान्युद्धृतानि द्रष्टव्यानि.

विश्वसनीयम्, यतो हेमचन्द्रं विहाय न कश्चिदाचार्य: एतद् विधानमवादीत्. विश्वनाथपुरस्सराणाम् आचार्यवर्याणामनुसारत: केनापि प्राकृतेन सट्टक: स्यात्.[1] कर्पूरमञ्जरीमनुकृत्य विलासवतीचन्दलेहाऽऽनन्द- सुन्दरीसिंगारमञ्जरी-रम्भामञ्जरीप्रष्ठा ये सट्टका: पश्चान्निर्मिता न तेषु हेमचन्द्रोदितो नियम: पूर्णतो निर्व्यूढ:. महाराष्ट्रवासिना घनश्यामकविना सप्तदशशताब्द्यां रचिता आनन्दसुन्दरी कर्पूरमञ्जरीवद् महाराष्ट्रया: (मराठ्या:) देश्यशब्दै: भूरिसम्भृता सती मूकीकरोति हेमचन्द्रम्. डा. घोषस्य चातुरीयं यत् स्थाने स्थाने विवश: सन्नसौ कर्पूरमञ्जर्यां मराठीप्रभावमकथयत्. वस्तुत: एकेन विचारकेण 'अप्राकृतसंस्कृतया' इति पदस्य शुद्धिमान्यतायामाक्षेपोऽपि कृत:, असंस्कृतप्राकृतया' इति प्रस्तावितञ्च पाठान्तरम्[2].

प्राकृतगिर: पाणिनिना पिशेल्महोदयेन सुष्ठु समीक्षितं यदीदृशं विभाषाद्वयमिश्रणं राजशेखरस्य सर्वेषु रूपकेषु दृष्टिगोचरं भवति, 'अत: दोषोऽयं कर्पूरमञ्जर्या एव पाण्डुलिपिकानां मूर्ध्नि नारोपियतुं शक्य:.'[3] तर्हि कीदृगिदं प्राकृतं कविराजस्य यन्मिश्रितरूपं सन्मार्कण्डेयपिशेलप्रभृतिभिर्वैयाकरणै: स्टेनकोनोघोषादिभिर्विद्वद्भिश्च इत स्ततो वपुरिव त्रैशङ्कवं समाकृष्यते सङ्करवर्णमिव भर्त्स्यते च!

यथार्थ्यमत्र यत्स्वयं मार्कण्डेयोऽपि (पिशेलदृष्ट्या पञ्चदशशताब्द्या-माप्तजनि:) स्वप्राकृतसर्वस्ते लक्षितं यद् आवन्तिप्राकृतं राजशेखरीयकृतिषु न परिचिकाय तदेव कविराजोऽयं प्रयुयुजे इति मया स्पष्टीक्रियते. आवन्ती भाषाया: परमलक्षणं यदस्यामेकस्मिन्नेव वाक्ये महाराष्ट्रीशौरसेन्यो: सङ्करो भवति. तथाहि प्राकृतसर्वस्वस्य दशमपादे प्रथमं सूत्रम्-

"अथावन्ती भाषाऽनुशिष्यते. 'आवन्ती स्यान्महाराष्ट्रीशौरसेन्योस्तु सङ्करात'. अनयो: सङ्करादावन्ती भाषा सिद्धा स्यात्. सङ्करश्च एकस्मिन्नेव वाक्ये बोद्धव्य:. .... यथा- एस किरादो मअमनुसरन्तो वेदसलआगहणं पइट्ठो. " अत्र किरादो

1. साहित्यदर्पण: 6.276-277

2. Dr. Lal RamayadupalSingh's thesis&^Hasya Rasa inTheory and Practice' P. 486 University of Allahabad

3. प्राकृतभाषाओं का व्याकरण पृ. 42 (डा. जोशी द्वारा अनूदित पिशेल व्याकरण)

वेदसपदे शौरसेन्या अन्यानि च महाराष्ट्र्या सन्ति, फलतः समस्तं वाक्यमावन्त्या निष्पन्नं मंस्यते. अन्येऽपि केचिदावन्त्या नियमा यथा–'च्चिअ च्चेअ इवार्थकौ. ....एवार्थेपि स्यातामेव (10.12) 'हो भुवः', 'पेच्छो दृशेः स्यात् (106-7). आवन्त्यामेव बाह्लीकी किन्तु रस्यात्र लो भवेत् (10.13).) प्राकृतसर्वस्वकृता सूत्रिताः.

उपर्युक्तानि सर्वाण्यपि लक्षणानि राजशेखरीयप्राकृतमनुसरन्ति. कर्पूरमञ्जरीगतं विभाषामिश्रणं पूर्वं प्रमाणितं निदर्शितमेव च. एतत्कथनीयं यत् स्टेनकोनोघोषसंस्करणयोः हठपक्षपातहेतोर्न मूलानुसारी पाठो लभ्यते, यतो ह्येतौ साग्रहं विभाषामिश्रणभीतौ स्वानुसारतः पाठचयनं चक्रतुः पूर्णतो मिश्रणापनयना-शक्तौ च सन्तौ कविं निनिन्दतुः. फलतः स्वतन्त्रा प्राचीना च कापि पाण्डुलिपिः कर्पूरमञ्जर्याः पुनराहरणीया यस्यां मार्कण्डेयादिदृष्टं कवेः रूपकान्तरवद् विभाषामिश्रता दृश्येत.

एतदवधेयं यन्महाराष्ट्र्याः पद्योपयुक्ततया, पद्यानां महाराष्ट्रीबाहुल्यं गद्यानाञ्च क्वचिदुत्तमस्त्रीपात्रादिप्रयोगे शौरसेनीबाहुल्यं न कथञ्चिदावन्ती-स्वरूपमपहन्ति.

राजशेखरीयबालरामायणमहानाटकस्य आवन्ति-प्राकृतं मया 'बालरामायणम्' (प्रथमो भागः) नाम्नि स्वग्रन्थे[1] विस्तरतो विशदितम्. अस्मिन् प्राकृतभाषीणि चतुर्विंशतिपात्राणि सन्ति, येषु पारिपार्श्विको गद्ये शौरसेनीं पद्यं च महाराष्ट्रीं प्रयुङ्क्ते. सीतायमुनालङ्काः भवभूतिश्च शौरसेनीं प्रयुञ्जते. एकान्नविंशतिपात्राणि आवन्त्या व्याहरन्ति. यथा रावणस्य प्रतीहारी –'कहं अज्ज वि स च्चेअ चित्तभित्ती तं चेअ चित्तअम्म ता गाढमहिणिविठ्ठो दसाणणे कामो, ता मण्णे सदमण्णुपक्खवादो एत्थ वित्थरइ.' इत्यादि.

अद्यावधिलब्धस्य बालभारताङ्कद्वयस्य द्वित्राणि प्राकृतवाक्यानि न किञ्चित्तथ्यं निगमयेयुः आवन्त्यैव च काव्यमीमांसाविद्धशालभञ्जिकयोर्दृष्टचरः प्राकृतांशो विलसति.

अभिज्ञानशाकुन्तलमृच्छकटिकादिषु यथा नास्त्येव प्राकृतवैविध्यं तथा राजशेखरीयरूपकेषु. 'अथवा छन्दतः कार्या देशभाषा प्रयोक्तृभिः[2] इति

1. नाग पब्लिशर्स दिल्ली. 1995.
2. नाट्यशास्त्रम् 17.48

भरतानुशासनतः कवयो विभिन्नदेश्यभाषाणां स्वदेशभाषाया एव वा सर्वत्रोपयोगं विदध्युः. राजशेखरो द्वितीयमेव स्याद् विकल्पमुरीकृतवान्. अस्य कवीश्वरस्य पूर्वजा महाराष्ट्रवासिनो बभूवुरेतस्यापि च कियांश्चिद् बाल्यकालस्तत्र व्यतीयाय. पश्चादधिकांशजीवनं शौरसेन्याः क्षेत्रभूतेन कान्यकुब्ज (कन्नौज) नगरेण सम्बद्ध मभूदिति कवेर्निजव्याहारे स्वभावतो महाराष्ट्रीशौरसेन्योः मिश्रणमासीदेव. अवतिन्सुन्दरीनाम्नी भार्याऽस्य अवन्तिदेशस्य सम्भवत उज्जयिन्या आसीदिति सर्वं पूर्वोल्लिखिते स्वग्रन्थे विवृतमेव मया. फलतः तस्या अपि आवन्ती भाषा महाराष्ट्रीशौरसेन्योः मिश्रणात्मिका स्यात्. भाषाविज्ञानदृशा परिवारे स्त्रीवाचामवश्यम्भावी प्रभावो भवति. एवं राजशेखरो ध्रुवमेव शौरसेनी-बहुलामावन्तीमुपयुङ्क्ते स्म या हि तथैव तत्कृतिषु अवतीर्णाऽऽस्ते. विदर्भाभिजनः कान्यकुब्जराजाश्रितो भवभूतिकविरपि आवन्तीं प्रायः प्रायुङ्क्त इति दिशानया दृश्यतां विद्वद्भिः. अथात्र देशभाषारूपेणैव आवन्ती ग्राह्या, 'मध्यमपात्रेषु सदा योज्याऽऽवन्ती तु नाट्यविधौ'[1] इति न भरतोक्तनियमान्तरेण.

1. यदाह भरतः-
दाण्डिपाणिकपाण्टिकनगराधिपदाण्डपाणिकसदृक्षेषु
मध्यमपात्रेषु सदा योज्याऽऽवन्ती तु नाट्यविधौ.
प्राकृतसर्वस्वव्याख्या 10.1

संस्कृतरामकाव्यस्य साम्प्रतिकत्वम्

विजयते निलिम्पभारती या हि वात्सल्यपयः-स्नुतिरिव भारतमातुः संस्कृतिपरम्परां जीवयन्ती, लोकचेतनामपि पावयन्ती चिरादशोकवनीपावनी जानकीव नित्यं शुद्धतामादधाना, पवित्रतां त्रायमाणा, नैराश्यं शलमाना सादरं प्रयुज्यमाना पूज्यमाना च दरीदृश्यते. अयमेव प्रतीकसङ्केतो यत् संस्कृतपदस्य प्रथमप्रयोगचणे वाल्मीकिरामायणे-

यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम्
रावणं मन्यमाना मां सीता भीता भविष्यति.

इति वर्गशङ्कया सकृत् समुद्विज्यापि सुरगवीमेव पल्लवयामास पवनात्मजः. अवधीसंज्ञयोपभाषया 'श्रीरामचरितामानसम्' निबध्नता महाकविना गोस्वामितुलसीदासेनापि स्वभारती भूरिदेववाणीपद्यैर्विभूषिता.

वस्तुतो विश्वस्मिन् प्रथमसमुद्भासिकविताज्योती रामयशोनीराजितं संस्कृतक्षितिजमाशिश्रिये-

कूजन्तं राम रामेति मधुरं मधुराक्षरम्
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्.

अतएव भारतीयसंस्कृतिसाहित्यशेवधी संस्कृतरामकाव्यं भूयोगरिमाणमर्पितवन्तौ. तपसोऽध्यात्मविद्यायाःप्रसन्नकाव्यविधायाश्च अपूर्वप्रासादा रामकाव्यानि. वाग्भूतिभवभूतिपरिभाषया-

लौकिकानां हि साधूनामर्थं वागनुवर्तते
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति.

-उत्तररामचरितम्

सहजसाधारणीकरणविदुरा द्रवितान्तःकरणमेदुरा रामकवयो यानि ऋतम्भराणि सार्वजनीनतथ्यानि समुदजीघटन्, तानि कालकलयाप्यम्लायन्तो मुहुः प्रत्यग्रशोभां दधति.

यावत् स्थास्यन्ति गिरयो सरितश्च महीतले
तावद्रामकथेयं ते लोकेषु प्रचरिष्यति.

-वाल्मीकिरामायणम्

भवभूतेः कारुण्यं रामवृत्तस्य मानवसंवेदनामयत्वमेव प्रतीयते यस्यावर्त्तबुद्बुदतरङ्गरूपा भावकषाया भूयसा भवप्रवाहे निभाल्यन्ते. अद्याप्यनुकरणीया रामचारित्र्यपद्धतिः समेषामपि मनीषिणां विदितचरी वर्त्तते. उदाहरणार्थं राष्ट्रस्य प्रसृत्वरमनुशासनं तदेव काङ्क्षति यदुल्लिख्य प्रतिभादिवाकरोऽभ्यर्चयत् कालिदासः-

धनिनोऽपि निरुन्मादा युवानोऽपि न चञ्चलाः
प्रभवोऽप्यप्रमत्तास्ते राजानो रघुवंशजाः.

-रघुवंशम्

मानवविकाससरणिः सम्प्रत्यपि रामावधिसमुच्छ्रायं समीहते यतः सर्वोत्तमसमुन्नत्यै खल्वसौ लक्ष्यभूतो मानदण्डः-

बालक्रीडनमिन्दुशेखरधनुर्भङ्गावधि प्रह्वता
ताते काननसेवनावधि कृपा सुग्रीवसख्यावधि,
आज्ञा वारिधिबन्धनावधि यशो लङ्केशनाशावधि
श्रीरामस्य पुनातु लोकवशता जानक्युपेक्षावधि.

-सुभाषितरत्नभाण्डागारम्

पारवश्यनिशीथिन्यां लुप्तेव कीलितेव चाभूदीदृशी महत्त्वकाम्या परमद्य धरण्याः समुन्मिषितेव सीता विलसतितरां नवस्वतन्त्रता. तस्याः क्षेमार्थं परस्परं प्रेमार्थं पुनः पुनः शीलनीयं महनीयं रामकाव्यम्.

जनिमलभत जानकी पूर्वमेतादृशे क्रीतवैखानसे शङ्किते वासरे शीतलुप्ताक्षरे शुष्कतो भूतलात् क्रान्तिकिर्मीरितात् सञ्चितासृक्छटं व्यस्य मृत्स्नाघटं मैथिले

प्रान्तरे भारतीयाजिरे. निमिकुलदुहिता सिता स्निग्धशम्पाकृतिः पुण्यसाक्षोत्कृतिः स्वीचकारापदं राघवं वा पदं स्वर्णकुञ्जे च सा चारुशीलाऽञ्जसा राक्षसीभिर्वृता लक्षिता सन्नता शैवलोल्लासिनी काऽपि मन्दाकिनी.

द्विगुणितदशहायनीं प्रस्तुतां यौवने कान्दिशीकां वने तन्मितैरुल्वणः पाणिभी रावणः प्राभवत् क्ष्मासुतां तेजसा संवृतां भक्तियुक्तां चितिं भारतीं संस्कृतिं नो मनाक् पाशितुं नासिना शासितुम्.

त्रिभुवनविलसत्कला नूतना या त्रयी रामलीलामयी रङ्गमञ्चोद्धुरा नेत्रयोर्बन्धुरा मन्त्रपूताम्बरा भाति सामस्वरा लोकसंवादिनी मानसोन्मादिनी तत्र केन्द्रस्थिरा मैथिली नेतरा.

कलयतु जगदीश्वरी वर्द्धमानायतिं राष्ट्रियां संहतिं पूर्ववद् भास्वरं देवभाषास्वरम्.

इस्लामदर्शनस्य समन्वयपीठिका
अल्लोपनिषद्

सदृशतया विशदपल्लवनैर्हिन्दुबौद्धजैनदर्शनैः प्रायतत चिरकालादेव यवनमनीषाऽपि स्वकीय-धर्मदर्शने वैदिकपरम्परया संयोजयितुम्. उपनिषदां पारस्यभाषान्तरणं विदधानो दाराशिकोह इदमेव मनसि समाकलय्य कुरानग्रन्थे 'किताबिम मक्नुनिन 'संज्ञया सङ्केतितचरं साहित्यमुपनिषद एव स्वीचकार. अथ च पारस्यभाषायां 'सिर्र ए अकबर' इति विश्रुतं तद् रहस्यान्तरमपि नान्यदुपनिषद्भ्य इति मेने.[1] अस्मिन्नेव प्राग्भावसंयोजनक्रमे यवनाधिराडकबरोऽपि मन्ये भूयसीं सचेष्टतामभजत्. कश्चन तदीयपारिषद्यः स्वप्रतिभया क्षेपकनिभामथर्ववेदस्य तामिमामनुच्छेदत्रयात्मिकाम् अल्लोपनिषदं व्यरचयत्.[2] रचनेयं सम्प्रत्युपनिषत्सङ्ग्रहे शाक्तोपनिषत्सु प्रथमस्थानभाक् प्रकाशिता सती सर्वत्र सुलभा वर्त्तते.[3] कतिपयपाण्डुलिपयश्चास्याः प्राचीन-ग्रन्थागारेषु रक्षिता विद्यन्ते.[4] अस्याः पदसङ्घटना सर्वथैव व्यतिरिक्ता श्रौतसाहित्यगद्येभ्यः संस्कृते निबद्धाऽपि कुरानपद्धतिमनुसरति. वैदिकसाहित्येऽमुष्याः साम्याविष्करणं कथञ्जन जटापाट-घनपाठयोर्मन्त्राणामवाप्येत, यथा हि- 'दिव्यानि धत्ते-धत्ते दिव्यानि दिव्यानि धत्ते. धत्त इलल इलले धत्ते धत्त इलले, धत्त इति धत्ते' इति प्रारभ्यते पाठः. आमुखवाक्यमल्लोपनिषदः क्वचित् पाण्डुलिपिषु गणेश-

---

1. वैदिक साहित्य और संस्कृति, बलदेव उपाध्याय, द्वितीय संस्करण, पृ. 324.
2. A Hindu courtier of Akbar went so far as to produce an apocryphal chapter of the Atharvaveda entitled the Allopanishad. (The history and culture of Indian people-The Mughal Empire-p.654)
3. Motilal Banarasidas, Varanasi,-2nd part, p. 392-393.
4. Dr. Buhler's catalogue of Sans, manuscripts from Gujarat p. 44

वन्दनात्मकम् ओङ्कार-श्रुतिपूर्वकञ्च विवेचितं शोधकर्तृभिः[1], किन्तु नादः प्रकाशितसंस्करणे समवाप्यते.

अत्र प्रथमानुच्छेदे तावद् अल्लाह इलल्-शब्दवाच्य इलले जगति मित्रावरुणाविव दिव्यन्तेजः सन्तन्वानो न्यायकृत् समुपवर्णितः.[2] गत्यर्थ-कादिल्धातोः अलच्प्रत्ययसंयोगात् सोऽयमिललशब्दः अन्तर्भावितण्यर्थत्वाद् विभुत्ववाचकतां सामान्यतया पुनर्जगदर्थं व्यनक्ति. पारस्यभाषायामपि ईल्पदेन आराधयिता इलाहशब्देन पालयिता अल्लाह्- संज्ञया च स्वयं विभुः समुपवर्ण्यते. पश्चिमदिक्स्वामी न्यायपरायणो वरुणः खलु अल्लाह-मान्यताभिर्बहुसाम्यं कलयति. अनुच्छेदेऽस्मिन् उल्लिखितो राजा पुनर्दुः (पुनर्दुष्यतीति पुनर्दुः) कश्चन पैगम्बराभिधानो दिव्यावतारः स्याद् उताहो कुरानग्रन्थस्य पञ्चविंशतितमे प्रकरणे चर्चिताया 'इलैहे युरददु'- गाथायाः प्रतीकपर्यवसायी सङ्केतः स्यात्.

अथ नमाजसन्ध्याने यवनसाधका अप्येतादृशीमेव आयतपदावलीं सर्वप्रथमं व्याहरन्ति-

बिस्मिल्लाहिर्रहमानिर्रहीम.
अल्हम्दोलिल्लाहे रब्बिल्लालमीन.
अर्रहमानिर्रहीम मालिके यौमिद्दीन.
ईयाकानाब्दो वईयाकनस्त अईन.
एहदिनस्सिरातल मुस्तकीमा.

वयन्तं दयातुन्दिलं कीर्त्तयामो
य एको विभुर्व्योमभूमीतलानाम्,
तमीशानकं न्यायिनं वासराणां
प्रयाचामहे श्रद्धया नम्रशीर्षाः.
नयास्मान् ऋजुप्रायणेनाध्वना त्वं

सिरातल्लज़ीना अन् अम्ता अलय् हिम्.सदैवाभिरक्षन् पथिभ्यः परेषाम्,

वैरिल् मग़द्बे अलेहिम.
वलद्दालीन[3].

पुरा येषु ते रोष-वज्राभिघात-
श्चिराय प्रभो सन्निपाताय जातः.

उपनिषदोऽस्या द्वितीयानुच्छेदे वर्णितं- यदहं पृथिवीं प्राप्तः. त्वञ्च

---

1. Mitra, Rajendralal: Journal of the Bengal Asiayatic Society, XLI (1), 1877, p. 170.
2. दिव्यानि धत्ते इलल इलले-वरुणो राजा-राजा पुनर्दुः -ह्वयामि मित्रो-मित्रस्तेजस्कामः तेजस्काम इति तेजः कामः-अल्लोपनिषद्/1.
3. कुरान 1/1

कदाचित् पृथ्वीं कदाचित् पुनर्वरुणरूपेण सूर्यमण्डले प्रतिष्ठितो बभासिषे. अस्माकं यज्ञाहुतिभि: सन्तुष्ट: सन् इन्द्ररूपेण, देवरूपेण विविधसप्तर्षिरूपैश्च त्वमेव दीर्घायुरस्मभ्यं व्यतार्षी:.[1] अत्र सम्भवत: 'सुय' इति पदेन कुरानग्रन्थस्य नवमप्रकरणे वर्णितस्य 'हज़रत शुएब', महात्मनो महासुरेन्द्रपदेन च दीर्घायुष्मतस्तेजस्विनो मूसामहात्मन: स्मरणमकारि परस्परधर्मसमन्वय-काङ्क्षिणा रचनाकृता, अथवा नमाजस्तवस्य सेयं द्वितीयायती रूपान्तरेण सन्दर्भिता स्यात्-

वमा उंज़िला मिनक़बलिक. **पुरा याऽवतीर्णा धरित्रीमुदारा**
वबिल् आख़िरते हुम् यूकेनून्. **प्रभूतर्षिसङ्घाय युष्मत्कृते च,**
उलाएका अला होदम्मिर् . **तदाज्ञां सदा न्यायत: शीलयन्तो**
रब्बेहिम व उलाएका हुमुल् मुफ्लेहून्.[2]**जना: सत्यनिष्ठा: कृतार्था भवन्ति.**

अन्ते च यथा मौहम्मदा 'हर सूरत के ख़त्म होने के बाद अल्लाह् अकबर कहना मुस्तहब है' इति विहितानुपालनं विदधति तथैवास्यामुपनिषदि चरमानुच्छेदे 'इलेलाकबर्ह: अकबर्होऽस्म्यकबर्होऽस्म्यकबर्होऽस्मीति' समापनस्वर: 'अहं ब्रह्मास्मीति' बृहदारण्यकवचस: संस्मारयति.[3] व्युत्पत्तिदृशा अकं दु:खं बर्ह: परिच्छदो यस्य स जीवोऽप्यकबर्ह:, तथैव अकं दु:खं बर्हते नाशयतीति परमेशोऽप्यकबर्ह: 'अविद्याग्रन्थिं विकरतीति' मुण्डकोपनिषद्-वचनात्[4]. किन्त्वल्लोपनिषदि महदर्थवाची अकबर शब्द एव अकबर्हरूपेण विनियुक्तो वर्त्तते.

अथच्छाद्मिकेऽस्मिन्नार्षसाहित्ये दध्म इति धातुरूपम् अजन्तवद्रूपमर्यम-शब्दस्य च वैयाकरणीमसावधानतामुपनिषत्प्रणेतु: प्रमाणयत:. तथापि सेयं पञ्चशतसंवत्सरपुरातनी अल्लोपनिषद् हिन्दुयवनसम्प्रदाययो: दैनन्दिनसमन्वय-परम्परायां प्राक्सोपानत्वमभजत.

---

1. अयामिलाम्.....इलां त्वं.....त्वमर्यमं वरुण:........ दध्म दीर्घायु: दीर्यायुरिति दीर्घ आयु:. होतारमिन्द्र: ....सप्त ऋषय इति सप्त ऋषय: संतुष्ट तुष्ट सं संतुष्ट तुष्ट देवा:. अल्लोपनिषद्/2
2. कुरान 1/2,
3. Akbar is described as a messanger of God and prophet rasul but not al-rasul, the prophet--- The Mughal Empire-p.654.
4. मुण्डकोपनिषद् 2/1/10.

साम्प्रतिकी लेखनी

आरण्यक-चेतनाऽनुरूप-रमणीयोद्देशेषु मध्यप्रदेशेषु महनीयतरा व्यराजत सुचिरं वाल्मीकि-कालिदास-भवभूति-राजशेखर-भोजराज-पद्मगुप्तादीनां विश्वसुरभिसाहित्य-निबन्धनबन्धुरा सुरभारती-परम्परा. तत्रैव "काश्चन लब्धप्रकाशाः काश्चन चाद्यत्वेऽपि पण्डित-कुलेष्वपण्डितकुल-दीपकानां सम्पत्तिरूपेण कर्पटबद्धाः कृमिभोज्यतामापद्यमाना बहुमूल्यसंस्कृत-ग्रन्थाः शश्वदुत्कर्णतया प्रतीक्षन्ते कस्यापि सहृदयगुणधरस्य शुभागमनम्". सेयं वैक्लव्यविधुरिताऽपि तथ्यपरा भणितिः कतिपय-वर्षेभ्यः प्राङ्."मध्यप्रदेशानां योगदानं" कलयन्त्यां सङ्गोष्ठ्यां विद्वद्भिरकारि.[1]

परं सम्प्रति क्रियमाणे मनाक् सर्वेक्षणे न मध्ये-मार्गं मन्दतामुपेयुषी प्रतिभाति निर्जरभारती. यदि पूर्वतोऽपि केवलं विगतविदर्भाः कलितविन्ध्यभोपालमध्यभारतसन्दर्भा एव दृश्येरन्, तथापि रचनासमीक्षण-सरण्योरतनीयो वितानं समन्तात् प्रमीयते.

इह स्वातन्त्र्यसमनन्तरमेव दतियावास्तव्येन पण्डितसुधाकरशुक्लेन विंशतिसर्गात्मकं गान्धिसौगन्धिकम्, द्वादशसर्गबन्धं भारतीस्वयंवरम्, स्वामिचरितचिन्तामणिश्चेति महाकाव्यत्रयी विरचिता. कविवरेण्येन तेन देवदूतमिति खण्डकाव्यं, इन्दुमतीसंज्ञा संस्कृतनाटिका, षोडशशतश्लोकाञ्चितम् आर्यासुधाकरं च व्यरचिषत. एतासु कृतिषु देवदूत- खण्डकाव्यं विहाय सम्प्रत्यपि सर्वा अप्रकाशनखर्वा अवसीदन्ति. समीक्षकैर्मुक्तारावं प्रशंसिता[2] अमूरपि सत्वरं प्रकाश्येरन्निति नः कर्त्तव्यम्. समुन्मिषति भारतीयस्वातन्त्र्यसूर्ये भोपालजनुषा डॉ. रेवाप्रसादद्विवेदिना सनातनेन समुपक्रान्तं सीताचरिताभिधं

1. संस्कृत साहित्य में मध्यप्रदेश का योगदान-पृ.1 -पी.डी.अग्निहोत्री

2. भाषा सर्वत्र सालङ्कारा बोधगम्या चास्ति. अर्वाचीनसंस्कृतमहाकाव्यानुशीलनम्. पृ. 102

महाकाव्यम्, यत्र निर्वासिताऽपि करुणामयी भूशयाना देवी राष्ट्रजननीव चारुतरं संचित्रिता-

हिमगिरिगुरुशृङ्गतः पयोधेर्गहनतमावटगह्वराणि यावत्
निखिलमपि निजार्यभूमिवक्षो निजमृदुतल्पममंस्त भूशयाना.

सीताचरितम् 6/42

मध्यप्रदेशानधुनापि देववाणीसविशेषान् विदधतो महाकवेरमुष्य वर्तते लोकलीलानिभालयितृ स्वातन्त्र्य-सम्भवमिति महाकाव्यं शतपत्रमित्यौ-पच्छन्दसिकवियोगिनीवृत्तयो रचितं मुक्तकं च. नाट्यानुशासनम्, काव्या-लङ्कारकारिकां, कालिदासशब्दानुक्रमकोषं प्रभूतपाठान्तरपरिष्कृताः कालिदास-ग्रन्थावली-प्रभृतीः कृतीरपि कलितवानसौ निरन्तरायं कृती.

अत्रैव सागरमध्युषितया डॉ. वनमालाभवालकरदेव्या ग्वालियरनगरी-संस्थया डॉ. स्मृतिजोगलेकरमहाभागया च राष्ट्रिय-सन्दर्भ-परिष्कृतानां भूयसामेकाङ्कि- नाटकानां नूतना मुक्तावलीव सुरभारत्याः कण्ठे समर्पिता[1]. सागर एव डॉ. अवस्थी बच्चूलालो देवीव्रतीयं नाम महाकाव्यं गुम्फति स्म सन्ततञ्च रचयतितरां प्रौढिपेशल-काव्यजातानि. डॉ. रामजी उपाध्यायो भारतीय-संस्कृतिनिरूपणपरायणान् ग्रन्थानतिरिच्यापि पाथेयं, द्वा सुपर्णा चेत्युपन्यासयुग्मकमरचयत्. डॉ. प्रेमनारायणो द्विवेदी संस्कृतरामचरितमानसं सौन्दर्यसप्तशतीसंज्ञया च बिहारीसतसईभाषान्तरणं कृतवान्. डॉ. राधावल्ल-भस्त्रिपाठी पुनः प्रेमपीयूषमिति नाटकं, महाकविः कण्टक इति नव्यामा-ख्यायिकाम् अन्याँश्च प्रख्या-सन्धानप्रभृतिकथा- काव्य-शोध-सन्दर्भाननारतं प्रकाशयत्येव.

नूतन-साहित्यपल्लवनदृशा जाबालिपुरवासिनोः कंसवधखण्डकाव्यप्रणेतू राजारामतिवारिणो गीतकारस्य डॉ. रहसबिहारि-द्विवेदिनश्च, ग्वालियर-मधिवसतो राधाष्टक-समस्यापूर्तिपञ्चाशिकारचयितुश्चक्रवर्तिपद्मनाभशास्त्रिणो जागरणमिति निजोपज्ञगीतसंग्रहं प्रकाशितवतो डॉ. शिवशरणशर्मणश्च,

---

1. ग्वालियर-नगरे कन्दलितसंवेदनच्छायं पृथुकायं स्तोत्रसमवायं जग्रन्थ गाडगिलो राजारामशास्त्री.

राजनाँदगाँवमण्डले युगप्रतिवेदनं प्रणीतवतः पं. कामताप्रसाद-त्रिपाठिनः, इन्दौरनगरी-निवासिनः करकमलानि शीर्षकेण सुरगवीकाव्य-संकलयितुः पं- गजाननशास्त्रिकरमलकरस्य, राजयोगिनी- खण्डकाव्यकृतो डॉ. प्रभाकर-नारायणकवठेकरस्य, सर्गषट्काञ्चितं महात्मगान्धिचरितं रचितवतो राजवैद्य-वीरेन्द्रस्य, प्रायश्चत्वारिंशद्गीतानि गुम्फितवतो डॉ. लक्ष्मणनारायणशुक्लस्य, गणाभ्युदय-नाटक-सङ्कटाष्टकस्तोत्रचन्द्रगुप्त- महाकाव्य-कबीरसाहस्र्याङ्ग्लरोमाञ्च-भाषान्तरणकृतः श्रीहरिहरत्रिवेदिनः, बिलासपुरे च विगतवत्सरेषु नव्यामग्निशिखाभिधां गीतरचनां प्रकाशितवत्या दीक्षितोपाह्व डॉ. पुष्पाया नामाङ्कनमपि नितरां नान्तरीयकं स्यात्.

मध्यप्रदेशानां नीमचमण्डलं मण्डयन्तोऽभवन् डॉ. श्रीनाथश्रीपादहसूरकर-महाभागा येषां प्रतिज्ञापूर्तिः, अजातशत्रुः सिन्धुकन्या, चेन्नम्मा, दावानल इति च पञ्चासतेऽसकृत् पुरस्कृतरचनाः, हरिषेणप्रशस्तिभास्वरं मन्दसौरपुरं पुनर्यशोविकस्वरं चक्रे त्रिभिर्गीतिसङ्ग्रहैस्त्रयोदशगद्यप्रबन्धैः पञ्चदश-काव्यग्रन्थैश्च त्रिपाठी डॉ. रुद्रदेवः. प्रस्तुत-पङ्क्तीनामङ्कयित्रा तु लक्ष्मीलाञ्छनं, सुतनुकालास्यमिति रूपके अजाशती-मृत्कूटाभिध-खण्डकाव्ये प्रायो नवतिसंख्यसंस्कृतगीतयश्च प्रकाशमनायिषत. सम्प्रत्यपि जागर्तीह काचन दिगन्तपरिमला काव्यस्फूर्तिः उज्जयिनीकृतवसतेः बलदेवचरितमिति महाकाव्यरचनापरस्य श्रीनिवासरथस्य गीतिषु,यत्र बन्धुरं लोकमुखं काव्यमुकुरे प्रतिबिम्बितं विभाति-

गुणानुरोधकारणान्न योग्यतापरीक्षणम्
प्रमाणपत्रदर्पणे कृतां सदाऽऽत्मतर्पणम्,
पराक्रमो न काम्यते न केसरी समीक्ष्यते
पदं च विक्रमोचितं प्लवङ्गमाय दीयते.

चेतना विलीयते.

स्वातन्त्र्योत्तरकाले संस्कृतसमीक्षणक्षेत्रेऽपि उज्जयिन्याः पं. सूर्यनारायणो व्यासः, रेवाया डॉ. राजीवलोचनोऽग्निहोत्री मिश्रो डॉ. जगदीशप्रसादश्च, भोपालकेन्द्रतो डॉ. प्रभुदयालुरग्निहोत्री, जोशी पं. ईशनारायणः पं. सुन्दरलाल-

स्त्रिपाठी च, काव्यशास्त्रपर्यालोचको मनीषी छत्रपुरनिवासी डॉ. हरिराममिश्रः तदानीन्तनरायपुरसंस्कृतमहाविद्यालयस्य प्राचार्यश्चतुर्वेदी प. सरस्वती-प्रसादश्च यं शोधपथं प्रथयाञ्चक्रुः सोऽधुनाऽपि सहस्रशिरा विन्ध्य इव सर्वथा तीर्थोन्नतः प्रथते.

भोपालनगरे कालिदासतिथिं परिष्कुरुते डॉ. रामचन्द्रतिवारी तुलनात्मक-भाषाविज्ञानं च सङ्कलयति डॉ.हीरालालशुक्लः, उज्जयिनीतो नाट्य - शास्त्रस्य नव्यं संस्करणं निबध्नाति पं. बाबूलालशुक्लः. इतः समग्रेऽपि प्रदेशे निर्धारितपर्वसु उज्जयिनी-रामगिरि-पद्मावती-त्रिपुरी-धाराऽऽम्रकूट- प्रीतिकूट-गोनर्दप्रभृतिसांस्कृतिकतीर्थप्रभाः परिचिन्वाना अनुसन्धित्सवः शब्दविदो लेखकाश्च सोत्साहाः समेत्य रचनासुरभीः प्रसारयन्ति.

मन्येऽचिरात् संकलयिष्यमाणे प्रादेशिक-संस्कृतावदाने प्रस्तुतविषयः साधीयोऽवदातचित्रं विन्देत्.

साहित्यविद्या न ह्रसेत्

अध्यापनं साम्प्रतिके युगे चिरसम्मानितस्य ब्रह्मयज्ञस्य[1] गरिमाणं न कलयति. विद्या विरहय्य पुरुषार्थचतुष्टयं लोकव्यवसायशीलावर्थकामावेव पुष्णाति. अस्मिन् पाश्चात्यप्रभावविरूपिते वातावरणे वराकाणां संस्कृताधीतिनां[2] शास्त्रपरिचयोऽपि सन्देहदोलामधिरूढः, का कथा यथाकाल-प्रगतिशील-विज्ञानोन्मुख-नवशास्त्रसमाहितसाहितीसर्जनानाम्? अथ किन्नाम साहित्यं कीदृशञ्च तच्छास्त्रं विषयेऽस्मिन्नद्यापि विवादः प्रचलति. शब्दकल्पद्रुमः सङ्केतयति-मनुष्यकृतश्लोकमयग्रन्थविशेष:साहित्यं यथा भट्टिरघुकुमार-सम्भव- माघभारविमेघदूतविदग्धमुखमण्डनशान्तिशतकप्रभृतयः. आचार्य-परम्परासु केचन मन्वते-शब्दार्थयोः सहितयोर्भावः साहित्यम्, अन्ये च व्याचक्षते-सहितानां काव्यानां परं भावः साहित्यम्.[3] आनन्दवर्द्धनस्वीकृतानां त्रयोदशाधिककाव्यप्रभेदानां[4] कृते साहित्यदर्पणतः स्वीकृतचरे साहित्यशब्दे प्रचलितेऽपि नैकमत्यं भजन्ते समीक्षकाः. उदाहरणार्थम् एके काव्यं (शाएरी), साहित्यं (अदब), कलां (फ़न) एतानि त्रीणि तत्त्वानि पृथक्त्वेन वाञ्छन्ति, गद्यं दाम्पत्यमिव निरुत्कण्ठं पद्यञ्च कौमारप्रीतिसदृशमुत्कलिकाप्रायं कलयन्तो 'यः कौमारहरः स एव हि वरः' इति श्लोकं निदर्शयन्ति-[5]

'शादी का बंधन सपाट और यकसाँ है, जैसे नस्र (prose) होती है. जवानी की वो बेबाक मस्ती व सरखुशी उसमें कहाँ-वो चितचोर जो मेरा

---

1. अध्यापनं ब्रह्मयज्ञः मनुस्मृतिः 3/70
2. आधुनिकसंस्कृतसाहित्यानुशीलनम्. आङ्ग्लखण्डः पृ. 31-35 डॉ. रामजी उपाध्यायः
3. देववाणी-सुवासः. प्रथमः खण्डः पृ. 4.062 डॉ. गङ्गाधरपण्डा
4. ध्वन्यालोकः तृतीय उद्योतः
5. शेर चीज़े दीगरस्त. अमीक़ हनफ़ी. मक्तब ए जाम्यां, दिल्ली

क्वाँरपन चुरा ले गया, आज वही मेरा शौहर बना हुआ है, चैत माह की वही रातें फिर आ गई हैं, वही जानी पहचानी हवा चमेली की खुशबू से लदी फँदी कदंब के दरख़्त से गुज़र रही है, मैं भी वही हूँ, फिर भी मेरा दिल चोरी-चोरी खेले गए प्रीत-प्यार के खेलों को तरस रहा है- जो रेवा के किनारों पर रतनजोत के पेड़ की छाँव में हम दोनों खेला करते थे.'

अपरे पुनः केवलां भावप्रधानरचनां साहित्यपदेन व्यपदिशन्ति. एस्टिॉटल्विनिर्दिष्टेन कलालक्षणेन-

'A faculty of production in accordance with a true idea'

संघटते तेषां साहित्यम्-कस्यचित् सत्यभावस्यानुरूपं मनः प्रवृत्तिकृतमुत्पादनमिति.[1]

एनामभिधाबाधां विलोक्य वाराणसीमनीषी सनातनो रेवाप्रसादः स्वकीयकाव्यालङ्कारकारिकायां लक्षणाबलेन साहित्यपदं बोधयितुं सन्दिशति-

भक्त्या काव्यं च साहित्यं, काव्यशास्त्रं तु दर्शनम्
साहित्यविद्याशब्दस्तु द्वितयेऽपि प्रयुज्यताम्.[2]

एवमेव साहित्यशास्त्रस्य पूर्वतः शास्त्रेष्वपरिगणितत्वाद् इदं 'शासनात् शास्त्रम्' अथवा 'शंसनात् शास्त्रम्' इति विषयेऽपि विवदमाना दृश्यन्ते विद्वांसः[3]

किं बहुना, प्रतिपदजागरूकसमीक्षासमागमे साहित्यागमे ध्वनिरसालङ्कारादीनां प्रमुखपारिभाषिकपदानामद्यत्वे परिवर्त्तितानि प्रत्यभिज्ञानानि, यानि चिरकुट्टितपाठ्यग्रन्थानामध्ययनेन नावगन्तुं शक्यन्ते. प्रयागसुधीः चण्डिकाप्रसादशुक्लो ध्वन्यालोकस्य दीपशिखाटीकायां विशदतया वैदुषीमाभिनवीं विधुरय्य ध्वनेः केवलं व्यञ्जककाव्यविशेषार्थं प्रतिपादितवान्[4]. द्विवेदी रेवाप्रसादो दर्शनसंघर्षमयं रसनिष्पत्तिप्रक्रियाविचारं दुग्धधारासु तक्रपातनं मनुते. तद्दृशा-

1. साहितीजगती. कालूरि हनुमन्तरावः, हैदराबाद् पृ. 42
2. काव्यालङ्कारकारिका 141, चौखम्बा सुरभारती प्रकाशन 1977
3. साहित्यस्य शास्त्रविचारः डॉ. गङ्गाधरपण्डा. देववाणी सुवासः 4.064
4. अथ कोऽयं ध्वनिर्नाम. पृ. 12 ध्वन्यालोकः, विश्वविद्यालय-प्रकाशनम्. वाराणसी.

काव्येऽलङ्कार एवात्मा स एवास्मिन् स्थितो यतः
अन्यकायस्थितो धर्मः किमन्यत्रात्मतां व्रजेत्?

अलम्भावो ह्यलङ्कारः स च सौन्दर्यतत्कृतोः
विभक्तात्मा विभुर्जीवब्रह्मणोश्चिद्घनो यथा.

किञ्च-

ध्वनिना सुरसाऽऽस्येन विपुलाभोगशालिना
निगीर्णं निखिलं त्यक्त्वाऽलङ्कारपवनात्मजम्.[1]

वस्तुतो नियतिकृतनियमरहितात्मनां काव्यानामनवधारणीयमपि रूपमवधारयन्तो भवन्त्येव सिद्धान्ताः क्वचिद् विसंवादिनः. तत्र तुलनात्मकं महदवधानं निर्णयक्षमत्वञ्च काम्येते शिक्षाक्षेत्रे. सम्भवन्ति नाम काव्यशास्त्रिणामनावश्यकदोषाविष्करणानि कवीनाञ्च निर्मर्यादाः प्रमादाः. प्रथमोदाहरणे यथा- काव्यप्रकाशकृता मम्मटाचार्येण वायुशब्दप्रयोगे निरर्थकमपानजुगुप्साऽऽविष्करणं विधाय 'मुग्धा कुड्मलिताननेन ददती वायुं स्थिता यत्र सा' इत्यश्लीलत्वेन समुदाहृतम्.[2] किमसावभिदधीत महर्षिवाल्मीकिं

ततो वायुः सुखस्पर्शो नीरजस्को ववौ तदा
विश्वामित्रगतं रामं दृष्ट्वा राजीवलोचनम्[3].

इति कवमानम्. अमुना आचार्येण वेणीसंहारस्य-

रव : श्रवणभैरवः स्थगितरोदसीकन्दरः
कुतोऽद्य समरोदधेरयमभूतपूर्वःपुरः.

इतिप्रभृतिपद्ये प्रसिद्धिहतत्वं समुद्भावितं यदत्र रवो मण्डूकादिषु प्रसिद्धो न तूक्तविशेषे सिंहनादे. इदमपि न समीचीनं प्रतिभाति काव्यकदर्थनम्.

---

1. काव्यालङ्कारकारिका. वृत्तिः 51, कारिके 26,28, वृत्तिः 17.
2. काव्यप्रकाशः उदा. संख्या 152.
3. वाल्मीकिरामायणम् 1.22.4.
4. काव्यप्रकाशः उदा. संख्या 242.

महाकविना भवभूतिना दुन्दुभिजन्यशब्दकृते[1] रवप्रयोगो विहितः राजशेखरेण च सिंहनादचीत्कारसन्दर्भयोरुपयुक्तो रवः-

यस्तस्यैष रवो रयेण विदधद् दिक्पालशून्या दिशः
क्रामं क्रामति रोदसि स्वयमयं तन्मेघनादः पुरः[2].

तथैव-

दोर्मूलद्वयपीडनाच्च कुरुते क्रुद्धस्तवात्रानुजो
दिङ्मातङ्गपराक्रमानपि कपीन् हाहारवस्यास्पदम्.[3] इति

द्वितीयोदाहरणानि कविप्रमादसन्दर्भाणि साम्प्रतिकसाहित्यात् प्रस्तूयन्ते. अद्य मुद्रणालयसौकर्यादहमहमिकया केचन निरङ्कुशाः कवयः सुरवाक्-सीमन्तसौभाग्यं श्रयन्ते, द्रष्टव्यम्-अवधेशप्रतापसिंहविश्वविद्यालये निर्धारितो घिमिरे कृष्णप्रसादशर्मो प्रयुङ्क्ते पदं 'प्रददातुम्' इति[4]. अहमदाबादवास्तव्यो हर्षदेवमाधवः पिङ्गलपाणिनी न बहु मनुते, यथा-

धूलिधूसर-पाण्डुरं गगनं पथि
मेघश्यामानां च छत्राणां गतिः.[5]

सागरसूरी राधावल्लभः सुतरामप्रयुक्तं वनस्य पुंसि व्याहारं करोति-वनस्तूष्णीम्भवतीति.[6] शिमलाप्रध्यापकोऽभिराजश्च क्षुद्रजलाशयेन हंसप्रमोदं वर्णयति-

मोदते नैव हंसो निपानं विना.[7]

---

1. आगर्जद्गिरिकुञ्जकुञ्जरघटानिस्तीर्णकर्णज्वरज्यानिर्घोषममन्ददुन्दुभिरवैराध्मात-मुज्जृम्भयन्. उत्तररामचरितम् 5.6
2. बालरामायणम् 8.18
3. तत्रैव 8.55
4. गौरीगिरीशम्. काठमाण्डू- 2, नेपाल. पृ. 19
5. दूर्वा-28, पृ. 23. म.प्र. संस्कृत अकादेमी, भोपाल
6. तत्रैव पृ. 57
7. मृद्वीका पृ. 44. वैजयन्तप्रकाशनम्, इलाहाबाद

अवाचकमत्र विवक्षितार्थे निपानं कालिदाससाहित्ये-

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितम्[1] इति

स्थिरतुरङ्गमभूमि निपानवन्मृगवयोगवयोपचितं वनम्[2] इति च मलीमसपल्वलार्थे रूढत्वात्.

एवं निष्कर्षतः सुचिरादनारतं प्रवर्त्तमानाया विश्वशेमुषी-निकषभूतायाः संस्कृतसाहित्यविद्याया अवगमनार्थं गुरुशिष्ययोः स्तरीया वैदुषी, तुलनात्मकमध्ययनं नूतनगवेषणापरिचयश्च नान्तरीयकाणि तत्त्वानि ह्रसन्ति, भूयो न ह्रसेयुः.

साहित्यं स्नेहसर्वस्वं स्नेहः सांसारिकी सुधा
रक्षितुं तत् सुधापात्रं प्रार्थ्यन्ते पात्रसूरयः.

1. अभिज्ञानशकुन्तलम् 2.6
2. रघुवंशम् 9.53

रामकथायां प्रयोगधर्मा भवभूतिः

नवनवोन्मेषशालिनी प्रज्ञा काव्यशास्त्रेषु प्रतिभाऽभिधानेन सङ्केतिता[1]. तयैव च प्रतिभया विशदितसारस्वतशेमुषीकः कविः प्रयोगधर्माऽपि व्यपदिश्येत. प्रायः समे कवयः कलया प्रयोगधर्माणो भवन्तिं. किन्तु संस्कृतसाहित्येतिहासे विजयते सर्वङ्कष-नूतनकल्पना-विजृम्भित-रचनारोदसीको महाकविर्भवभूतिः.

सामान्य-शब्दकृतः अप्रचलितकथासु शुक-शशकहरिणबहुलासु शापाग्निदाहप्रभृतियुक्तिभिः कर्हिचित् परिवर्त्तनानि विदधते, परन्तु विश्वमानसे गहनतया प्रविष्टायां रामकथायां परीवर्त्तपेशलां तूलिकां कलयितुं चक्षमे भवभूतिरेव.

भासेन किं कृतम्? कैकेयी वाल्मीकिना कलङ्कपङ्कैरङ्किता, तेनापि सा तथैव निन्दादरिद्रित-मातृपदवीका वर्णिता-

मम मातुश्च मातुश्च मध्यस्था त्वं न शोभसे

गङ्गायमुनयोर्मध्ये कुनदीव प्रवेशिता.[2] इति.

कालिदासेन कुमारदासेन वा न दरसाहसं कृतम्, किमपि नवभङ्गिम्नाऽभिधातुम्. रघुवंशे दशरथस्य पलितकेशा अपि कैकेयीसन्निधानतो बिभ्यति. वर्त्तते कालिदासस्य परम्परापूजितेयं सूक्तिः-

तं कर्णमूलमागत्य पलितच्छद्मना जरा

कैकेयीशङ्कयेवाह रामे श्रीर्न्यस्यतामिति[3].

---

1. यथाह रुद्रः 'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता' शब्दकल्पद्रुमः 3/258
2. प्रतिमानाटकम् 3/17
3. रघुवंशम् 12/2

एतस्यां रघुकुलविसंवादजर्जरायां स्थितौ स्वीकृतभक्तिवर्त्मा[1] भवभूतिः सर्वप्रथमां लोकप्रियतासमुल्लेखिनीं नाट्यलेखिनीं प्रतुष्टाव. तदीये महावीरचरिते चिराय कन्यारत्नत्वेन[2] सीतायै स्पृहयतो रावणपक्षस्य निबन्धनीकृतो रामादीनां वननिर्वासने दुरभिसन्धिः. अत्र मिथिलायामुपन्यस्येते द्वे नवीने घटने. प्राक् परशुरामः समुपैति रक्षोमन्त्रिणा माल्यवताऽभिप्रेरितः. यतो हि पूर्वोत्तरभारते विहितो धनुष्टङ्कारो न वैज्ञानिकदृशा श्रूयेत आरव्यसागरसमुदिते महेन्द्रपर्वते अतस्तर्कपूर्णेयं योजना कविवरेण विहिता. पश्चाच्च रक्षःप्रेरिता शूर्पणखा मन्थराशरीराविष्टा सती कृत्रिम-दशरथलेखं समादाय प्रादुर्भवति-

अस्त्वेकेन वरेण वत्सभरतो भोक्ताधिराज्यस्य ते
यात्वन्येन विहाय कालहरणं रामो वनं दण्डकाम्,
तस्यां चीरधरश्चतुर्दश समास्तिष्ठत्वसौ तं पुनः
सीतालक्ष्मणमात्रकात् परिजनादन्यो न चानुव्रजेत्.[3]

लेखादेशं प्राप्य मर्यादाकल्पद्रुमो रामः स्वयमपि दण्डकाप्रवासार्थं पर्युत्सुकत्वात्[4] सीतालक्ष्मणसखः प्रतिष्ठते.

मुरारि-राजशेखरादि-पश्चाद्वर्त्तिकविभिः समर्थितेयं कथायोजना तथा भारतीयसंस्कृतिसमानान्तरा मर्यादापरा प्रावर्त्तत, यदुद्धतजगत्त्रयमन्युमूला[5] सञ्जाता. ईषन्मसृणैः प्रसङ्गपरिवर्त्तनैः अवष्टम्भगम्भीरगुरुका उपन्यासाः प्रस्तुताः[6], उदाहरणार्थ-प्रचलितायां रामकथायां मिथिलानगरे मध्येस्वयंवरसम्मर्दं महर्षिविश्वामित्रो रामलक्ष्मणाभ्यां सह याति. एतादृगनामन्त्रितप्रवेशि याच्ञाकदर्थितं ब्राह्मतेजो नानुमतं भवभूतिना- येन महावीरचरिते सीतोर्मिलाभ्यां समं यज्ञनिमन्त्रितो राजा कुशध्वजः स्वयञ्च शम्भोर्वरादनुध्यानमात्रोपस्थानदायि[7] शाम्भवं धनुः सिद्धाश्रमम् उपेत्य विवाहभूमिकां सूत्रयतः.

---

1. भक्तस्य तत्र समरंसत मेऽपि वाचः. महावीरचरितम् 1/7
2. तत्रैव 1/30
3. " 4/41
4. " 4/42
5. महावीरचरितम् 1/6
6. तत्र द्वितीयाङ्के (पृ. 66)
7. तत्रैव 1/52

वस्तुतो भवभूतिमहाकवेः कृतिषु भारतीयतपोवनानाम् ऋषीणाञ्च यादृशः सांस्कृतिकगरिमा समुन्मीलितः, न तथा कस्यचिदन्यस्य रचनासु. महावीरचरितं विश्वामित्रेण, श्रमणया अगस्त्येन च सञ्चाल्यते, मालतीमाधवं सकलं पद्मावती- विद्यापीठेन नियोज्यते उत्तररामचरितं पुनः करुणापीयूषपात्रीक्रियते भगवता भूतार्थवादिना[1] वाल्मीकिना.

अपूर्व-प्रबन्धकौशलसमन्विते[2] महावीरचरिते हेमाब्जमालिनं बालिनं न पम्पातीर-तरुराजिषु निलीय रामो निहन्ति. उभावत्र युद्धस्थलीमवतीर्य विक्रमचेष्टितानि वितन्वाते[3]. कबन्धो न रामलक्ष्मणौ कर्षति, स हि श्रमणां शबरतापसीं कर्षति[4]. अथ कल्प्यमानेषु भूरिनूतनप्रयोगेषु द्वित्रा वदतोव्याघातदोषा अपि प्रतिभान्ति. प्रथमः प्रबन्धाभिधाने सङ्केतनीयः. महावीरो रामः स्यात्-तस्य चरितं महावीरचरितम्. परमत्र प्रायो दशाधिकवारं बाली महावीरः कथितः[5] सेयम् अङ्गविस्तृतिः. द्वितीयो बालियुद्धसन्दर्भे चिन्त्यः. यदि महावीरचरिते रामः प्रत्यक्षयुद्धं करोति, तर्हि कथमुत्तररामचरिते चन्द्रकेतुमुपालभते लवः -यद् वा कौशलमिन्द्रसूनुनिधने तत्राप्यभिज्ञो जनः[6] इति. तृतीयश्च पुनः पूर्वकथासु यदि नाम मिथिलातः प्रव्रजन्तौ सीतारामौ वर्णितौ- तत् कथं भक्षितेऽपि लशुने न शान्तो व्याधिः उत्तररामचरिते वाल्मीकिकथामेव परामृशन् दर्शयति चित्रवीथीं लक्ष्मणः- विवाहदीक्षिता--एते वयमयोध्यां प्राप्ताः. रामश्च सास्त्रं भाषते-

स्मरामि हन्त! स्मरामि.
जीवत्सु तातपादेषु नूतने दारसङ्ग्रहे
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः[7].

---

1. उत्तररामचरितम् (पृ. 391) सप्तमोऽङ्कः
2. महावीरचरितम् (पृ.7) प्रस्तावना
3. तत्र पञ्चमाङ्के (पृ.232)
4. तत्रैव 5/27,29
5. यथा- 'ममाप्यस्मिन् महावीरे सोत्कण्ठमिव मानसम्'. 5/36
6. उत्तररामचरितम् 5/35
7. तत्रैव 1/19

अस्तु नाम, आर्षप्रतिभापरिपाकमहिते[1] उत्तररामचरिते दरपरिवर्त्तिता स्यान्महाकवेर्मान्यता. तस्मिन् वासगृह शृङ्गार[2]-चित्रवीथी[3]-वन्यसुषमा[4]-वासन्तीव्यङ्ग्योक्ति[5]-वात्सल्यसम्पत्[6]-करुणसंवेदना[7]-करम्बिते पद्मपुराण-प्रतिबिम्बिते[8] विश्वचेतनाभरिते उत्तररामचरिते का न विलसति चतुराननरचनेव नवला नाट्यप्रयोगकला यया सीतारामयोः प्रकृतिपुरुषयोरिव पुनः सम्मेलनं सम्पाद्यते.

1. उत्तररामचरितम् 1/2
2. तत्रैव 1/27,34-38
3. '' 1/13-33
4. '' 2/20-25
5. '' 3/26-28, 37
6. '' 3/15-19, 6/12-13,21-28
7. '' 3/1, 47
8. पञ्चदशशताब्दीपर्यन्तं पद्मपुराणे प्रक्षेपा योजिता इति परवर्ति तत्. कामिलबुल्के -रामकथा, उत्पत्ति और विकास-अनु. 162

काव्यरसमयो वारिप्रवाहः

ऋक्षशैलोत्सङ्गादुच्छलन्ती शिवसुता नर्मदा सम्प्रत्यपि हरजटाह्वयाद् वंशस्तम्बात् प्रसूयमाना लोकैः साहित्यकृद्भिश्च नयनाञ्जलिपुटपेया स्तूयतेतराम्. प्रहेलिका- रूपेण सेयं परामृष्टा राजशेखरीये बालरामायणे-

कीदृक् केलिकलस्य किल भवति सखी सुखधाम
का च सुता शशितिलकस्य विन्ध्यमहीधरधाम?

द्वयोरपि प्रश्नयोरेकमेवोत्तरम्-नर्मदा. अस्याः संस्कृतिस्त्रोतस्विन्याः कन्यारूपं योगमाहात्म्यमण्डितं प्रशस्यते. तथा हि स्कन्दपुराणे रेवाखण्डे युधिष्ठिरो मार्कण्डेयमहर्षिं पृच्छति-

का सा पद्मपलाशाक्षी तमोभूते महार्णवे
योगिवद् भ्रमते नित्यं रुद्रजां यां त्वमब्रवीः[1].

तत्र च मार्कण्डेयो मनुप्रामाण्यात् कथयति यदियं तपोलीनस्य शङ्करस्य स्वेदामृतेभ्यः समुद्भूता अमृतसम्भवा[2]ऽपि निगद्यते. अमरकण्टकतीर्थे समुत्पन्ना नर्मदां ब्रह्मचारिणी तपस्विनीव व्यालयज्ञोपवीतिनी[3] विलसति. केवलं महाप्रलयकालेषु गोस्वरूपमेषा प्रतिपद्यते. तदानीञ्च-

हंसकुन्देन्दुसङ्काशां हारगोक्षीरपाण्डुराम्
नानारत्नविचित्राङ्गीं स्वर्णशृङ्गां मनोरमाम्.
खुरैः प्रवालकमयैर्लाङ्गूलध्वजशोभिताम्
प्रलम्बघोणां नर्दन्तीं खुरैरर्णवगाहिनीम्[4].

---

1. स्कन्दपुराणम् /रेवा./83-6
2. तत्रैव 83-12.
3. तत्रैव 87-35, 88-25.
4. तत्रैव 92-3, 4.

इत्यादिरूपेण तां कर्हिचिदवेक्षन्ते चिरजीविनः. विविधसाहित्यधारासु नर्मदाया निसर्गरमणीयम् आम्रकूटे बिन्दुनिपातजर्जरं, वापीकुण्डमनोहरं, दुग्धोज्ज्वलप्रपातबन्धुरं पुनरग्रे स्फटिकोपलतटविशिष्टं, जम्बूकुञ्चप्रतिहतरयं, वेतसीतरु-लतागुल्मपरिक्षिप्तरोधःसौन्दर्यसमन्वितं, निकषा च खम्बातखातं समुद्रप्रान्तं विशालजलप्रवाहपेशलमस्याः स्वरूपं विविक्तिवर्णसाधनाभिरङ्कितं विराजते.

लोकेषु किंवदन्तीयं प्रचलति यत्पूर्वमियं गिरेराम्रकूटादेव प्रादुर्भवन्तं शोणमहानदं कामिनीव कामयामास. शोणमाकारयितुं ज्योतीरथाख्यां लघुसरितं नापितवर्णां तरुणीं दूतीमिव सम्प्रेषितवती. सा ज्योतीरथा (सम्प्रति जोहिलासंज्ञा) शोणेन समं स्वयमेव रेमे. एतद् विज्ञाय देवी नर्मदा व्यङ्ग्यात्मकमुपालम्भकदम्बकं प्रादात्, स्वयमाजीवनकुमारीत्वञ्च प्रतिज्ञाय दिशाऽपरया प्रसुस्राव-

संस्कृते **निः शेषच्युतचन्दनं स्तनतटम्**----इत्यादि

प्राकृते **दूइ तुमं विअ कुसला कक्खउमउआइँ जाणसे बोल्लुं**
कण्डूइअपण्डुरं जह णं होइ तह तं करेज्जासु.[1]

लोके च ऋक्षशैलान्तिकवर्तिनि भूयांसि दूतीदुश्चरितगीतानि सदृशान्येव राराज्यन्ते (द्रष्टव्या-सुभाषितहारावली 1880) एनां बहुशाखगीतस्तुति-माधुरीं श्रावं श्रावं शङ्कराचार्योऽतितरां प्रभावितो बभूव. तेनाभ्यधायि-

अहोऽमृतं स्वनं श्रुतं महेशकेशजातटे
किरातसूतवाडवेषु पण्डिते शठे नटे,
दुरन्तपापतापहारि सर्वजन्तुशर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे.[2]

सेयं सरिदुत्तमा शिवकन्याऽपि सती स्वतपोमहिम्ना साक्षात् शिवस्वरूपा[3],

1. (दूति त्वमेव कुशला कर्कशमृदुकानि जानासि वक्तुम्
कण्डूयितपाण्डुरं यथा न भवति तथा तं करिष्यसि.) गाहासत्तसई 2.81
2. नर्मदाष्टकम्-8.
3. अथैवमुक्तस्तां देवीं धूर्जटिर्नीललोहितः
ॐ हुं फट् त्वं स इत्याह कोपाविष्टैरथेक्षणेः.
स्कन्द. रेवा.87-31.

जगदम्बिका[1] शिवत्व-विधायिका च मनीषिभिः स्वीक्रियते-

यत्रोपलाः पुण्यजलाप्लुतास्ते
शिवत्वमायान्ति किमत्र चित्रम्.

इति स्पष्टतया विवृणोति स्कन्दपुराणम्[2] अर्थाद् येऽप्युपलाः प्रस्तरखण्डाः खरतरधारे नर्मदावारिणि निपतन्तिते शिवत्वं शिवलिङ्गस्वरूपमहिमानं प्राप्नुवन्ति. अस्यैव 'उपल' शब्दस्य प्रयोगो रेवासन्दर्भे महाकविना कालिदासेनापि मेघदूते विहितः-

रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य'. इति

'उं शम्भुं पलतीत्युपलः' इति व्युत्पत्त्या शिवत्वविधायकानां शुभ्रभूतिस्वरूपाणां प्रायः स्फटिकोपलानाम् उपलसंज्ञा निश्चीयते. अनेन च सङ्केतेन मेघदूतस्य आम्रकूटतो जाबालिपुराभिमुखी यात्राऽप्यनुनर्मदाकच्छं प्रतिभासते.

अस्याः पुण्यसरितो वारिप्रवाहः काव्यरसमयः पर्यन्तभागस्तीर्थमयः स्निग्धशिलापेशला तटद्वयी च शीलासूक्त्या[3] संवलिता रागमयीति के न विदन्ति जगति शर्मदां नर्मदाम्.

---

1. तत्रैव
2. तत्रैव ८३-10.
3. रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते. सुभाषितहारावली -1850 गङ्गानाथझा केन्द्रीय संस्कृत विद्यापीठ ग्रन्थमाला-19

मध्यप्रदेशीया लोक-कला

अन्यथाख्यातिः

जनाः प्रायशो भेदबुद्धिं बिभ्रति मध्यप्रदेशीय उदात्तआभिजात्य-कलारूपेऽत्रत्यलोक-जनजातिशीलितकलारूपतः. जनजातिकलाकृतो मन्यन्ते गौणहस्तशिल्पेषु काष्ठमृत्तिकादिनश्वरवस्तुमयेषु दक्षा अदक्षाश्च भित्ति-चित्रपाषाणवास्तुप्रभृति-कमनीय कलारूपेषु. अथ चादिवासिकला सदयावज्ञं रूक्षवर्णा, सन्तुलनविधुरा, गलितगाम्भीर्या सम्यगुन्मीलनविरहिता कर्हिचिद् घृणया चाकुतोमुखी सुतरामसंबद्धा दानवीयवीथीव विलोक्यते.

मध्यप्रदेशीय-जनजातिकलाया ईदृग् विकृतदर्शनं तत्पुरातत्त्व-परिज्ञानाभावादेव समुदेति. नैतदवगम्यते यदर्वाचीनजनजातिकलाकृतामेव पूर्वजा भारतीये केन्द्राजिरे भव्यानि कला-वास्तुस्मारकाणि पुरोत्थापितवन्तः. तदानीं साम्प्रतिकीव ग्राम्यादिवासिनां कला दैनन्दिनी समूहस्फूर्तिर्बभूव न वैयक्तिकी प्रवृत्तिः. लोककलाकारः कदापि ललित-गौणकलयोर्न भेदबुद्धिं दधार. अङ्गभूतं स्वमाकलयन् सामुदायिकादर्शमितव्ययितापर्यावरण-स्वस्तिभावानां प्रकटीचकार स कलां कलितां धर्मजनरुचिभ्यां समुपयोगालङ्कृतिभ्याञ्च. साम्प्रतिक आदिवासी न चेन्निर्माति प्राग्विधानि भव्यकलास्मारकाणि तत्र हेतुरनुपलभ्भो विद्यमानसमाजतः सदृशवस्तु-विचार -संश्रयाणाम्. सत्युपलम्भे तदीय- कलाकौशलं भूयोऽपि जागृयात्.

मध्यप्रदेशस्य पुरातन-लोककलाकृतो नर्मदा-वेत्रवतीचर्मण्वतीन्द्रावती-सरित्तीरेषु कैरमालि-सह्य-विन्ध्यचित्रकूटाद्रीणामसंख्यशैलाश्रयेषु स्वकीय-कलाचिह्नानि विसृष्टवन्तः. नदीनां क्षिप्रधारया दीर्घगामिभूक्षरणोन्मीलितो-पत्यकासु सङ्कटासु रचिताः शैलाश्रया अमीषामाखेटमार्गणे, यायावरक्षणशरणे, विविधोपकरणगोपने, नाट्यविलासकर्मणि, सुरतव्यापारेऽभिचारे च सहायभूता

बभूवु:. तेऽभवन् वीतभया: स्वैरविहारिण: प्रद्विषतोऽगम्यरूपस्य विशाल-भूतलस्य कोणभागे संघर्षपरायणा:. हिंस्रपशुसङ्कुले पुरोवर्त्तिभयकृद्वातावरणे द्रुततरदैनन्दिनीमतिवाहयन्तस्ते खलु प्रमोदमय-सुरक्षासौन्दर्ययोरनुभवन्ति स्म विभ्रमम्. एतदन्तराले सहजानुभूतिविकस्वराणि दृश्येन्द्रजाल-भिषगथर्व-विषवैद्य-विश्वम्भराणि विलक्षणतराणि चित्रणि तेऽरीरचन्. न ते गतं शोचित-वन्तो न चाभवन् स्पृहयालवोऽनागताय. द्वाभ्यां विरतास्त एकायामिनीं निजानुभूत-निसर्गनिकटां रूपबाह्यरेखाङ्कनमयीं प्रतिबिम्बातिरिक्तच्छा-याङ्कनमनोरमां कलां कलितवन्त:.

एतादृशा: पर:शतमभिचित्रितशैलाश्रया वेत्रवत्या उद्गमक्षेत्रे सतकुंड-खरबई-भीमबेटका-डिगडिगा- श्यामलास्थानेषु प्राप्ता:. नर्मदाचर्मण्वत्योरञ्चले च पँचमढ़ी, आदमगढ़, पिपरिया, बोरी, पट्टन, मोड़ी, भानपुराऽऽस्पदेषु संस्थिता: सन्ति. एतदतिरिक्तममी निकषा कटनीं भिंभरीस्थले, नरसिंहपुरस्य प्रेमशाहीक्षेत्रे, रायगढस्य सिंहनपुरे, बस्तरमण्डलस्य बड़ादोनगरेऽपि प्राप्यन्ते. एतेषु लगुडहस्तानामाखेटसम्मर्द:, समूहनृत्यम्, पशु-पादप-पर्वत- त्रिशूलचन्द्रशकलच्छत्रस्तम्भादय: पूज्यमाना उर्वरवनस्पतयश्चाङ्किता भूरिश: साहसोद्दीपन- सदिच्छा-कृतज्ञताभ्य:. मध्यपाषाण-ताम्रपाषाणकालयोरमीषु चित्राङ्कनेषु दयाबहुला लोकच्छवि-रुत्कीर्णा वर्तते, यथा कठौतिया-जावरास्थानयो: पारदर्शिविधया फलसम्भृत-करण्डिका:, छिद्रोन्मिषिता मूषका: सवत्सा मातरश्च.

क्वचन सरगुजावर्त्ति-सीताबेंगरा-जोगीमरहाप्रभृतिशैलाश्रययो राजेते ख्रिष्टपूर्वद्वितीयशताब्द्या ब्राह्मीशिलालेखौ ययोरेको भारतवर्षस्य प्राचीनतमायामर्धवृत्ताकार-शिलाखण्डीयनाट्यशालायां काव्यकौशलस्य प्रशस्तिगाथा वर्त्तते सम्भवतोऽपरश्च नृत्याङ्गनाया: सुतनुकाया देवदीना-ख्यरङ्गकृता सह प्रणयगाथां विवृणोति. भीमबेटकाञ्चलेऽस्ति मौर्यकालीनो ब्राह्मीशिलालेख:, यस्मिन् गुहाया: स्वामी सिंहकनामा निगदित:. एकश्चान्य: ख्रिष्टपूर्वद्वितीयशताब्दी- समुट्टङ्कित: शिलालेख: शिवपुर्याष्टुण्डाभर-कास्थलेऽवापि यस्मिन् शिवकाशीसंज्ञस्य कौशिकपुत्रस्य कस्यचन परमविष्णुभक्तस्य चित्रकलाया उल्लेखो विभाति. पूर्वभीमबेटकाऽऽदम-गढ़मोदीवर्त्ति-पूर्वताम्राश्मकालीनस्तराणां विषये कार्बन-चतुर्दशपरीक्षणैर्ज्ञायते

यदयं कार्यव्यापारः ख्रिष्टपूर्वाष्टसहस्राब्दतो द्विसहस्राब्दीमध्ये समजनि. क्वचिदथ पञ्चमशताब्दीभवबाघादिगुहासु बौद्धसंघसाहाय्येन ललिततयोत्कीर्णा आदिवासिभिल्लकलाकारपरिशीलितप्रगतिशील- कलाशास्त्रपरिचायिका आरम्भिक- शैलकला-सरलाकृतिभिन्ना आकृतयः प्रकाशच्छायाविच्छुरिताः. कलाकृतो मध्यप्रदेशस्य समयैव निजावासान् विशाल-शिल्पस्थापत्य-निर्माणकेन्द्रषु कार्यरता बभूवुः. अमी प्रस्तरानितरबहुमूल्यधातूँश्च ज्यामितीयाकृतीर्ददतो निजायुधानुपकरणानि चारचयन्-सरलवर्त्तुलान् परश्वधान्, लवित्राणि, पत्राणि, क्षुरप्रान्, वृत्तद्रुघणान्, आरम्भिक-पुरापाषाण-मध्यपाषाणकालयोरुन्नत- चत्वराणि, सिद्धमृत्स्नाऽऽकारित मातृकाः, नरपशु-संयुक्ताकृतीर्मानवरूपाकृतीः, कमण्डलून्, बृहद्-भाण्डानि च रमणीयमृगपुष्प-चित्राङ्कितान्युताहो समुत्कीर्णपशु-गुटिका-कौशुकानि.वस्तून्यमूनि नर्मदा-तटवर्त्ति-भेड़ाघाटे, तिलवाराघट्टे लेमेटाघट्टे, चोली-डोंगरगाँवस्थलयोरन्यत्र च पुरातात्त्विकवस्तुगवेषणार्थं समुत्खन्यमानेषु स्थानेषु प्राप्यन्ते, यथा-खरगौनस्थ-नावड़ाटोली-मन्दसोरान्तः पाति-मनौत्यानराराजगढ़वर्त्ति -कुरावर-धारान्तर्गतचिकलवा-इन्दौरस्थाजाद-नगर-उज्जयिनीगत-कायथा-वेश्या-टेकड़ी-दंगवाड़ा-रायसेनमण्डलान्तः पाति-पिपल्यालोरका-नादूर- भिण्डस्थ-गिलोलीखेड़ा-ग्वालियर-वर्त्तिजदेरुआ-देवासान्तिकनागदा- जबलपुरस्थक-करहटादुर्गपाति-पसेवा-बिलासपुरमण्डलान्तर्गतमल्हा रास्पदानि.

आरम्भिकी बौद्धकालीन-कला

आदिमजातीयमध्यप्रदेशानाम् ऐतिहासिकी कलाऽभिव्यक्तिः काष्ठ-मृत्स्नागजदन्तादिनश्वरोपादानेषु समपद्यत. पश्चादैतिहासिकयुगेऽत्र प्रवृत्ते बौद्धकाले तथागतसन्देशा एव स्थास्नुपाषाणेषु लेभिरेऽभिव्यक्तिम्, येषु बुद्धचिह्नानि मूर्त्तिनिर्माणप्रक्रियारम्भे प्रतीकरूपेणाङ्कितानि सन्ति. आरम्भिक-बौद्धकलाया जीवाङ्कुरवादिनः प्रतीका विलसन्ति-कमलवृन्तम्, जीवनतरुः, कलशोन्मेषिणी लता, शङ्खः, मकरमुखम्, यक्षनाभिः, व्यालसर्पो, गन्धर्ववृक्षकः, शुभचिह्नभूते सिंहासनच्छत्रे, स्वस्तिकः, प्रणयियुगलम्, किन्नरो यक्षः, कुम्भनदासो गन्धर्वः, विद्याधरः, आतपघटिका वेतालादयोऽन्ये चाश्वहस्ति-बलीवर्दहंसप्रभृतयः पावनपशुपक्षिणः प्राग्भवेऽस्मिन् कलाभाण्डारे. सममभीभिः

शास्त्रीय- कलायामारम्भिक्यां शाश्वतरससिद्धान्तमहिम्ना द्रढिमानमादिवा-सिविश्वासोऽवाप समादधे चासौ चक्रेऽस्मिन् पादपेषु रसान्, जीवधारिषु वीर्याणि, पयांसि, वर्षाः, मधूनि मैरेयाणि च. प्रतिपत्तिरीदृशीयं यत्र जन्मपुन-र्जन्मनी-ऐन्द्रिय इन्द्रियातीतोऽनुभवश्च भजेते एकाकारताम्.

आरम्भिकीयं बौद्धकला मूलतो भारतीया पुरातनस्फूर्त्तिर्या बौद्धधर्मस्वरूपं प्रपेदे. धर्मसंघसम्बद्धाऽपि कलेयमैन्द्रियप्रमोदमूलकं सन्देशं प्रदत्ते. परिनिर्वृत बुद्ध- तत्सधर्मस्मृतिरचिताः स्तूपा अपि स्वपरिवेशैराशासु जीवनं प्राणतत्त्वञ्च प्रतिरूपयन्ति. भारहुते लघुरूपा सङ्कोचाङ्कितेयं कला साँचीस्थले प्रौढरूपा मानव-पशु-प्रतिकृतिषु सहजाध्यात्मिकसंवेदनबाह्य-भौतिकचमत्कारमयी स्थूलतया प्रायः पाशविकीव भक्तिसाक्षात्कारसङ्केतविधुराऽवलोक्यते. औदीच्यार्यबौद्धिकताया बौद्धचिन्तनगत-विवेकसम्मतदर्शनस्य वा प्रागा-विर्भावत इयमैन्द्रियताप्रवृत्तिर्दक्षिणोद्गता स्ट्रिज्योगोवस्की-कुमारस्वामी -क्रेम्रिशैर्मन्यते. अनन्तरं ख्रिष्टवर्षारम्भतो मध्यप्रदेशीय आदिमाञ्चलकला-विकासः किञ्चन शैथिल्यमापेदे. असौ प्रमुखतयेन्दौर-भोपाल-ग्वालियर-रायपुर-जबलपुरसंग्रहालयेषु प्रदर्शितचरीषु गुप्तपूर्वमुद्रास्वेव परिलक्ष्यते. पुनरस्यां दिशि सक्रियताऽऽगता चतुर्थख्रिष्टशताब्द्या उत्तरार्द्धे प्रारम्भे च पञ्चमशताब्द्या गौरवमये गुप्तकाले. उदयगिरेः कन्दरामूर्त्तयः, बेसनगरस्य मातृकाः, साँचीवर्ती सिंहप्रतीकः, बस्तरस्थधनौराञ्चलीय-विष्णु-द्वारपालमूर्त्तयः, तत्रत्यभोङ्गपालस्थनिषण्णबुद्ध- प्रतिमा चैतत्कालीना एव सन्ति. एतासु प्रशस्तस्कन्धासु वीरोचितभावभङ्गिमाञ्चितासु यथापूर्व मर्यादानुभूतयो वपुराभाश्चावेक्षितुं शक्यन्ते, किञ्च प्रभातोन्मीलिताभ्यामिव समुन्मिषिताभ्यां समाधिकेन्द्रिताभ्यां नयनाभ्यां देहमुद्रया च तरलितयेव वक्ररेखाञ्चितया सद्यःप्रतीयते यदेतर्हि प्रागिवैकरेखीयबाह्यपरिधीनां रूक्षसरलरेखाकलित-मूर्त्तीनां स्थाने समञ्जसाः प्रतिमा निर्मीयन्ते स्म. पञ्चमशताब्द्या मध्यतः परवर्त्तिकालीनाः सतनास्थ-खोह-भूमरा-मढ़िया-ग्वालियरवर्त्तिपवाया- पन्नान्तर्गत-नयनाकुठारीस्थलीयमूर्त्तयः प्रारम्भकालीन-लक्षणानि प्रकटयन्ति पर्यायशो लघुकृशसुकुमारतामापन्नाः. यथाह क्रेमिशमहाभागः- 'भारहूत-साँची-कलयोरारम्भिके गौरवकालक्रमे यो देश्य आदिमो मौलिक आदिवासीयः सौष्ठवगुणो बभूव गुल्मेष्वपि जीवनाधायकः,

तमेव मानवकलेवर-प्रतिबिम्बमयीषु मूर्त्तिष्वेतासु परिपोष्य नवस्पन्दि जीवन-माविष्कृतम्. वस्तुतो मध्यप्रदेशस्यादिवासिनां कलाकृतिष्वपि शारीरिकोर्जा प्रदर्शनविषय आदिमः सुदुस्त्यज आग्रहो बभूव, यः पञ्चमशताब्द्या उत्तरार्द्धभवासु विशालबाघमूर्त्तिषु षष्ठशताब्द्या उषःकाले बिलासपुरवर्त्ति-ताला-मन्दसौरस्थ- सोंधनी-खिल्चीपुरा-अफजलपुरेषु प्रतिफलितो लक्ष्यते. विघटमाने गुप्त साम्राज्ये विजृम्भमाणासु च क्षेत्रीयतासु प्रामुख्यं सप्तमाष्टमशताब्द्योरभजत कलादृष्ट्या प्रकटविभाजकपङ्क्तिः प्रयोगबहुलः परिवर्त्तनमयश्च गौरवयुगान्मध्ययुगं प्रति संक्रान्तिकालः. अस्मिन्नेव काल इष्टिकाप्रस्तरैरनेकानि निर्मितानि मन्दिराणि येषु कानिचनाद्यापि रायपुरस्थ-सिरपुर-राजिम-बिलास-पुरवर्त्तिमल्हार- खरोद-शिवरीनारायण-अदभार-सरगुजाऽन्तःपाति-डीपाडीह-सीधीमण्डलस्थ-मढ़ा-ग्वालियरमुरेना-स्थित-बटेसर-नरेसर-गुनावर्त्ति-सेसई- टीकमगढ़- पात्यूभरी- मन्दसौरस्थेन्द्रगढ़-लोटखेड़ी-हरिपुरा-विदिशापाति-गाडरमल-बड़ोहापठारी- सागरस्थरेहली-स्थलेषु विद्यमानानि विलसन्तिः एतेषां मन्दिराणां प्रत्यभिज्ञा विशालायतशिखरं, विशङ्कटचैत्यगवाक्षः, प्रशस्तो भूमा वेदीबन्धः, पृथुला जङ्घा चतुष्कोणा च केशविन्यासालङ्करणाद्यभिव्यक्तिभिः श्रेण्यविशेषताः स्मारयन्ती पुरुशिल्प-विकासशीला विलोक्यते.

द्वितीयः श्रेण्यक्रमः

प्रारब्धायामेव नवमशताब्द्यां प्रयोगचयोऽयं समाप्तः कालजयिगुप्तयुगे पूर्णप्रायाः सङ्गतयः करुणालोकाचारयोरावेगविवेकयोः क्रियाचिन्तनयोश्च पुनरत्र्यादिवासिक्षेत्रकलायां द्वितीयश्रेण्यक्रमेऽभिव्यक्तिमापुः. लम्बदेहयष्टिः, मृद्वी जीवातुपेशलाऽऽकृतिरोष्ठद्वयी च, आसनमुद्रायां पुष्टजङ्घे, उत्थानमुद्रायां विततशङ्कुसौन्दर्यधरौ चरणौ परिपूर्णरूपसङ्गतिशीलो वलितालङ्कृति-शोभाविन्यासानुपातश्च प्रमुखकलालक्षणानि कालस्यास्य समभवन्. एतादृगुत्कृष्टमूर्त्तिनिदर्शनानि शहडोलमण्डलस्यान्तराया रीवावर्त्तिगुरगीतश्च प्राप्तमातृदेवी- प्रतिमासु मिलन्ति. अधुनैताः सुहागपुरस्य ठाकुरसाहब-संग्रहालये, धवेलाजबलपुरसंग्रहालययोः कलिकातास्थितभारतीयसंग्रहालये च सुरक्षिताः. दमोहमण्डलस्य दोनीग्राममन्दिरे, सागरस्थविनेका- सुरगुजाञ्च-

लस्थडीपाडीह- रीवावर्त्तिबैजनाथस्थले, भानपुरा- हिंग्लाजगढ़-जबलपुर-ग्वालियर- संग्रहालयेष्वपि सदृशमूर्त्तयोऽवाप्यन्ते.

आगामिनि शताब्दीचतुष्टयेऽर्थाद् दशम्या आरम्भ त्रयोदशशताब्दीं यावत् सन्तुलनमिदं क्रमशो मध्यप्रदेशस्यादिवासिकलायां जह्रास. कालेऽस्मिन् (वर्तमानजबलपुर-सागर-दमोहमण्डलात्मके) डाहलप्रदेशे कलचुरिनरेशा निर्मितवन्तो मन्दिराणि यानि जबलपुरस्थभेड़ाघाटे, दमोहवर्त्ति-नोहटास्थले शहडोलसंस्थितसुहागपुरे च विद्यन्ते.

रतनपुरस्य कलचुरिनृपा दक्षिणकोसलान्तर्गत-टूमेन-जाँजगीर- पाली-मल्हारेषु, जेजाकभुक्तेश्चन्देलभूपालाः खजुराहोऽजयगढ़योः; मालवानां परमारनृपा ऊन-नेमावरोङ्कारेश्वर-हिंग्लाजगढेषु, कच्छपाघातशासकाश्च गोपाद्रि-क्षेत्रवर्त्ति- सुखाया-महुआ-तराबी-खेरातादिस्थलेषु मन्दिराणि निर्मापयामासुः. कालेऽस्मिन् संख्यातीतमन्दिराणि निर्मितानि परं तेषु विधि-मानदण्डानुसारिष्वपि पूर्वसदृशी प्रशस्यता न व्यराजत. शिखराणि परं वक्ररेखाणि जातानि, तेषामूर्ध्वगामिनी भूमिकलना ववृधे, रथप्रवृत्तिः क्षितिजसमा सञ्जाता, एकाधिकशिखराणि विगलितचैत्यगवाक्षवैशिष्ट्य-जालिकालङ्कृतिशीलानि निर्मितानि, जङ्घाभागः शिल्पालङ्करणपिच्छिलो बभूव, आवर्त्ता बहवो जगतीपीठ-वेदीबन्धयोरागता मूर्त्तिविद्या च जडतामापन्ना शास्त्रीयव्यूहे निगडबन्धमनुबभूव. यथा देहसौन्दर्यमलङ्करणैर्निमील्यते तथैव शिल्पैः संव्रियते स्थापत्य-श्रेष्ठता. एभिरेव हेतुभिः प्रतिमाभिव्यक्तिः पर्यायशो भावहीना निराकाराऽजायत, क्षीयते स्मानुपातबुद्धिरीश्वरवास्तव्य- देहभूतमन्दिराङ्गेषु तदलङ्कृतिकल्प -शृङ्गारशिल्पेभ्यश्च .आकाशमेदिन्योः परिणय- कल्पनाऽत्र मन्दिरसम्पूर्त्यै शैवबौद्धयोस्तान्त्रिकविभेदानपि सूत्रयामास चित्रयन्ती प्रेतराक्षसानादिमाप्सरसो देवान् व्यालशिरसो भौतिकविकृतिमयान् कामतन्मयान्. तत्त्वज्ञानगवेषणा समुद्वेजयत्येव सहजविश्वासवदान्यताम्.

परवर्त्ति-मध्यकालीनस्मारकाणि

मध्यप्रदेशस्यादिवासिक्षेत्रेषु त्रयोविंश्या आरम्भ्योनविंशशताब्दीपर्यन्तं प्रचुरयवन-राजपूत-स्मारकातिरिक्तमपि परःशतदुर्गमन्दिराणि गोण्ड-भिल्ल-नायकभिल्ल- भिलालादीनां शक्तिमतामादिवासिनामर्द्धादिवासिनाञ्च

समुदायैर्निर्मितानि. अनेकाञ्चलेषु मध्यप्रदेशस्यैतादृशस्मारकाणि सम्प्रत्यपि कमलापतिमहलाख्यं भोपाले, तत्पार्श्वे रानीमहलाभिधं, सीहोरनगरे गिन्नोरगढ़संज्ञं, जबलपुरे मदनमहलनामकं, दमोहाञ्चले सिंगोरगढ़ाख्यं, मण्डला-राजनाँदगाँवमण्डलयो रामनगर-मदुआमहलनामनी, खरगौनक्षेत्रे ओङ्कारेश्वर-पुनासा-भीलगढ़ाबसगढ़- बीजासेनीमन्दिराणि बैतूलमण्डले च खेरलाह्वयं कोऽपि वीक्षितुं शक्नोति. होशङ्गाबादे काष्ठनिर्मितोऽस्ति मकरैकाप्रासाद:. बुन्देल-बघेल-मुगलस्थापत्येषु स्थानीयादिवासिकौशला-तिरिक्तमपि कालस्यास्य विशिष्टादिवासि-स्थापत्यकला-निदर्शनानि स्मारकस्तम्भ-सतीस्मारक-यूपस्तम्भ-विशालदीपस्तम्भ-स्तूपमयानि गोचराणि सन्ति. बस्तरवर्ति-काँकेर-दन्तेवाड़ा-बारसूर मन्दिरेषु युगपदादिवासि-काकतीयप्रभावौ मिलत:.

निरन्तर: प्रेरणाप्रवाह:

आरम्भिक्या वर्तमानकलापर्यन्तमुद्देश्यविषययोराचारकलयोश्च प्रवहति कश्चन सततसम्बन्धो मध्यप्रदेशादिवासि-कलात्मकप्रयासेषु. चित्रमिदं यद् जीवनावसरो व्यसनम् ऋतौ ऋतौ पर्व चैकस्मै देवाय सहजतया समर्पितम्. शैलचित्रकलासु संक्रान्तानि विकास-बहुलता-भावोत्तेजकानि फल्गुगीतार-भटीप्रमोदभावोत्कटानि सामूहिकनृत्यानि सन्ति भुजरिया-हरेरी-पोलाप्रभृतीना-मादिवासिपर्वणां पूर्वरूपाणि.

अद्यापि प्रदेशस्य वनाञ्चलेषु पार्वतभागेषु च प्रचलिताऽऽदिम-व्यवस्थासूचिका गोण्डजातीयानां दाहियाकृषिपद्धतिर्बेवारप्रणाली च बैगाजना-नामास्ते. पूजयन्ति ते दिव्यभावानुभूतिभि: स्वयन्त्रोपकरणानि जीवप्रवृत्तीश्च पशुक्षुपपुष्पपादपपर्वतानाम्. बिल्वपत्रं कमलचम्पकपुष्पाणि चार्प्यन्ते भगवते शिवाय सोनकुत्ताऽऽख्यवन्यकुक्कुरसेविताय. ओङ्कारेश्वरद्वीप: प्रणवलिङ्ग-वन्नर्मदा- भवोपलाश्च बाणलिङ्गरूपेण पूज्यन्ते. वृक्षा अपि समर्च्यन्ते. एतेषामभिधानतो नामावली ग्रामादीनां निर्धारिता विलसति-यथा पिप्पलेन पिपरिया, अम्लिकया इमलिया, उदुम्बरेण ऊमर:, हरिणपर्यायत: साँभरदेव:, महिषेण भैंसासुर:, व्याघ्रेण बाघदानव:, वन्यमहिषेण हेलादेव:, कुठारेण कुल्हारदेव:, गोधूमपेषणेन सोदलमाता, प्रकृतिविशालतया बड़ादेव:, निर्जनेन

अञ्जनदेवः विवाहेन च पूजितो दूल्हादेवः. सर्वेऽमी प्रतीकभूताः सततदीर्घगामि-परम्परायाः समर्च्यन्ते विपद्वारणाय धनधान्य-समृद्ध्यै च मानवैः. बैतूलीयकोरकूसमाजपरिशीलितमनुष्ठानं सेन्दोलीसंज्ञं शैलकलासु काष्ठारोपितशवयात्रां स्मारयति. बैगा- भूमका-परिहारप्रभृतय ऐन्द्रजालिक-विषवैद्या अद्यत्वेऽपि रोगावग्रहनिवारणहेतून् वर्षासमृद्ध्यै दैवाह्वानपराननुष्ठान-मयाचारान् प्रदर्शयन्ति. प्राचीनग्रामस्थयक्षावासा एतर्हि गोण्डजातीयैर्देवखल्लेति सन्दर्श्यन्ते. मध्यप्रदेशस्यादिजातीयेऽञ्चले शताब्दीषु समन्वयेन मिमिलतुः साऽऽदिवासिनां विश्वासकल्पवीथी भारतीया मूर्त्तिविद्या च.[1]

1. श्री के.के. चक्रवर्त्तिन आङ्लनिबन्धमाश्रित्य.

सुवर्णकान्ति गद्यम्

प्रौढप्रगाढतरपाकविलोभनीयं
प्रत्यग्रपेशलवचोरचितं गभीरम्,
उद्दामसंस्कृतनयोपचितं विचित्र-
माभाति भास्करसुसंस्कृतजीवनं मे.1

शाणोपलायितमिति प्रवदन्ति धीरा
गद्यं तदद्य हृदवद्यविधानसिद्धम्,
श्रीभास्करेण परिपूर्णसुवर्णकान्ति
प्राज्ञा भजन्तु निजकर्णविभूषणार्थम्.2

शतावधानी रा. गणेशः
उपनिदेशकः
भारतीय-विद्याभवनम्
रेसकोर्समार्गः, वेङ्गलूरु-1

लेखक-परिचयः

कविरस्पृशद् वसुमतीं दोरकतनुभाजि भाद्रकेऽनन्ते
महिते प्रयागतीर्थे ग्रहाङ्करत्नेन्दु-रञ्जिते वर्षे.

तत्र च विश्वायतने कलयन् विद्यालयाजिरे प्रतिभाम्
बालकविः कथितोऽयं राघवसञ्ज्ञेन सुरगवीविदुषा.

मध्यप्रदेशयजनं शिक्षाऽऽहुतिभिः प्रकल्पयन् सुचिरात्
छत्रयुतेऽम्बिकया वा लसदभिधाने पुरे मुदा न्युषितः.

आफ्रिक-विषयविदग्धैरमरगिरां शोधकः समाहूतः
अम्बरयात्रां विदधे रीवानगराद् वसुन्धरापरिधेः.

शब्दकृतः पल्लविता रसभरिता नव्यसाहितीव्रतती
मानवशतकमुदारं मृत्कूटं वै सचेतसोऽप्रीणात्.

दूर्वामेदुरपाणिः परिषत्सचिवः पुराऽथ भूपाले
आचार्यत्वं सम्प्रति वरयति वाचां वरेण्यसंस्थाने.

ALL MAHAPURANAS

Text with Shloka Index & Introduction

Agni Mahapurana
664 pp 450.00

Bhagavata Mahapurana-
4vols 2304 pp Set 1500.00

Bhavishya Mahapurana
3vols 1400 pp Set 1200.00

Brahma Mahapurana
728 pp 450.00

Devi Bhagavata Mahapurana
1154 pp 800.00

Ganesha Purana
832 pp 1993 450.00

Garuda Mahapurana
668 pp 400.00

Harivansha Purana
1802 pp 2vols set 900.00

Kurma Mahapurans
298 pp 300.00

Linga Mahapurana
774 pp 400.00

Markandeya Mahapurana
828 pp 450.00

Narada Mahapurana
932 pp 600.00

Padma Mahapurana
2381pp 4vols set 1600.00

Shiva Mahapurana-
1504 pp 2vols set 900.00

Shiva Mahapurana (Small Type)
412 pp 400.00

Skanda Mahapurana
5600 pp 8 vols set 4000.00

Skanda Mahapurana-3vols
(small Type) 1500.00

Vamana Mahapurana
472 pp 400.00

Vayu Mahapurana
540 pp 400.00

Vishnudharmottara Mahapurana
1246 pp 900.00

Vishnu Mahapurana-with two commentaries
680 pp 500.00

Maha Bhagavat Devipurana
Press

Kalki Purana
316pp 120.00

Vasuki Purana
260 pp 100.00

Saura Purana
290 pp 100.00

Narsimha Purana
380 pp 100.00

Ekamara Purana
490 pp 150.00

Ashtadasha purana Darpana Contents of 18 Puranas
432 pp 180.00

PURANAS WITH TEXT, TRANS & NOTES IN ENGLISH VERSWISE

Vishnu Purana—*H.H. Wilson*
1065 pp 2 vols Set 500.00

Matsya Purana—*N.S. singh*
1252 pp 2 vols 500.00

Narasimha Purana —*Dr.S.Jena*
1100 pp 400.00

Kalika Purana
Prof. Biswanarayan Shastri
(Shloka & Name Index)
1770 pp 3vols set 900.00